rectitude;[1] non–injury, truthfulness, absence of anger, renunciation, control of the internal organ, absence of anger, renunciation, control of the internal organ, absence of vilification, kindness to creatures, non–covetousness, gentleness, modesty, freedom from restlessness;[2] vigour, forgiveness, fortitude, purity, freedom from malice, absence of haughtiness, – these are the qualities of one, who is destined to have a divine nature.[3] The *Ṛgveda* shows the struggle between the gods and the dark opponents. The *Rāmāyana* also represents a similar conflict between the representatives of high culture and those of unbridled egoism. Similarly the *Mahābhārata* tells us of the struggle between the *Pāṇdavas*, who are devotees of *Dharma*, of law and justice, and the *Kauravas* who are lovers of power. S. Radhakrishnan says, historically, mankind remains remarkably true to type and we have today as in the period of the *M.B.* some men who are divinely good, some who are diabolically fallen and who are damnably indifferent.[4] In the present scenario, the ratio of negativity will keep on increasing. There is a fearful environment everywhere, no security, everywhere there is untruth and seduction. People are binding themselves with various bondages. The bondages are one's own negative thoughts and habits (*Saṃskaras*), due to which he has lost control on his own senses. There are also people who have their bondages in relationships. There has to be love and faith in relations but many people are losing their faith and love in their relatives, hence they are not able to stay together. Consequently it has led to increasing number of nuclear families and divorces. In such a worst scenario how far can the society be a place to live happily? The *Bhagavadgītā* gives very wonderful teachings of *Karmayoga* that creates a positive attitude in human being which helps create a harmony in social relationships and interactions.

Life without morals – According to the teachings given by the Brahmakumaris, it says that a life without values and morals will create an imbalanced personality. BK Jagadish says, "Life will be not be qualitative and emotionally worth living, if we load people's mind with facts and if the society does not have any cherished values, noble traditions and worthy customs. Would we be happy with politics without principles, business without honesty, science without scruples, money without morals and families without love and cooperation?[5] So this is the crucial time in the entire history of mankind where everyone in the society needs to be taught of moral and values combined with spiritual knowledge. To live a value based life one has to start the process of transformation. For this a person has first to have the realisation that there are certain negative tendencies within him, which needs to be eliminated and positive values have to be built up in their place. This realisation, coupled with firm determination alone can start this process. The first transformation has to be at the belief–level. One has to know that his real identity is as of a soul, a point of light and that in his original nature, he is pure and peaceful and is an immortal child of God, who also is a point of light and is perfectly pure, peaceful, loving and blissful. Based on this consciousness and having faith in the law of *karma* and reincarnation, one has to make efforts, with resoluteness of mind, for inner transformation. This self–transformation leads to a better society.

---

[1] अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः। दानं दमश्च यज्ञश्च स्वाध्यायस्त्प आर्जवम्॥ *Bhagavadgītā, 16.1.*

[2] अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्। दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥ *Bhagavadgītā, 16.2.*

[3] तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता। भवन्ति संपदं दैवीमभिजातस्य भारत॥ *Bhagavadgītā, 16.3.*

[4] S.Radhakrishnan, op.cit, p. 334.

[5] BK jagdishchander, *Building a value based, peaceful and prosperous society*, Literature Department – BrahmakumarisIshwariya Vishwavidyalaya, Delhi, 2000, p. 295.

Teachings of *Karmayoga* – Literally *Karma* means 'action' or 'deed', in fact anything that you do. If *Ṛta* is "Truth in action", *Karma* is the "Law of action". In the traditional texts *karma* is often written as a compound word– *karma–vipāka*. *Karma–vipāka* means "action and result" similar to "cause and effect". Everything you do is caused (at least in part) by what you have done in the past and in turn will cause your future actions.[1] Thus every act, moral and otherwise, is the result of some previous act which caused it. In the *Upanishads*, *karma* thus operates as a causal explanation for everything that happens, particularly to human beings. "As one does, so one becomes; by virtuous acts one becomes virtuous, by errant acts one becomes errant".[2] In other words, all actions you take are the results of actions you have taken in the past; all actions you take are also the causes of future actions. *Karma* is descriptively described by all the *Āstika Darśana*. Six types of *Karmas* are elaborated in *Vedāntasāra*, they are – *Nitya*, *Naimittika, Niṣiddha, Prāyaścitta and upāsanāṇi*.[3] M. Hiriyanna described these concepts extensively, he mentioned, *Nitya karma* generally obligatory while the *Naimittika karma* is performed only conditionally. The latter depends upon some specific occasion. *Prāyaścitta Karma* also depends upon specific circumstances but it differs from the *Naimittika karma* which is occasioned by sinful acts. *Niṣiddha karmas* are completely prohibited. *Upāsanā* is meditation, a mental operation involving an explicit use of the will. It is different from *jñāna* which does not depend upon will, but arises whenever the conditions for it such as contact of sense with object are fulfilled.[4]

Bhagavadgītā advises human beings to perform such *karmas,* which will not create bondage. The *Karma* which is associated with *jñāna* that *karma* becomes *yoga*, and then one comes out of the bondage of *karma*. It is said "being steadfast in *yoga* and perform actions, abandoning, attachment, remaining unconcerned regardless of success and failure. This evenness of mind is known as *Yoga*".[5] While performing any action to be steadfast in *yoga* means to concentrate fully on action not on the other things. Many times it happens when we are performing a particular task our mind is not concentrating on it but is wandering somewhere else. Hence the quality of that work decreases. But when we work or act with a focused mind then such work is definitely qualitative. If we have worked with focused a mind and yet we are not successful or we do not get a satisfactory result, then too we will be happy because we will have the satisfaction that at least that we've done the work with complete concentration. Our actions are the reflection of our character. If will act with the values (*Daivi Sampat)*, which are mentioned in *Bhagavadgītā* then our every act will create positive attitude which will be beneficial for ourselves as well as for others.

Knowledge of Good action, Bad action and Neutral action – Brahmakumaris give the knowledge regarding the nature of actions in this physical world of duality, where to every action there is an equal and opposite reaction. They explain in their basic course the true meaning of *Sukarma* (Good action), *Vikarma* (Bad action) and *Akarma* (Neutral action). The genesis of action is that thoughts emerge in the mind first on the basis of *Saṃskāras*, which when transformed into action, produce their own reactions thereby resulting in

---

[1] मर्त्याः सर्वे जगज्जाताः कर्म कुर्वन्ति सर्वदा। स्वकर्माणि ततो देवि भुज्यन्ते देवमानुषैः॥ *Karmavipākasaṃhitā* 1.33.

[2] *Brihadaranyaka Upanishad,* 4.4.5.

[3] तानि कर्माणि षड्विधानि नित्य-नैमित्तिक-काम्य-निषिद्ध-प्रायश्चित्त-उपासनानि। Sadanandayogi, *Vedāntasāra* 3.

[4] Sadananda, *Vedāndta-sāra – A work on Vedanta Philosophy*, Ed. And Tr. M. Hiriyanna, oriental Book Agency, Poona, 1962, p. 21.

[5] योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ *Bhagavadgītā,* 2:48.

linkages with other souls. Good action is one which is viceless, that is, it is performed without the influence of any vices as a bad action is influenced by a vice or vices. A good action performed while in the remembrance of the Almighty Godfather leaves no reaction on the mind and generates no new linkages and therefore, comes under the category of *Akarma* or Reactionless Action and is also commonly called non–attached action.[1]

Teachings of *Rājayoga* Followed by Brahmakumaris – *Rājayoga* which practised by Brahmakumaris not just a meditation but it is the way of life. Brahmakumaris define *Yoga* as 'lovable and purposeful link of soul with Incorporeal God by stabilizing in soul–consciousness and God–consciousness.' "*Rājayoga* is the art of living in balance of being happy and peaceful, of knowing and loving the self and others on a deeper, more spiritual level. It's an essentially spiritual practice that has its roots in antiquity and yet its validity is confirmed in the present day–to–day personal whirlwinds of many.[2] Practice of *Rājayoga* gives man inner tranquillity. It gives him mental relaxation and thus enhances his capacity to judge things calmly and dispassionately. It enables man to live in peace and to let others to live in peace. This state of mind contributes greatly towards the betterment of the society.[3] The four pillars of the spiritual teachings should be very strong for *an Rājayogī*. They are – celibacy (*Bahmacharya*), good company (*Satasaṅga*), pure conduct (*Dhārṇā*), Pure or *Sāttvika* food and *Sevā* (Godly service). Celibacy, good company, pure conduct and pure food are necessary to be observed for the self–improvement and the Godly service helps one to serve others with divinity which is imbibed by *Rājayogī*. The good wishes a *Rājayogī* has in his heart for others or in a broader sense for the entire creation helps in creating a positive energy field which emerges in the form of good vibrations called *Manasā sevā.* When The Godly knowledge received by us is given to others verbally it is known as *Vāchā sevā*. The act which is performed for the welfare of others, such every act is called *Karmaṇā seva*.[4] Hence these services help the *Rājayogī* as well as others to be psychologically, physically and emotionally healthy and strong. Thus *Rājayoga* helps one to increase his emotional stamina, improves human relations, frees one from worries, saves wastage of thought power and brings about an atmosphere of good will. In other words, it brings about the society of divine sovereignty.

Conclusion – This world is in the cyclic form. As the cycle moves cyclically i.e., the part of the cycle which goes up that comes down and the part which is at down that takes again upper state. Similarly the state of this world is also cyclic, which keeps on changing, which means change is the only thing that is constant. Hence it is said nothing is certain but change is certain in this world. Change is the law of this world. This makes us realise that this world is in a state of downfall. The material world outside has reached its highest stage, but at the same time we are seeing a degeneration in morality and spirituality. God has said in the *Bhagavadgītā* that whenever there is a decline of *Dharma* and rise of *Adharma*, then He comes for the protection of the good, for the destruction of the wicked and for the establishment of *Dharma.*[5] The same is advocated by the Brahmakumaris also, who say that

---

[1] Hassija Jagdishchander, *Rajyoga: as experienced by a scientist*, Brahmakumaris Literature Department, Delhi, p. 26.

[2] Ó Donnell, Ken, *Pathways to higher consciousness*, Eternity Ink, Australia, 1996, p. 10.

[3] Hassija Jagdish chander, *Spiritual Miscellany*, om Shanti Press, Abu road, 2000, p. 481.

[4] Jagdishchander, *Gyansudha, Vol. 4*, Literature Department, Abu (Raj.), 2008, p. 43.

[5] यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय संभवामि युगे युगे॥ *Bhagavadgītā, 4:7-8.*

now it's high time that there is a transformation of this world. This world cycle will change from *Kaliyuga* i.e. the Iron Age to *Satyayuga* i.e., the Golden Age. This age is called as the confluence age. We have the knowledge from scriptures since centuries but the situation of the world is falling down continuously, the reason being the knowledge of the scriptures learnt by people is theoretical in nature and hence doesn't come into practice. If human beings practically apply the teachings of scriptures in their life, they will find positive change in their own personality. Brahmakumaris help all to use knowledge in a practical way. Their teachings give special focus on the practical application of knowledge. Creating a good society is the responsibility of each and every citizen. When an individual is wise, his good lifestyle is an example that is followed by his family and it will impact the entire society thus helping in developing harmony. When every person turns to be wise then there will be unity in the society because goodness will be reflected collectively and where there is unity there will be peace and happiness. So let us contribute in this process of transformation with the practical use of the divine knowledge taught by God himself.

Bibliography

- **Primary Sources:**

1) Chitrav Vinayak, *Rigvedache Marathi Bhashantara*, Bhartiya Charitra Kosha Mandala, Pune.
2) *Dikshit Shivagovind. (1983) Karmavipāka Saṃhita*, Tejkumar Book Depot, Lucknow.
3) Hiriyanna M. (1962) *Vedāntasāraḥ*, Sadanandayogi, Oriental Book Agency, Poona.
4) Sastri S. Sitaram. (1928) *The Katha and Prasna Upanisad, Srisankara's Commentary,* The India Printing works.
5) Shastri Pansikar Wasudeo Kaxman. *(1915) Brahmasūtra Śāṅkarabhāśya,* Nirnaya sagar Press, Bombay.
6) Sharma Shriram and Sharma Bhagavatidevi. (1995) *Ṛigveda Saṃhita – Saral Hindi Bhavarth Sahit, Vol. 1*, Brahmavarchas Shantikunja, Haridwar.
7) Sinha Amar. (2002) *Amarkoṣaḥ*, Eastern Book Linksrs, Delhi.
8) Swami Adidevananda. (2005) *Śri Rāmānuja Gītā Bhāṣya,* Sri Ramakrishna Math, Madras.
9) Swami Gambirananda. (1984) *Bhagavadgītā with the commentary of Śaṅkarācārya*, Advaita Ashrama, Calcutta.
10) Swami Gambhiranand. (1989) *Eigth Upanisadas Vol. 1, with the commentary of sankaracharya,* Advaita Ashram, Calcutta.
11) Swami Prabhupad. (1990) *Śrimadbhagavadgītā As it is*, Bhaktivedant Book Trust, Mumbai.
12) Swami Ramsukhdas. (2017) *Srimadbhgavadgītā,* Sadhakasanjivani, vol.1, Geeta press Gorakhpur.
13) Swami Swarupananda. (2016) *Śrimadbhagavadgītā,* Advaita Ashram, Kolkata.

Secondary Sources:

1) Ranade, R.D. (1959) *The Bhagavadgītā As a philosophy of God–realisation,* Nagpur University, Nagpur.
2) Sinha, J.N., (1985) *Introduction to Philosophy*, New Central Book Agency, Calcutta.
3) S. Radhakrishnan, (1956) *The Bhagavadgītā*, George Allen and Unwin Ltd., London.
4) (1975) *The way and the goal of Rajayoga*, PBKIVV, Abu, Mt.
5) BK jagdishchander. (2000) *Building a value based, peaceful and prosperous society*, Literature Department – BrahmakumarisIshwariya Vishwavidyalaya, Delhi.
6) Hassija Jagdishchander, *Rajyoga: as experienced by a scientist*, Brahmakumaris Literature Department, Delhi.
7) Ó Donnell, Ken. (1996) *Pathways to higher consciousness*, Eternity Ink, Australia.
8) Hassija Jagdish chander. (2000) *Spiritual Miscellany*, Om Shanti Press, Abu road.
9) Jagdishchander. (2008) *Gyansudha, Vol. 4*, Literature Department, Abu (Raj.).
10) *Avyaktvani,* Prajapita Brhmakumari Ishwariya Vishva Vidyala*,* Abu (Raj.).

Author's Detail

Address: Room No. 14, Chawl 1/ Doshi Chawl, Sunderbaug, Kamani, Kurla (W), Mumbai 400070

Email: bkreshma.k@gmail.com

****

अथर्ववेदे प्रथमद्वितीयकाण्डयोः वर्णिताः पादपौषधयः

डा. रणजीत कुमार **एवं** मीनाक्षी गर्ग

शोधसारः

भारतीयज्ञानगङ्गायाः स्रोतांसि वेदा एव सन्ति। चत्वारो वेदाः सन्ति। ऋग्वेदादयः त्रयो वेदाः आमुष्मिकफलदातारः सन्ति परन्तु अथर्ववेद ऐहिकमपि फलं प्रयच्छति।[1] अथर्ववेदस्योपलब्धेषु अनेकाभिधानेषु अथर्ववेद–अथर्वाङ्गिरसवेदादि नामानि मुख्यानि –अङ्गिरावेद–ब्रह्मवेद सन्ति। अथर्ववेदे आयुर्वेदीयसिद्धान्तस्य व्यवहारस्य च अनेकानां महनीयजिज्ञास्यविषयाणां विशिष्टसङ्कलनम् अस्ति। अस्य अनुशीलनेन आयुर्वेदस्य प्राचीनता प्रामाणिकता व्यापकतादीनां पूर्णपरिचयः उपलभ्यते। रोगाणांतेषां प्रतीकारस्य ओषधीनां च विषये उपयोगीनां , वैज्ञानिकतथ्यानां च उपलब्धिः आयुर्वेदे भवति।[2] अथर्ववेदे मन्त्रः, पादपः, मणिः, जलादीनां औषधरूपेण वर्णनमस्ति। परन्तु अत्र पादपौषधस्य प्रतिपादनं भवति। **नास्ति मूलम् अनौषधम्** इत्येतस्याः सूक्तेः आधारः अथर्ववेद एव भाति। ऋषयः पादपानाम् औषधरूपेण उपयोगं जानन्ति स्म लोककल्याणाय च उपयोगं कुर्वन्ति स्म। वर्तमानयुगे तु वयं पादपविज्ञानेन जीवरक्षणं पश्यन्तः स्मः।

कुञ्चीशब्दाः – रोगः, ओषधिः, मणिः, मन्त्रः, मुञ्जः, जङ्गिडः, मधुका, यवः, दूर्वा, पृश्निपर्णी, पाटामणि, सक्तूदकम्, दृषद्।

****

भारतीयज्ञानगङ्गायाः स्रोतांसि वेदा एव सन्ति। एवम्विधो अन्यो न दीप्तपुञ्जः ग्रन्थोऽस्ति यः स्वप्रभया न केवलं स्वयं भासितः प्रत्युत तया प्रभया समस्तभारतीयवाङ्मय एव प्रभासितो वर्तते। **अपौरुषेयं वाक्यं वेद** इत्याह लौगाक्षिभास्कर।[3] सायणस्तु तैत्तिरीयसंहिताभाष्यभूमिकायां "**इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेद**"। चत्वारो वेदाः सन्ति। ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः। यत्रार्थवशेन पादव्यवस्था अस्ति तेषां छन्दोबद्धानां मन्त्राणां नाम ऋक् इति वेद्यम्। यस्मिन् वेदे यज्ञयागादि क्रियाकलापानुरोधेन मन्त्राणां सन्निवेशोऽस्ति स यजुर्वेदः इति निगद्यते। यत्र गीतिरूपा मन्त्राः विद्यन्ते स उपासनाकाण्डपरको वेदः सामवेद इति गीयते।[4] यत्र शान्तिपौष्टिकादि-कर्मसम्बद्धानां मन्त्राणां वर्णनं वर्तते सः अथर्ववेदः।

अथर्ववेदस्योपलब्धेष्वनेकाभिधानेषु अथर्ववेद–ब्रह्मवेद–अङ्गिरोवेद–अथर्वाङ्गिरसवेदादि नामानि मुख्यानि सन्ति। अथर्ववेदस्य अनेकानि नामानि अन्यग्रन्थेषु प्राप्यते। एतस्य प्राचीनतमं नाम अथर्वाङ्गिरसः अस्ति। इदं नाम शौनकीयसंहितायां प्राप्यते। अथर्वाङ्गिरस–पदस्य व्याख्याकृते सति प्रतीतो भवति यद्वेदोऽयम् ऋषिद्वयेन द्रष्टानां मन्त्राणां समूहः वर्तते। अथर्वदृष्टमन्त्राः शान्तिपुष्टिकर्मयुक्ताः सन्ति। अङ्गिरसदृष्टमन्त्रास्तु आभिचारिकाः भवन्ति।[5] अथर्ववेदे भैषज्यमन्त्राणां अधिकता वर्तते अतः एतस्य अपरं नाम भैषज्यवेदो अपि वर्तते। महाभाष्यकारपतञ्जलेरनुसारं अथर्व-

---

[1] वैदिकवाङ्मयस्येतिहासः, पृ. 115.

[2] तत्रैव

[3] अर्थसंग्रहः, पृ. 47.

[4] वैदिकवाङ्मयस्येतिहासः, पृ. 5.

[5] तत्रैव पृ. 116.

वेदस्य पुरा नव शाखाः आसन्। पैप्पलाद, स्तौद, मौद, शौनकीय, जाजल, जलद, ब्रह्मदेव, देवदर्श, चारण वैद्य। वर्तमाने पैप्पलाद् शाखा शौनक शाखा च प्राप्येते। अथर्ववेदस्य उपवेदः आयुर्वेदः वर्तते। रोगनिवारकः वेदोऽयम्। अथर्ववेदे विभिन्नपादपैः विविधौषधीयचिकित्सानां वर्णनं वर्तते। तत्र केषाञ्चित्पादपानां परिचयः, प्रमाणपुरस्सरं दीयते।

मुञ्जः – **यथा द्यां च पृथिवीं चान्तस्तिष्ठति तेजनम्।**
एवा रोगं चास्रावं चान्तस्तिष्ठति मुञ्ज इत्॥[1]

येन प्रकारेण दिवश्च पृथिव्याश्च अन्तः तेजनः – वेणुः/तेजस्वी सूर्यः तिष्ठति। तथैव रोगं (रुज्यते भज्यते पुरुषः अनेनेति रोगः ज्वरातीसारादिरूपः) आस्रावम् (आसमन्तात् स्रवति अङ्गप्रत्यङ्गेभ्यः इत्यास्रावो मूत्रातीसारः) ज्वरातीसारादिरोगस्य आस्रावस्य च मध्यो मुञ्ज इत् एव तिष्ठतु।[2] अत्र मुञ्जः रोगनाशकः उक्तः। विश्वनाथविद्यालङ्कारः मन्त्रव्याख्यायां मुञ्जं मूत्रस्राविणं कथयति[3]। आयुर्वेदे मुञ्जस्य प्रयोगः अनुसन्धेयो वर्तते।

मधुका – **इयं वीरुन्मधुजाता मधुना त्वा खनामसि।**
मधोरधि प्रजातासि सा नो मधुमतस्कृधि॥[4]

इयं पुरोवर्तिनी वीरुत् विरोहणशीला लता मधुकाख्या मधुजाता मधुनि मधुररसोपेते भूतले जाता उत्पन्ना। हे वीरुत् त्वा त्वां स्वभावतो मधुरां वयमपि मधुना मधुरूपेण खनित्रादिना खनामसि खनामः अवदारयामः। तथा त्वं मधोः मधुनः मधुरूपाद् उपादानकारणात् प्रजाता प्रकर्षेण जाता असि भवसि। या त्वम् उक्तप्रकारेण आश्रयतः स्वभावतः उपादानतश्च मधुमयी भवसि सा त्वं नः अस्मान् मधुमतः मधुररसोपेतान् कृधि कुरु।[5] जायापत्योः सम्बन्धेषु मधुका इव मधुरता भवतु इति समग्रसूक्ताभिप्रायः। विनियोगे मधुकलतायाः प्रयोगः उक्तः सूक्तारम्भे। विश्वनाथविद्यालङ्कारानुसारं मधुका लता इक्षुः वर्तते।[6]

जङ्गिडवृक्षः – **दीर्घायुत्वाय बृहते रणायारिष्यन्तो दक्षमाणाः सदैव।**
मणिं विष्कन्धदूषणं जङ्गिडं बिभृमो वयम्॥[7]

दीर्घायुत्वाय चिरकालजीवनाय। यद्वा दीर्घायुष्ट्वाय। दीर्घम् आयुः अस्माकं यथा स्याद् इत्येवमर्थं बृहते महते रणाय रमणीयाय प्रशस्याय कर्मणे। अभिलषितकर्मानुष्ठानविघ्नशान्तय इत्यर्थः। अरिष्यन्तः अविनश्यन्तः। अहिंसनाद्धेतोरित्यर्थः। सदैव सर्वदैव रक्षमाणाः आत्मानं पालयमानाः। रक्ष पालने इत्यस्माद् व्यत्ययेन आत्मनेपदम्। आत्मरक्षणाद्धेतोरित्यर्थः। विस्कन्धदूषणम्। विस्कन्धः रक्षःपिशाचादिकृतगतिप्रतिबन्धात्मकः शरीरशोषणरूपो वा विघ्नः तस्य

---

[1] अथर्ववेदः, 1:1.2.4.

[2] Ibid. सायणाचार्यः (सायणभाष्यसंहिता अथर्ववेदसंहिता, भाग-1), 1:1.2.4.

[3] अथर्ववेद-भाष्यम्, (आध्यात्मिक व्याख्या) काण्ड 1:3, 1:1.2.4.

[4] अथर्ववेदः, 1:6.34.1.

[5] अथर्ववेदभाष्यम्, सायणाचार्यः, 1:6.34.1.

[6] Ibid. (आध्यात्मिक व्याख्या) काण्ड, 1:3, 1:6.34.1.

[7] अथर्ववेदः, 2:1.4.1.

निवारकम्। जङ्गिडम्। जङ्गिडः वृक्षविशेषो वाराणस्यां प्रसिद्धः। तेन साधितं मणिं बिभृमो धारयामः।[1] जङ्गिडः अनेकेषां रोगाणां निवारकः वर्तते। एतस्य मणिरूपेण प्रयोगः उक्तः।

यवः - दूर्वा – **अघद्विष्टा देवजाता वीरुच्छपथयोपनी।**
आपो मलमिव प्राणैक्षीत् सर्वान् मच्छपथाँ अधि॥[2]

अघद्विष्टा अघस्य पिशाचरक्षःप्रभृतिजनितस्य पापस्य द्वेषिणी विनाशयित्री। देवजाता देवनिर्मिता देवार्थं वा उत्पन्ना शपथयोपनी लौकिकस्य वैदिकस्य च ब्राह्मणादि कृतस्य शापस्य विमोहनी निवारयित्री। एवंविधा वीरुत् विरोधनशीला दूर्वा यवो वा। सर्वान् उक्तविधान् शापान् मत् मत्तः। प्राणैक्षीत् प्रकर्षेण प्रक्षालयतु। तज्जनितम् अरिष्टम् अस्मत्तो निःशेषं वियोजयतु इत्यर्थः। तत्र दृष्टान्तः आपो मलमिव। यथा आपः शरीरादिगतं मलं स्वेदपङ्कादिरूपं प्रक्षालयन्ति।[3] अत्र भाष्ये सायणाचार्येण मन्त्रगतवीरुत्–शब्दस्य विरोधनशीला दूर्वा यवो वा अर्थः कृतः प्रो. विश्वनाथ-विद्यालङ्कारस्तु वीरुत्– परमेश्वर माता ओषधिरूपा इति अर्थं करोति।

पृश्निपर्णी – **शं नो देवीपृश्निपर्ण्यशं निर्ऋत्या अकः।**
उग्रा हि कण्वजम्भनी तामभक्षि सहस्वतीम्॥[4]

देवी द्योतमाना पृश्निपर्णी चित्रपर्णी ओषधिः नः अस्माकं शम् कुष्ठादिरोगशमनेन सुखम् अकः अकार्षीत् करोतु। निर्ऋत्याः रोगनिदानभूतायाः अशम् दुःखम् अकः करोतु। हि यस्मात् उग्रा उद्गूर्णबला सती कण्वजम्भनी कण्वस्य पापस्य नाशयित्री॥ अतः सहस्वतीम् रोगाभिभवनसामर्थ्ययुक्तां तां पृश्निपर्णीं अभक्षि अहं भक्षे अनुलेपादिना सेवे।[5] भाष्येण ज्ञायते यत् पृश्निपर्ण्याः उपयोगः रोगानुसारं भक्षणेन अथवा अनुलेपनाय भवति स्म। कस्मिन् रोगे भक्षणं कस्मिन् रोगे च अनुलेपनम् इति अनुसन्धेयो वर्तते। अस्मिन् सम्पूर्णे सूक्ते पृश्निपर्ण्याः वर्णनं वर्तते।

पाटामणि – **पाटामिन्द्रो व्याश्नादसुरेभ्यस्तीरतवे।**
पाशं प्रतिप्राशो जह्यरसान् कृण्वोषधे॥[6]

पाठाम् उक्तप्रभावाम् ओषधिम् असुरांस्तरीतुम् इन्द्रो व्याश्नात् अभक्षयत्। प्राशं प्रष्टारं वादिनं माम् उद्दिश्य प्रतिपाशः प्रतिकूलप्रश्नकर्तृन् प्रतिवादिनं जहि पराजितान् कुरु। यद्वा प्रतिवादिनः प्राशं प्रश्नं जहि। पराजयप्रकारमेवमाह। हे ओषधे प्रतिवादिवाक्यजनिततापापहर्त्रि। यद्वा ओषे दाहके ज्वरादौ एनां पाठादिरूपां वैद्योपदेशप्रकारेण धयन्ति पिबन्ति आतुरा इति ओषधिः। अपि वा दोषं वातपित्तादिकं धयति पिबति विनाशयतीति ओषधिः। हे तथाविधौषधे प्रतिवादिनः

---

[1] Ibid. सायणाचार्यः (सायणभाष्यसहिता अथर्ववेदसंहिता, भाग-1), 2:1.4.1.

[2] Ibid. 2:2.2.1

[3] Ibid. सायणाचार्यः (सायणभाष्यसंहिता अथर्ववेदसंहिता, भाग-1), 2:2.2.1.

[4] Ibid. 2:4.8.1 (2.25).

[5] Ibid. सायणाचार्यः (सायणभाष्यसंहिता अथर्ववेदसंहिता, भाग-1), 2:4.8.1.

[6] अथर्ववेदः, 5.1.4:2 (2.27).

अरसान् नीरसान् शुष्ककण्ठान् वक्तुम् असमर्थान् कृणु कुरु। यद्वा अरसान् रसरहितवाक्यान् असंगतप्रलापिनः कुरु इत्यर्थः।[1] इन्द्रः असुरान् जेतुं पाठाम् अभक्षयत्। कदाचित् इदमौषधम् बलवर्धकं स्यात्। आयुर्वेदे औषधप्रयोगः अनुसन्धेयो वर्तते। प्रतिवादिनं जेतुम् एतस्य उपयोगः सूक्ते कथितम्।

सक्तूदकम् – द्वितीयकाण्डस्य पञ्चमे अनुवाके तृतीयसूक्तस्य विनियोगे सायणाचार्यः कथयति। पार्थिवस्य इति सूक्तेन तृषार्तभैषज्यकर्मणि सूर्योदयकाले सूत्रोक्तप्रकारेण व्याधितम् उपवेश्य मथितं सक्तूदकम् अभिमन्त्र्य पाययेत्। अत्र सक्तूदकम् औषधं वर्णितम्[2]। अस्मिन् एव सूक्ते व्रीहियवशम्यादीनामोषधीनां प्रयोगः अपि सूचितः।

दृषद् – मही दृषत् क्रिमेर्विश्वस्य तर्हणी।[3] इति उक्तम्। दृषत् क्रीमिनाशकं (कीटनाशकम्) औषधम् वर्तते। सायणाचार्यः दृषदिति शब्दस्य शिलेति अर्थं करोति[4]। प्रो. विश्वनाथस्तु दृषत् इति शब्दस्य सूर्यरूपीशिलाम् इति अर्थं कुर्वन् सौरचिकित्सायाः वर्णनं करोति[5]। सूक्तेऽस्मिन् क्रीमेः प्रकाराणामपि वर्णनं वर्तते। यद्यपि दृषद् पादपस्तु नास्ति परन्तु आयुर्वेदग्रन्थेषु एतस्य औषधस्य अर्थः, प्रयोगः प्रकारश्च अनुसन्धेयो वर्तते। एवं द्वयोः काण्डयोः अनेकेषां रोगाणां तेषा रोगाणाम् विविधप्रकारेण उपचारस्य च वर्णनं दृश्यते। जलचिकित्सा, सौरचिकित्सा, पादपैः, रत्नैः, मन्त्रैश्च अनेके उपायाः सूचिताः सन्ति बीजरूपेण। एतस्य बीजस्य पल्लवनं विकसनं व्रटवृक्ष इव विस्तारः जीवकल्याणाय तस्य उपयोगश्च आयुर्वेदग्रन्थेषु दृश्यते। **नास्ति मूलम् अनौषधम्** इत्येतस्याः सूक्तेः आधारः अथर्ववेद एव भाति। ऋषयः पादपानाम् औषधरूपेण उपयोगं जानन्ति स्म लोककल्याणाय च उपयोगं कुर्वन्ति स्म। वर्तमानयुगे तु वयं पादपविज्ञानेन जीवरक्षणं पश्यन्तः स्मः। आयुर्वेददृष्ट्या चेत् अथर्ववेदस्य अध्ययनं भवेत् तर्हि अनेकेषां चिकित्सारहस्यानाम् उद्घाटनं स्यात्।

सहायकग्रन्थसूची

1. मिश्र, आचार्य जगदीशचन्द्र. (2009) वैदिकवाङ्मयस्येतिहासः, सुरभारती प्रकाशन वाराणसी.
2. कामेश्वरनाथमिश्रः. (2016) अर्थसंग्रहः, लौगाक्षिभास्करः, चौखम्बा सुरभारती ग्रन्थमाला - 44, वाराणसी.
3. गौडः पं.रामस्वरूपशर्मा. (2016) अथर्ववेदः, सायणाचार्यः, सायणभाष्यसंहिता अथर्ववेदसंहिता, भाग-1, चौखम्बा विद्याभवन वाराणसी.
4. विद्यालङ्कार प्रो. विश्वनाथ. (2006) अथर्ववेदभाष्यम्, काण्ड 1-3, रामलाल कपूर ट्रस्ट ग्राम रेवली, पो. शाहपुरतुर्क (सोनीपत, हरियाणा).

Author's Detail

Address: सहायकाचार्यः, संस्कृतविभागः केन्द्रीय विश्वविद्यालयः, धर्मशाला (हि.प्र.) एवं शोधच्छात्रा, संस्कृत पालि एवं प्राकृत विभागः हिमाचल प्रदेश केन्द्रीय विश्वविद्यालयः धौलाधार परिसर–1, धर्मशाला (हि.प्र.)

Email: mranjeetsharma56@gmail.com

[1] Ibid. सायणाचार्यः (सायणभाष्यसंहिता अथर्ववेदसंहिता, भाग-1), 5.1.4:2 (2.27).

[2] Ibid. .5:23.1 (2.29).

[3] Ibid. .2.55.1 (2.31).

[4] तत्रैव

[5] अथर्ववेद-भाष्यम्, (आध्यात्मिक व्याख्या) काण्ड 1-3, .2.55.1 (2.31).

ईशावास्योपनिषदि वैदिकजीवनपद्धतिः

डा. सुनेली देई

शोधसारः

मन्त्रब्राह्मणयोर्वेदनामधेयम्[1] इति वेदस्य लक्षणानुसारं मन्त्रब्राह्मणात्मकशब्दराशिः वेदः भवति। मन्त्रभागः संहितारूपेण ख्यातः। ब्राह्मणभागः ब्राह्मण–आरण्यक–उपनिषद्भेदेन त्रिधा विभज्यते। एवंरूपेण ऋग्यजुःसामाथर्वाख्यानां चतुर्णां वेदानां संहिताभागः ब्राह्मणभागः आरण्यकभागः उपनिषद्–भागश्च दृश्यन्ते। एतेषां ग्रन्थानामध्ययनेन वयं वैदिकार्याणाम् आदर्शजीवनपद्धतिविषये ज्ञातुं शक्नुमः।

शुक्लयजुर्वेदस्य चत्वारिंशदध्यायो भवति ईशावास्योपनिषद्। अस्यामुपनिषदि अष्टादश मन्त्राः सन्ति। यद्यपि उपनिषदियं परिमाणदृष्ट्या लघुः भवति, तथापि गुणात्मकमानदृष्ट्या अस्याः स्थानं दशप्रमुखासु उपनिषत्सु प्रथममस्ति। अस्मिन् शोधपत्रे वैदिकालस्य आदर्शमयजीवनपद्धतिः ईशावास्योपनिषदमाधारीकृत्य प्रतिपाद्यते।

सर्वासु उपनिषत्सु प्रारम्भे प्रयुक्तः शान्तिमन्त्ररिव ईशावास्योपनिषदि प्रारम्भे प्रयुक्तः शान्तिमन्त्रः सकलजीवस्य त्रिविधदुःखप्रशमनार्थं प्रयुज्यते। अस्यामुपनिषदि त्यागेन भोगकरणार्थमुपदिश्यते। अपि चेयमुपनिषद् शतवर्षकालं सत्कर्मभिः प्राप्तैः धनैः सुखशान्तिभिः सह जीवनधारणपूर्वकं परलोकार्थं यज्ञाननुष्ठीय मोक्षलाभार्थमात्मनः स्वरूपं ज्ञातुं प्रेरयति। वस्तुतः अत्र सदुपायैः उपार्जितस्य धनस्य भोगकरणार्थं गुरुत्वं प्रदीयते। ईशावास्योपनिषदि वर्णिताः त्यागस्योपादेयता, सत्कर्मणः सुफलता, विद्याविद्ययोः सम्भूत्यसम्भूत्योश्च प्रासङ्गिकता, सर्वभूतेषु मित्रता चेत्यादयः विषयाः आदर्शवैदिकजीवनपद्धतेः पूर्णपरिचयं प्रददति। संक्षेपेण संसारे मनुष्यः सत्कर्मणा इहलोके शतवर्षं यावत् सुखशान्तिलाभपूर्वकमवस्थापनं कृत्वा अविद्यया स्वर्गलाभपूर्वकं विद्यया मोक्षलाभञ्च कृत्वा जीवनं परिपूर्णं कर्त्तुमुपनिषदियं समुपदिशति।

कुञ्चीशब्दाः – ईशावास्योपनिषदि, वैदिकशान्तिमयी, वैदिकत्यागमयी, वैदिककर्ममयी, वैदिकात्मज्ञानमयी, वैदिकविश्वबन्धुत्वात्मिका, वैदिकमोक्षमयी, वैदिकसंस्कारात्मिका, जीवनपद्धतिः।

****

मन्त्रब्राह्मणयोर्वेदनामधेयम्[2] इति वेदस्य लक्षणानुसारं मन्त्रब्राह्मणात्मकशब्दराशिः वेदः भवति। मन्त्रभागः संहितारूपेण ख्यातः। ब्राह्मणभागः ब्राह्मण–आरण्यक–उपनिषद्भेदेन त्रिधा विभज्यते। एवंरूपेण ऋग्यजुःसामाथ–र्वाख्यानां चतुर्णां वेदानां संहिताभागः ब्राह्मणभागः आरण्यकभागः उपनिषद्भागश्च दृश्यन्ते। एतेषां ग्रन्थानामध्ययनेन वयं वैदिकार्याणां परोपकारात्मिकां स्वास्थ्यसंरक्षणात्मिकां रोगोपशमनात्मिकां विश्वबन्धुत्वात्मिकां सर्वदेवमयात्मिकां ब्रह्मचर्याश्रमीयां गृहस्थाश्रमीयां वानप्रस्थाश्रमीयां सन्न्यासाश्रमीयां त्यागमयीं शान्तिमयीं सत्कर्ममयीं साम्यवादमयीं यज्ञमयीं ओँकारमयीं सात्त्विकगुणमयीं मोक्षमयीं प्रकृतिपूजामयीं शिष्टाचारमयीं विश्वकल्याणकारिणीं आदर्शवैदिकजीवनपद्धतिं ज्ञातुं शक्नुमः।

उप–नि–पूर्वस्य षद्लृ (विशरणगत्यवसादनेषु)[3] धातोः क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति। सामीप्यवाचिना उप–उपसर्गेण प्रत्यगात्मनो ब्रह्मसामीप्यमुच्यते। सामीप्यञ्च तयोरभेदरूपं विवक्षितम्। निशब्दो निश्चयार्थकः।

---

[1] आपस्तम्बपरिभाषा, १:३३.

[2] तत्रैव

[3] धातुपाठः, पृ. ३६.

विशरणावसादन–गतयः धात्वर्थाः। क्विप्–प्रत्ययश्चात्र कर्त्तरि विवक्षितः। तथा च इयम् उपनिषद्–विद्या विदुषामनर्थं शिथिलीकरोति अवसादयति नाशयति वा। यद्वा उप सामीप्येन विषयतया नि नितरां ब्रह्मस्वरूपं परमश्रेयोऽस्यां विद्यायां स्थितमित्युपनिषत् ब्रह्मविद्या। या विद्या मनुष्यस्य अज्ञानं दूरीकृत्य ब्रह्मणः साक्षात्कारं कारयति, सैव विद्या उपनिषदिति। गत्यर्थे शिष्यः गुरोः समीपं गत्वा ब्रह्मविषयकज्ञानमाहरतीति। विशरणार्थे अज्ञानावरणं यया विशीर्यते, सा उपनिषदिति। अवसादनार्थे संसारबन्धनात् शिथिली करोति अवसादयति नाशयति वा या, सा उपनिषदिति।

वैदिकसाहित्ये उपनिषदः स्थानं वेदस्य अन्ते अस्ति, अतः सा वेदान्तः इत्युच्यते। उपनिषद् संसारस्य रहस्यमुद्घा–टयति, अतः सा गुप्तविद्याऽपि कथ्यते। तथा चोक्तं श्वेताश्वतरोपनिषदि– वेदान्ते परमं गुह्यम्।[1] उपनिषदः मुख्यप्रतिपाद्यविषयः ब्रह्मज्ञानत्वादियं ब्रह्मविद्याऽपि अभिधीयते। मुण्डकोपनिषदनुसारम् उपनिषदां प्रतिपाद्यविषयः वेदान्तविज्ञानम्। तथा हि–वेदान्तविज्ञानसुनिश्चितार्थाः।[2]

मुक्तिकोपनिषदि उपनिषदः संख्या अष्टोत्तरं शतम् (१०८) इत्युल्लिखितमस्ति।[3] संस्कृतवाङ्मय का बृहद् इतिहास इति ग्रन्थे उपनिषदः संख्या विंशत्युत्तरं शतं (२२०) इत्युल्लिख्यते।[4] एतासु उपनिषत्सु दश प्रमुखाः उपनिषदः सन्ति। तासां नामानि मुक्तिकोपनिषदि दृश्यन्ते। तथा हि–

ईश–केन–कठ–प्रश्न–मुण्ड–माण्डूक्य–तित्तिरिः।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा॥[5]

सर्वासु उपनिषत्सु विद्यमानः शान्तिमन्त्रः वैदिकार्याः शान्तिप्रियाः भवन्तीति सूचयति। दशप्रमुखासु उपनिषत्सु ईशावास्योपनिषद् सर्वश्रेष्ठा अस्ति। ईशावास्योपनिषद्–ग्रन्थस्याध्ययनेन वैदिकयुगस्य याः जीवनपद्धतयः परिलक्ष्यन्ते, ताः क्रमेण उपस्थाप्यन्ते——

ईशावास्योपनिषदि वैदिकशान्तिमयी जीवनपद्धतिः – सर्वासु उपनिषत्सु विद्यमानः शान्तिमन्त्रः वैदिकार्याः शान्तिप्रियाः भवन्तीति सूचयति। ईशावास्योपनिषद्यपि त्रिविधदुःखस्य प्रशमनार्थं प्रारम्भे शान्तिमन्त्रः दृश्यते। तथा हि–

ओं पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ ओं शान्तिः शान्तिः शान्तिः।

अर्थात्, कारणात्मकं ब्रह्म पूर्णं भवति, कार्यात्मकं ब्रह्म अपि पूर्णं भवति। सृष्टिसमये कारणात्मकब्रह्मणः कार्यब्रह्म उत्पद्यते। प्रलयसमये तत् कार्यब्रह्म पुनः कारणात्मकब्रह्मणि निलीयते। फलतः ब्रह्म एव अवशिष्यते। शान्तिमन्त्रेऽस्मिन् सूच्यते यत् मनुष्यसमेताः सर्वे जीवाः तस्य परंब्रह्मणः अंशविशेषाः भवन्ति। जीवशरीरे विद्यमानः

---

[1] श्वेताश्वतरोपनिषद्, ६:२२.

[2] मुण्डकोपनिषद्, ३:२.६.

[3] मुक्तिकोपनिषद्, १:४४.

[4] संस्कृत-वाङ्मय का बृहद् इतिहास, पृ. ४६२.

[5] मुक्तिकोपनिषद् १:३०.

जीवात्मा परंब्रह्मणः अंशविशेषत्वात् अक्षयः भवति, परन्तु जीवस्य शरीरं क्षयशीलं भवति।[1] अतः मन्त्रोऽयं परोक्षभावेन एतदुपदिशति यत् संसारेऽस्मिन् कोऽपि मनुष्यः अमरः न भवति। अपि च संसारोऽयं आधिभौतिक–आधिदैविक–आध्यात्मिकभेदैः त्रिविधदुःखैः परिपूर्णः। एतेषां त्रिविधदुःखानां प्रशमनार्थं त्रिवारं शान्तिपाठः क्रियतेऽत्र। अस्याम् ईशावास्योपनिषदि तथा सर्वासु उपनिषत्सु प्रयुक्तैः त्रिवारं शान्तिपाठैः सर्वेषां मनुष्याणां सुखशान्तिकामना वैदिकार्याणां सुखशान्तिमयजीवनपद्धतेः पूर्णपरिचयं प्रददाति।

ईशावास्योपनिषदि वैदिकत्यागमयी जीवनपद्धतिः – वैदिकार्याणां त्यागपूतजीवनपद्धतिः वस्तुतः प्रशंसनीया। निम्नोक्तमन्त्रोऽयमस्य ज्वलन्तः दृष्टान्तः। तथा हि —

ओं ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥[2]

अस्मिन् संसारे यत्किञ्चित् दृश्यते, तत्सर्वं परंब्रह्मणा सृष्टत्वात्परंब्रह्माधीनं वर्त्तते। परंब्रह्म यस्मै यतपरिमितं धनं ददाति, सः तत्परिमितं धनं भुञ्जीत। परंब्रह्मणा प्रदत्तम् अन्यस्य कस्यचिद्धनं प्रति लोभः न करणीयः। अपि तु स्वसमीपे यत् धनमस्ति, तद्धनस्योपर्यपि परंब्रह्मणः आधिपत्यं वर्त्तते। अतः स्वधनं मत्वा गर्वः न करणीयः। तस्य धनस्य त्यागेन भोगः करणीयः। अर्थात्, पद्मपत्रे अम्बु यथा वर्त्तते, तथैव संसारे मनुष्यः सांसारिकविषयवस्तु अनासक्तः सन् भुञ्जीत। प्रायशः मनुष्येण आसक्तिवशतः नानाप्रकारकमनिष्टकरकार्यकरणस्य दृष्टान्तः दृश्यते। किमपि वस्तु प्रति यदि तस्य लोभः न स्यात्, तर्हि सः यत्किमपि वस्तु त्यक्तुं कुण्ठितः न भवेत्। अतः त्यागेन भोगकरणेन लोभरहितः मनुष्यः आसन्नविपदः उद्धरिष्यति। यदुच्यते– लोभः पापस्य कारणम्।

ईशावास्योपनिषदि वैदिककर्ममयी जीवनपद्धतिः – वैदिकयुगस्य कर्मप्रधानां जीवनशैलीं सूचयित्वा मन्त्रोऽयं कथयति –

कुर्वन्नेवेह कर्माणि जिजाविषेच्छतं समाः।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥[3]

अर्थात्, अस्मिन् परिदृश्यमाने संसारे अनेन प्रकारेण अग्निहोत्रादीनि सत्कर्माणि संपादयन् मनुष्यः शतं वर्षं जीवितुमिच्छेत्। कर्मानुष्ठानातिरिक्तं मनुष्यस्य काऽपि अपरा गतिः नास्ति। यतो हि कर्मभूमिरियं वसुन्धरा। एवं कृते सति मनुष्यः कर्मणा न बध्यते। यथासमयं यथाकर्म करणेन मनुष्यः कर्मभारेण भाराक्रान्तः न भविष्यतीत्यर्थः।

ईशावास्योपनिषदि वैदिकात्मज्ञानमयी जीवनपद्धतिः – सर्वासामुपनिषदां मुख्यप्रतिपाद्यविषयः भवति आत्मनः स्वरूपमुद्घाटनम्। ईशावास्योपनिषद्यपि आत्मविषये सम्यक्तया उक्तमस्ति। अयमात्मा अचलः, एकः, मनसोऽपि तीव्रगतियुक्तः, इन्द्रियागोचरश्च भवति।[4] अयमात्मा स्थूलशरीररहितः, अक्षतः, स्नायुरहितः, शुद्धः, पापरहितः,

---

[1] श्रीमद्भगवद्गीता, १५:७.

[2] ईशावास्योपनिषद्, १.

[3] तत्रैव, २

[4] तत्रैव ४

क्रान्तदर्शी, सर्वज्ञः, परिभूः, स्वयम्भूः शाश्वतश्चास्ति।[1] एषः आत्मा परमात्मत्वेन स्थिरः भवति, परन्तु जीवात्मात्वेन गतिशीलः भवति। आत्मा एकस्मात् शरीरात् अन्येकस्मिन् शरीरे प्रवेशकारणात् गतिशीलः भवति। शरीरे आत्मनः अवस्थानात् जीवः क्रियाशीलः भवति, सर्वं कर्म कर्त्तुं समर्थो भवति। पुनश्च अयमात्मा प्राणवायुरूपेण जीवशरीरमाश्रित्य कर्मणां विभागीकरणं करोति। अयमात्मा त्रिगुणात्मकेन जीवात्मारूपेण अस्मादृशानां जीवानां शरीरमाश्रित्य विद्यमानत्वादस्माकमन्तिके शरीरमध्ये तिष्ठति। अपि च अयमात्मा निर्गुणात्मकेन परमात्मारूपेण संसारात् बहिरपि वर्त्तते। तथा चोक्तमत्र—

तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥[2]

अज्ञानान्धकारेण आवृताः मूढजनाः एवम्भूतस्य आत्मनः स्वरूपम् अज्ञात्वा आत्मानं नित्यं हिंसन्ति। एतादृशाः आत्महनः जनाः मरणादनन्तरम् असूर्या नाम तान् अन्धकारमयलोकान् प्रतिगच्छन्ति।[3] अतः मरणादनन्तरम् आत्मघाती सन् अन्धकारमयलोकं न गच्छेत्, तदर्थं वैदिकार्यऋषिः सत्यस्वरूपस्य ब्रह्मणः दर्शनार्थं पूषन्देवं प्रार्थयते।[4] **ब्रह्मविद्ब्रह्मैव भवति**[5] इति श्रुतिवचनात् ज्ञायते यत् यः आत्मनः स्वरूपं ज्ञातवान्, सः स्वयं आत्मस्वरूपमभवत्। अतः उपर्युक्ते मन्त्रे वैदिकार्यऋषिः अन्तःकाले आत्मनः स्वरूपज्ञानपूर्वकम् आत्मनः साक्षात्कारं कृत्वा आत्मनि लीनं भवितुं पूषणं देवं प्रार्थयते। अस्याः उपनिषदः शान्तिमन्त्रेऽपि तथा कथ्यते यत् सृष्टिकाले परमात्मनः अंशः जीवात्मा जीवशरीरमाश्रयति, विनाशकाले (मृत्युकाले) जीवात्मा जीवस्य स्थूलशरीरात् निर्गत्य परमात्मनि लीयते।

ईशावास्योपनिषदि वैदिकविश्वबन्धुत्वात्मिका जीवनपद्धतिः – विश्वबन्धुत्वस्य वार्त्तां प्रददाति इयम् ईशावास्योपनिषद्। तथा हि –

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥[6]

अर्थात्, यः सर्वेषु प्राणिषु स्वकीयम् आत्मानं पश्यति, अपि च स्वस्य आत्मनि सर्वभूतं पश्यति, सः न कस्मादपि विजुगुप्सते।

यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वनुपश्यतः॥[7]

---

[1] तत्रैव ८

[2] ईशावास्योपनिषद्, ५

[3] तत्रैव ३

[4] तत्रैव १५

[5] मुण्डकोपनिषद्, ३:२.९

[6] ईशावास्योपनिषद्, ६.

[7] तत्रैव ७.

यस्मिन् समये मनुष्यस्य एतद्ज्ञानमभवत् यत् सर्वे प्राणिनः परमात्मनः अंशाः भवन्ति, तस्मिन् समये तस्य अयं निजः अयं परो वेति भेदभावः तिरोहितो भवति। परमात्मनः अंशत्वात् सः सर्वत्र समभावं पश्यति। तस्य सर्वे स्वात्मीयाः इति उपलब्धिः भवति। एवंरूपेण आत्मानुशीलनं कुर्वन्तः जनाः न कस्मै क्रुध्यन्ति, न द्रुह्यन्ति, नापि असूयन्ति। अस्मिन् संसारे वासं कुर्वन्तः सर्वे जनाः अनित्याः। अतः कस्मिन् अनुरागवशतः मोहभावः न पोषणीयः, न च कस्यचित् आत्मीयस्वजनस्य वियोगेन शोकभावः करणीयः। अत एव यः आत्मनः स्वरूपं ज्ञात्वा स्वस्य स्थितिविषये अवगतः भविष्यति, सः कदापि केनापि सह हिंसा–ईर्ष्या–द्वेष–घृणा–निन्दा–कलहादीन् न करिष्यति।

ईशावास्योपनिषदि वैदिकमोक्षमयी जीवनपद्धतिः – वेदस्य संहिताभागः ब्रह्मचारिणां कृते उपयोगी, ब्राह्मणभागः गृहस्थानां कृते उपयोगी, आरण्यकभागः वानप्रस्थिनां कृते उपयोगी, उपनिषद्भागः संन्यासिनां कृते उपयोगी च। उपनिषदः ब्रह्मबोधिकाः मोक्षसाधनस्वरूपाश्च सन्ति। ईशावास्योपनिषदि आत्मज्ञानेन सह विद्या–अविद्याज्ञानेन सम्भूति–असम्भूतिज्ञानेन च मोक्षप्राप्तिः भविष्यतीति वर्ण्यते। आत्मनः स्वरूपविषये पूर्वमेव उक्तम्।

विद्या–अविद्ययोः उभययोः फलं भिन्नं भिन्नं भवति। विद्यायाः फलं भवति मोक्षलाभः, अविद्यायाः फलं भवति स्वर्गलाभः। यः जनः विद्याऽविद्ये उभये जानाति, सः अविद्यया मृत्युमतिक्रम्य विद्यया अमृतत्वं लभते। अतः विद्या–अविद्ययोः उभययोः उपासना करणीया। तस्मात् ऐहिकसंसारदुःखात् मुक्तिं प्राप्तुमिच्छता पारलौकिकसुखं कामयित्रा मोक्षलाभेच्छुकजनेन उभयोः विद्याऽविद्ययोः उपासना करणीया। तथा हि–

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥[1]

असम्भूति–सम्भूत्योः विषयेऽत्र वर्ण्यते यत् ये जनाः केवलम् अदर्शनात्मिकामव्याकृताख्यां कारणब्रह्माख्याम् अव्यक्ताम् असम्भूतिम् उपासन्ते, ते प्रगाढान्धकारमध्ये प्रविशन्ति। ये जनाः केवलं व्याकृताख्यां व्यक्तां हिरण्यगर्भाख्यां कार्यब्रह्मभूतां सम्भूतिमुपासन्ते, ते ततोऽपि प्रगाढान्धकारमध्ये प्रविशन्ति। असम्भूत्याख्यकार्यब्रह्मणः उपासनायाः फलं भवति अणिमादि–ऐश्वर्यलाभः, सम्भूत्याख्य – कारणब्रह्मणः उपासनायाः फलं भवति ब्रह्मसाक्षात्काररूपः मोक्षलाभः। अतः ये जनाः उभयोः सम्भूति– असम्भूत्योः उपासनां कुर्वन्ति, ते असम्भूत्या अनैश्वर्यम्–अधर्मकामादिदोषजातं मृत्युमतिक्रम्य सम्भूत्या (अव्याकृतोपासनया) अमृतं (प्रकृतिलयभूतं मोक्षं) प्राप्नोति। तथा चोक्तम् —

सम्भूतिं च विनाशं च यस्तद्वेदोभयं सह।

ईशावास्योपनिषदि वैदिकसंस्कारात्मिका जीवनपद्धतिः – ईशावास्योपनिषदः अन्तिमे मन्त्रचतुष्टये मरणोन्मुखस्य कर्मनिष्ठोपासकस्य प्रार्थना दृश्यते। अन्तकाले आत्मप्राप्त्यर्थं मरणोन्मुखः जनः आदित्यमण्डलस्थस्य सत्यस्वरूपस्य ब्रह्मणः साक्षात्कारं कर्त्तुमिच्छति। अतोऽत्र वेदान्तकारः पूषणं देवं स्तुतिपूर्वकं कथयति—

---

[1] ईशावास्योपनिषद् ११

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥[1]

अर्थात्, सुवर्णमयपात्रेण आदित्यमण्डलस्थस्य ब्रह्मणः मुखम् आच्छादितमस्ति। तस्मात् हे पूषन्! त्वं सत्यस्वरूपस्य ब्रह्मणः साक्षात्काराभिलाषिणां सत्यधर्माणाम् अस्माकं कृते तदावरणरूपं पात्रमुद्घाटय, येन वयं सत्यात्मनः उपलब्धिं कुर्याम। अपि च – **पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन् समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि। योऽसावसौ पुरुषः सोऽहमस्मि।**[2] अर्थात्, जगतः पोषणात् हे पूषन्! एक एव समग्रजगतः रक्षणात् गमनात् हे एकर्षे! सर्वेषां प्राणिनां संयमनाद् हे यम! रश्मीनां प्राणानां सीकरणात् हे सूर्य हे प्रजापतेः नन्दन प्राजापत्य! त्वं स्वान् तापकान् रश्मीन् अपहाय स्वकल्याणमयरूपं मां प्रदर्शय। येन अहं कल्याणमयरूपं द्रष्टुं पारयामि। पुनश्चात्र शेषसमये मरणोन्मुखोपासकः अतीतस्य कृतकर्मणः स्मरणार्थमुपदिश्यते –

वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।

क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर॥[3]

अर्थात्, अथेदानीं मम मरिष्यत् स्थूलशरीरं सर्वात्मकं वायुरूपं सूत्रात्मनं प्राप्नोतु। हे सङ्कल्पात्मकमनः! सम्प्रति त्वम् अतीतस्य कृतकार्यं (शुभमशुभं वा, पुण्यं पापं वा) सम्यक्तया स्मर। यदि त्वया उत्तमकर्म कृतम्, तर्हि तव अयमात्मा भस्मान्तशरीरस्य परित्यागसमये अनुशोचनां न करिष्यति। अन्यथा शरीरात् आत्मप्रस्थानकाले समीचीनकर्म–अकरणात् दुःखमनुभविष्यति। अतः अन्ते वेदान्तकारः कामयते—

अग्ने नय सुपथा राये अस्मान् विश्वानि देववयुनानि विद्वान्।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥[4]

अर्थात्, हे अग्निदेव! अस्मान् सन्मार्गेण नय। धनाय कर्मफलभोगाय अस्मभ्यं यथोक्तकर्मफलविशिष्टानि सर्वाणि प्रज्ञानानि प्रदेहि। हे देव! त्वं सर्वेषां ज्ञानानां कर्मणाञ्च ज्ञाता असि। तस्मात् त्वम् अस्माकं मोक्षमार्गस्य प्रतिबन्धकानि यानि पापानि, तानि पापानि विनाशय। ततःपरं हि वयं पापमुक्ताः विशुद्धाः सन्तः अभीष्टं प्राप्स्यामः। तदर्थं वयं भूयोभूयः भक्तियुक्तां प्रणतिं तुभ्यम् ज्ञापयामः। वैदिकार्यऋषिभिः अग्निदेवमुद्दिश्य एतादृशी प्रार्थना वैदिकार्याणां सत्कर्माभिमुखितां तथा सत्कर्मफला–भिलाषितां सुष्ठु प्रमाणयति। यः जनः आजीवनं उत्तमकर्म कुर्यात्, यः जनः निष्ठया स्वकर्त्तव्यं सम्पन्नं कुर्यात्, सः अन्तःकाले स्वस्य अतीत–कालस्य सुकर्म स्मृत्वा आनन्देन मृत्युवरणं करिष्यति। अपि च अन्तःकाले मुमुक्षुः जनेन परमात्मनि स्वमनोनिवेशः करणीयः।

---

[1] तत्रैव १५

[2] तत्रैव १६

[3] तत्रैव १७

[4] ईशावास्योपनिषद्, १८.

उपसंहारः – वैदिकजीवनपद्धतिः सर्वोत्कृष्टा साम्प्रतिकजीवनपद्धतेः मार्गदर्शिकार्हा च भवति। सर्वासु दिक्षु इयं वैदिकजीवनपद्धतिः सर्वोत्तमा अनुकरणीया च। इयं वैदिकजीवनपद्धतिः महनीयायाः विश्ववन्दनीयायाः भारतीयसंस्कृतेः आधारभूता। वैदिका–र्याणां शान्तिमयी त्यागपूतजीवनपद्धतिः वस्तुतः प्रशंसनीया। अस्यामुपनिषदि प्रतिपादितेयं वैदिकजीवनपद्धतिः शतवर्षकालं सत्कर्मभिः प्राप्तैः धनैः सुखशान्तिभिः सह जीवनधारणपूर्वकं परलोकार्थं यज्ञाननुष्ठ्य मोक्षलाभार्थमात्मनः स्वरूपं ज्ञातुं प्रेरयति। वस्तुतः वैदिकार्याः सदुपायैः उपार्जितं धनं भोक्तुमिष्टवन्तः। कर्मभूमिरियं वसुन्धरा, न तु भोगभूमिः इति इमां वार्त्तां वैदिकजीवनपद्धतिरेव ददाति। इयं कल्याणकारिणी वैदिकजीवनपद्धतिः एकस्मिन् सुस्थ–सुन्दर–श्रृङ्खलितसमाजगठने पूर्णतः समर्था भवति। ईदृशी जीवनपद्धतिः साम्प्रतिकसमाजे प्रायशः दुर्लभा। अस्यामुपनिषदि प्रतिपादिताः त्यागस्योपादेयता, सत्कर्मणः सुफलता, विद्याविद्ययोः सम्भूत्यसम्भूत्योश्च प्रासङ्गिकता, सर्वभूतेषु मित्रता चेत्यादयः विषयाः आदर्शवैदिक–जीवनपद्धतेः पूर्णपरिचयं प्रददति। संक्षेपेण मनुष्येण सत्कर्मणा इहलोके शतवर्षं यावत् सुखशान्तिलाभपूर्वकमवस्थापन–पूर्वकम् अविद्यया स्वर्गलाभकरणाय विद्यया च मोक्षलाभाय उपनिषदियं समुपदिशति।

विश्वकल्याणकारिण्याः वैदिकजीवनपद्धतेरनुसरणेन हि विश्वशान्तिः प्रतिष्ठिता भवेत्। तदर्थं स्वामिना दयानन्दसरस्वतीमहाभागेन सुष्ठूक्तम– वेदं प्रत्यावर्त्तय प्रत्यागच्छत वा। अत एव एतद् वक्तुं शक्यते यत् इयं महनीया वैदिकजीवनपद्धतिः अस्ति साम्प्रतिकभारतीयजीवनपद्धतिः विश्ववासिनां जीवनपद्धतिं परिचालयितुं सम्यग् मार्गदर्शनं करिष्यत्येव।

सहायकग्रन्थसूची

1. मिश्रः जगदीशचन्द्रः. (Ed.). (1998). वैदिकसाहित्यस्येतिहासः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी।
2. अग्रवालः मदनमोहनः. (Ed.). (2010). श्रीमद्भगवद्गीता, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली।
3. तिवारी शशी. (Ed.). (1986). ईशावास्योपनिषद्, भारतीयविद्याप्रकाशनम्, दिल्ली।
4. चतुर्वेदी शारदा. (Ed.). (1999). ऋग्वेदभाष्यभूमिका, कृष्णदास अकादमी, वाराणसी।
5. शर्मा राममूर्त्तिः. (Ed.). (2007). वेदान्तसारः, चौखम्बा पब्लिशर्स, वाराणसी।

Author's Detail

Address: Assistant Professor
School of Sanskrit
Gangadhar Meher University
Amruta Vihar, Sambalpur–768004

Email: drsunelidei@gmail.com

****

ऋग्वेदे मानवीयमूल्यानि

लक्ष्मण माझी

शोधसारः

मानवः इतरजीवेभ्यः तस्य धीशक्त्या: जीवश्रेष्ठ इति पदवीं भजते। जीवश्रेष्ठत्वेन परिगणितैः मानवैः अवश्यमेव मानवोचितमूल्यानां संरक्षण कर्तव्यम्। मानवोचिततत्वेषु नीति–आदर्श–लक्ष्यं चेत्यादिनि प्रमुखानि। एतेषां सम्यग् अनुकरणेन मानवमनसि बहुकल्याणभावना सर्वकल्याणभावना वा उदेति। यस्मात् दया–धर्म–धैर्य–मैत्री–करुणा–सत्यमहिंसास्तेयादीनि उदात्तभावनानि सञ्जायते। एते मानवीयगुणाः एतान्येव मानवीयमूल्यानीत्यपि प्रोक्तानि। भारतीयपरम्परायां मानवजीवनस्य मुख्यानि चत्वारि मूल्यानि वर्तन्ते। तानि धर्मार्थकाममोक्षाख्यानि। अत्र शोधप्रबन्धेषु ऋग्वेदे वर्णितः मानवीयमूल्यानां चर्चा संलक्ष्यते।

कूटशब्दाः – भारतीयसंस्कृतिः, आत्मबलस्य, राष्ट्रहितचिन्तनं, ऋग्वेदः, सत्कर्म, सन्मार्गः, शुभचिन्तनं, प्रगमनं, सत्सङ्गं, प्रसन्नचित्तम्, समत्वभावः, सत्यसङ्कल्पः, श्रद्धा, अहिंसा, मधुरवचनं, सुमतिभावः।

****

विश्वसाहित्यस्य प्राचीनतमग्रन्थो वेदः। मानवसंस्कृतेः प्राचीनतमसभ्यतायाःअवबोधनार्थम् ऋग्वेदस्य परिशीलनमत्यावश्यकं वर्तते। मानवजातेः इतिहासः भारतीयसंस्कृतिश्च इहैव प्रतिष्ठिता विद्यते। अस्माकं धर्म–संस्कृति–आचार–व्यवहारादीनां दर्पणतुल्यमस्ति वेदशास्त्रम्। न केवलं भारतवर्षस्य अपितु समग्रविश्वस्य सर्वमनीषिणां कृते ज्ञानस्त्रोतोऽस्ति ऋग्वेदः। भारतीयसंस्कृतौ ऋग्वेदस्य स्थानं सर्वोपरि वर्त्तते। मातृभूमेः सेवा करणीया इति ऋग्वेदे प्रथमतः उद्घोषितः। सामाजिकदृष्ट्या ऋग्वेदस्य महत्त्वमत्यधिकम्। प्रत्येकं जनः समाजस्याङ्गो विद्यते। सामाजिकमैत्रीभाव एव मानवता इति वक्तुं शक्यते। अतः समाजस्य ऐक्यभावस्य मैत्रीभावस्य रक्षणाय वैदिकर्षयः तत्पराः दृश्यन्ते। वेदसंहितासु सर्वप्रथमा एषा ऋग्वेदस्य संहिता निखिलविश्वसाहित्ये सुप्राचीनतमा च। भारतीयधर्मसंस्कृत्योः अस्याः महत्त्वपूर्णं स्थानं संलक्ष्यते। भारतीयदर्शनक्षेत्रेऽपि अस्य महिमा सर्वैः दार्शनिकैः स्वाभिमतैः मुक्तकण्ठेनाङ्गीक्रियते। सर्वैः स्वमतपुष्ट्यर्थम् ऋग्वेदस्य ऋचः प्रदर्श्यन्ते। तस्मात् वेदशास्त्रमिदमस्ति जीवनदर्शनम्। वस्तुतः वेदोऽयं सर्वज्ञानानाम् आकरः। येन यस्योद्देश्येन वेदस्यानुशीलनं क्रियते तेन तत्रावश्यमेव तत् संप्राप्यते। ईदृशं किमपि नास्ति यद्वेदे न विद्यते। मानवकल्याणाय एव वेदानां सृष्टिः। मानवेषु यावत् पर्यन्तं लोकहितभावना नोत्पद्यते तावत् मानवीयतापि नोदयति। मानवता नोदयति चेत् हिंसा–द्वेषादिभिः ग्रस्ता भविष्यति इयं धरित्री–फलत्वेन धरित्री निवासायोग्या भूत्वा सर्वत्र विश्रृंखलैव दरीदृश्यते। वस्तुतः वैदिकसंस्कृतिः मानवता-गुणसम्पन्नत्वात्तत्र प्रतिपादितानि मानवीयमूल्यानि सदैव ग्राह्यानि इति प्रतिभाति। विश्वस्य सुप्राचीनतमग्रन्थे ऋग्वेदे राष्ट्रहितचिन्तनं विश्वबन्धुत्वभावना स्वकर्तव्यपालनं सर्वजीवकल्याणभावना चेत्यादयः व्यापकरीत्या यथा चित्रिताः तथैवात्र प्रस्तौतुं प्रयतते।

मानसिकी पवित्रता - यः कोऽपि स्वान्तर्निहितान् दुर्गुणान् मोचयितुम् इच्छति चेत् सदैव मनसः शुचिः रक्षितव्या। ऋक्संहितायां दुर्भावना 'वृत्र' इत्यनेनाभिधीयते। इन्द्रेण स्वात्मबलेन वृत्रः हन्यते – **'भद्रं मनः कृणुष्व**

वृत्रतूर्ये[1] इति। मन्त्रस्याभिप्रायो वर्तते – वृत्ररूपदुर्गुणाः तदैव नश्यन्ति यदा मन: पवित्रं स्यात् तथा तत्रात्मविश्वासं च जागृयात्। यावत् मनसः पवित्रता न जायते तावत् दुर्गुणा अपि न विनश्यन्ति। मनसः पवित्रतैव इच्छाशक्तिः, सा आत्मबलरूपेण परिवर्तनं भविष्यति।

आत्मबलम् - ऋक्संहितायाम् आत्मबलस्य बहुमहत्त्वं प्रतिपादितम्। यस्मिन् हृदि आत्मबलं विद्यते तेन कठिनतमं कार्यमपि सारल्येन सम्पादयितुं शक्यते। आत्मशक्तिसम्पन्नेषु मानवेषु अदम्यं साहस: परिलक्ष्यते। तैः आत्मशक्त्या दुर्जेयविघ्नान्यपि सरलतया अतिक्रम्यन्ते। तस्मात् ऋक्संहितायां प्रोक्तं यत् यस्मिन् आत्मबलं दृश्यते, तस्य दृढतां गिरि अपि नैव वारयति। तेन गिरयोऽपि अतिक्रम्यन्ते – '**न पर्वतासो यदहं मनस्ये**' इति ऋक्।

शुभचिन्तनम् - शुभचिन्तनं शुभकर्मणः कारकम्। तस्मात् ऋक्मन्त्रे भणितं यत् चतुर्दिग्भ्यः शुभचिन्तनमेव समीपे समागच्छेदिति – **आ नो भद्राः क्रतवो यन्तु विश्वतः**[2] इति। पुनरपि भणितं यदस्माभिः सदा सत् द्रष्टव्यं सत् श्रोतव्यम् च – **भद्रं कर्णेभिः शृणयाम देवाःभद्रं पश्येमाक्षभिर्यजत्राः**[3] इति। प्रत्येकस्य मानवस्य कर्तव्यविषये वेदे प्रतिध्वनितं यत् अशुभकथनं न श्रोतव्यं न द्रष्टव्यमिति च। यतो हि शुभचिन्तनमेव हृदयस्पर्शरूपम् अतिशयप्रियस्वरूपं च भवति – **क्रतुं न भद्रं हृदि स्पृशम्**[4] इति।

सत्कर्म: - ऋक्संहितायां सुष्ठु प्रदर्शितं यत् सत्कर्मणा हृदयस्य शुद्धिर्जायते। येन सत्कार्यं सम्पाद्यते, तस्य हृदयं स्वयमेव पूतं भविष्यति। अतः सदैव सत्कर्मणि प्रवृत्तिः स्यादिति ऋक्मतम् – **स मृज्यते सुकर्मभिः**।[5] सत्कर्मणः फलम् भवति शुभम्। अत्रैवोल्लेखितुं शक्यं यत् सरलस्वभावयुक्तेभ्य: जनेभ्य एव सदा कल्याणं संभवति, तैरेव स्वजनैः सह आह्लादपूर्वकं जीव्यते – '**अवृकेभिः स्वस्ति..., मदेम शतहिमाः सुवीराः**'[6] इति ऋक्। कथनस्याभिप्रायो वर्तते यत् शुभकर्माणि सततं मानवस्य शुद्धिं जनयन्ति। यदा चरित्रशुद्धिर्जायते तदा आत्मबलमपि वर्धते।

सन्मार्गस्यावलम्बनम् - ऋग्वेदे बहुधा शब्दायते यदस्माभि: सदैव सुमार्गस्यान्वेषणं कर्तव्यमिति – **ऋतस्य नः पथा नय**।[7] सन्मार्ग एव देवमार्गत्वेनाप्यभिधीयते। देवैः विद्वद्भिः वा अनेन मार्गेणैव पद्यते – **आ देवानामपि पन्थामगन्म**[8] इति। सन्मार्गस्याभिप्रायो भवति – सुमार्गः जीवनोद्धारमार्गश्च। सन्मार्गेणैव ज्ञानं वैभवं श्रीवृद्धिश्च जायते। सन्मार्गसेविना असन्मार्ग: नानुस्रियते। तस्मात् सर्वान् मानवान् सन्मार्गेणैव जीवनयापनार्थमुपदिशति वेदः।

---

[1] ऋग्वेदः २:२३.२

[2] Ibid १:८९.१

[3] Ibid १:८९.८

[4] Ibid ४:१०.१

[5] Ibid ९:९९.७

[6] Ibid ६:४.८

[7] ऋग्वेदः १०:१३३.६

[8] Ibid १०:२.३

प्रगमनम् (Progress) - मानवाः जीवने प्रगमनं कांक्षन्ति। तत्कृते आवश्यकता वर्तते स्थिरतायाः धैर्यस्य वा। पुनश्च इह आत्मबलस्यापि भूमिका अनस्वीकरणीया। एवं धैर्यशीलो हि स्वलक्ष्यमधिगच्छति नर इति प्रगमनविधायकं वेदवचनमिह समुपलभ्यते – **स्थिरो भव..., आशुर्भव..., पृथुर्भव..., सुषदस्त्वमग्नेः पुरीषवाहणः**,[1] इति।

सत्सङ्गः - दृष्टान्तप्रयोगेन ऋक्संहितायां निगदितं यत् संसारोऽयं शिलापूर्णा नदी इव। तत्र स एव जन: तरणाय समर्थो भवति यः कुसङ्गेभ्यः दूरीभूय अहर्निशं सुकर्मभि: सह सङ्गतिं करोति

अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः।

अत्रा जहाम ये असन्नशेवा: शिवान्वयमुत्तरेमाभि वाजान॥[2] इति।

सज्जनस्य संस्पर्शेण सर्वमशुभं विनश्यति। कुसङ्गेन तु जीवनं सङ्कटमयमेव भविष्यति। अतः सर्वथा सत्सङ्गं विज्ञाय तदेवाचरणीयमिति वेदरीतिः।

प्रसन्नता - प्रसन्नचित्तयुक्तो जनः सुखदुःखादिव्याधिभिः न बाध्यते। सः सर्वपरिस्थितौ प्रसन्नचेतसा वर्तितुं शक्नोति। प्रसन्नचेतो न कदापि खिन्नो भवति। विपद्यपि तेन हास्यमुखेनधैर्येण च कार्यं सम्पाद्यते। तत्कृते समग्रसंसारः सुखमय एवेति प्रतिभाति। तदर्थं वेदरीति एषा अस्माभिः स्वीकरणीया यत्सर्वदा प्रसन्नचेतसा एव जीवनं व्यतीतव्यं **विश्वाहा वयं सुमनस्यमानाः**[3] इति। ऋक्संहितायां प्रसन्नचित्तस्य कृते 'सुमनस्' शब्दस्य प्रयोगो दृश्यते। अस्यार्थो हि मनसः आनन्दानुभूतरूपकार्यम्।

समत्वभावः - समत्वभावः शान्तेरानन्दस्य च उत्सो वर्तते। कल्याणमधिगन्तुं वैषम्यदृष्टिः परित्यक्तव्या। यतो हि वैषम्यता साम्यतायाः परिपन्थी। तस्माद्विषतुल्यविषमताभावं परित्यज्य अमृतोपमं समताभावं धारयितुम् ऋग्वेदे समुद्घोषितम्। पुनश्चोक्तं जगति सर्वे मानवाः परस्परं भ्रातरः सन्ति, तेषु न कोऽपि जन्मना महान् न वा अवरो। साम्यभावोऽयं धारयन्तः सर्वेऽपि स्वाभिष्टसिद्ध्यर्थं प्रयतन्ते – **अज्येष्ठासो अकनिष्ठास एते संभ्रातरो वावृधुः सौभगाय**[4] इति। तथैव निगदितं यत्सर्वे मानवा: परस्परं समाना एव सन्ति, न तेषु कोऽपि ज्येष्ठः कनिष्ठो वा वर्तते, न कश्चन मध्यमोऽपि। सर्वे स्वशक्त्यानुसारमग्रे संगच्छन्ति। एते महत्त्वाकांक्षाबलेन स्वकार्यं निर्वहन्ति। एते समानजन्मान: दिव्याश्च सन्ति– **ते अज्येष्ठासो अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः।**

सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन॥[5] इति

[1] शुक्ल. यजु. ११:४४

[2] ऋग्वेदः १०:५३.८

[3] Ibid ६:७५.८

[4] Ibid ५:६०.६

[5] ऋग्वेदः ५:५९.६

समत्वभावोद्घाटनावसरे ऋक्संहितायां निर्दिष्टं यत्सर्वेषामपि मनुष्याणां समान एवाधिकारो भवति – **समानो अध्वा प्रवता मनुष्यदे**।[1]

सत्यकथनम् - मानवहृदये पूतभावः तदैव आयाति यदा सः सत्यान्वेषी सत्यप्रतिज्ञश्च भवति। सत्यसङ्कल्पयुक्तो जन: न केवलं स्वात्मानं पवित्रं करोति, अपि च तस्य सम्पर्कयुक्तान् सर्वान्नपि पुनाति। स सदैव सत्यं धृत्वा ह्यग्रे सरति तथा तस्य जीवनमपि शुद्धं पूतं च भविष्यतीतिऋक्मतम् – **ऋतेन सत्यमृतसाप आयन् शुचिजन्मानः शुचयः पावकाः**[2] इति। सृष्टेमूले सत्यासत्ययोर्मेलनमभवत् इत्यभिहितम्। प्रजापतिना उभे पृथक् पृथक् संस्थापितो। तयोः सत्यं श्रद्धायोग्यं तथा अनृतमश्रद्धायोग्यमिति प्रोक्तम्–

दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः।
अश्रद्धाम् अनृतेऽदधात् श्रद्धां सत्ये प्रजापतिः॥[3] इति

अनेन ज्ञायते यत्संसारेऽस्मिन् सत्यासत्यमुभो विद्यते। तत्र यत्सत्यं तच्छित्वा तदेव ग्रहणीयमित्येव मानवकर्तव्यम्। यतो हि सत्यं सत्कर्मबोधकं भवति मधुरत्वञ्च प्रयच्छति इति वेदवाणी – '**ऋतस्य जिह्वा पवते मधु प्रियम्**'।[4] एवमेव मानवजीवनस्य सम्प्रेरका ये खलु नैतिकादर्शाः परिलक्ष्यन्ते, तेषामाधारोऽस्ति सत्यम्। यथा प्रोक्तम् ऋग्वेदे यत्सत्यं हि अनेकसुखानां स्रोत: स्वरूपमस्ति। सत्यभावनया दुष्कर्माणि विनश्यन्ते। ऋतवाक् मानवानां बधिरकणेष्वपि प्रविशति –

ऋतस्य हि शुरुधः सन्ति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हन्ति।
ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः॥[5] इति

श्रद्धा - किमपि कार्य सम्पादयितुं सर्वादौ श्रद्धायाः आवश्यकता विद्यते। यतो हि सश्रद्धं कृतं कार्यं सुन्दरं भवत्यैव। गीतायां श्रीकृष्णेन कथितं हि '**श्रद्धावान् लभते ज्ञानम्**'[6] इति। सम्प्रति, सर्वत्रैव श्रद्धाया अभावो लक्ष्यते।ज्येष्ठं प्रति विद्वांसं च प्रति श्रद्धा प्रदर्शितव्या, तदैव वाञ्छितफलं लब्धुं शक्यते इति अस्मदीया परम्परा। श्रद्धया एव धनैश्वर्यं संलभ्यते इति ऋक्वचनम् '**श्रद्धया विन्दते वसु**'[7] असन्तोषेण दुर्विचारेण वा ऐश्वर्यं न हि लभ्यते। विभूतेर्सर्वोच्चस्थानं तु श्रद्धया एव संप्राप्यते इति ऋक्मतम्– '**श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि**'[8] इति।

---

[1] Ibid २:३.२

[2] Ibid ७:५६.१२

[3] शुक्ल. यजु. ११:७७

[4] ऋग्वेदः ९:७५.२

[5] Ibid ४:२३.८

[6] गीता. ४:३९

[7] ऋग्वेदः १०:१५१.४

[8] Ibid १०:१५१.१

अहिंसा - लोककल्याणाय अहिंसाव्रतधारणं परमावश्यकं वर्तते। सम्प्रति, यत्र तत्र हिंसायाः कारणात् दुराचारः भ्रष्टाचार: नृशंसतादयः आधिक्येन वर्द्धमानाः दृश्यन्ते। मानवमनस: हिंसाभावं दूरीकृत्यैव स्वस्थसमाजनिर्मातुं शक्यम्। तस्मात् वैदिकसाहित्ये अहिंसां सर्वोपरि स्थानं प्रदत्तम्। ऋग्वेदे सुन्दरवर्णनमिदं दृश्यते यत् वृद्धो भवतु बालको वा, तपस्वी वा वीरो भवतु न कमपि हन्तव्यम् –

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्।

मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः॥[1] इति

वस्तुत एषा रुद्रसमक्षं साधकानां स्तुतिः। परन्तु अहिंसाया बीजमिह दृश्यते। न केवलं मानवानामुपरि, अपितु गवाश्वादिपशूनामुपरि अपि न कदापि कष्टं प्रदातव्यम् इति प्रार्थितम् – **मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः।**[2] इति।

मधुरभाषणम् - सत्याहिंसादिवत् मधुरवचनं प्रशस्यते वेदे। मधुरया गिरा सर्वमपि जेतुं शक्यते। मधुरभाषणार्थं मानवा: जगति प्रेषिता इति वेदवचनम् – **'भद्रवाच्याय प्रेषितो मानुषः, सूक्तवाकाय सूक्ता ब्रूहि'**[3] इति। अत: कठोरवचनं परित्यज्य मधुरमनुकतु निर्दिशति श्रुतिः – **'स्वाद्मानं वाचः सुदिनत्वमह्नाम्'**[4] इति। मधुरवाचा परस्परं प्रीतिः प्रवर्द्धते जनचित्तञ्च आकृष्यते, ह्यतो नीतिशास्त्रेऽपि निर्दिश्यते इत्थम् –

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता॥ इति

मधुरवाणी वक्तारं श्रोतारञ्च आह्लादयति। तस्मात् वैदिकसाहित्ये मधुगिरः महत्वमाधिक्येन आम्नातम्। ऋक्–संहितायां वर्णितं यत्यो मधुरभाषी सत्यवादी चास्ति, तस्य कृते वायु–नदी–वनस्पतयः–सर्वेऽपि मधुरत्वप्रदातारः भवन्तीति - **'मधु वाता ऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधी'**[5]इति।

सुमतिभावः - दया–मैत्री–स्नेहादिमानवीयगुणसमृद्धभाव: सुमतिभाव इति वक्तुं शक्यते। इयं सुमतिरेव मानवं सुमानवरूपेण प्रतिष्ठापयितुं सिद्धास्ति। कुमतिस्तु मानवं दानवतां प्रति नयति। कुमत्या मानवो न भूयते। कुमार्गे कुमत्यां वा प्रविश्य मानवः निरन्तरं तृणत्ति। तस्माद् सुमतिलाभार्थं प्रेरितम् ऋग्वेदे – **'महस्ते विष्णो सुमतिं भजामहे'**[6] इति। पुनश्चश्रेष्ठानां देवानां कल्याणकारिणी भद्रा सुमतिरस्मभ्यं प्राप्तिर्भवेत्, अस्माकं मनः कुमत्यां न कदापि निवेशयेत् इति कामना कृता – **'देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्तताम्'**[7] इति। ऋग्वेदस्यैकस्मिन् मन्त्रे निगदितं

---

[1] Ibid १:११४.७

[2] Ibid १:११४.८

[3] मनु. ६:७५

[4] ऋग्वेदः २:२१.६

[5] ऋग्वेदः १:१०.६

[6] Ibid १:८९.२

[7] Ibid ३:७५.६

यदस्माकं मति परकल्याणात्मिका स्यात्। अत्र लोककल्याणाय 'विश्वजन्याम्' इत्यस्य प्रयोगो दृश्यते। यथा आह– 'जातवेदो वसो रास्व सुमतिं विश्वजन्याम्' इति। इह न केवलं स्वस्यैव सर्वेषां हितसाधनार्थं सुबुद्धिं देहीति प्रार्थितम्।

उपसंहारः - अनया आलोचनया वक्तुं शक्यते यत् मानवीयमूल्यं संरक्षितुं मनसः शुचि आदौ अपेक्षते। मनः यदि पवित्रं स्यात्तदा पवित्रे मनसि शुद्धभावनाः जायन्ते। भावशुद्धौ सति कर्तव्याकर्तव्यबोधविवेकः आविर्भवति। अनेन दया–अहिंसा–सुमति–परहितमृदुतादिगुणानां विकासो भवति। येन 'आत्मनो मोक्षाय जगद्धिताय' चेति बोधोपजायते 'यच्च मानवीयमूल्यस्योत्सः इति वक्तुं शक्यते।

सहायकग्रन्थसूची

1. आचार्य नरंसिह, (१९४४) आपस्तम्बश्रौतसूत्रम्, ओरिएण्टाल् लाइब्रेरी, मैसुर युनिवर्सिटि।
2. आचार्य डा. नरेन्द्र कुमार, (२०१०) आपस्तम्बधर्मसूत्रम्, विद्यानिधि प्रकाशन, दिल्ली।
3. सरस्वती दयानन्द, (१९६०) ऋग्वेदभाष्यभूमिका, वैदिक मन्त्रलाय, अजमेर।
4. शर्मा, आचार्यश्रीराम (२००४) ऋग्वेदसंहिता, संस्कृति संस्थान, बरेली।
5. दत्त चैताली, मनुस्मृति, (२००८) नवपत्र प्रकाशन, कोलकाता।

Author's Detail

Address: Ph.D. Research Scholar
P.G. Department of Sanskrit, Utkal University,
Vani Vihar, Bhubaneswar 751004

Email: majhilaxman1994@gmail.com

****

एकावल्ल्यलङ्कारे ध्वनिविवेचनम्

देव सुजन मुखार्जी

शोधसारः

आनन्दवर्धनात् प्राक् अयं सिद्धान्तः विदुषां चर्चायाः विषयः समभूत्। काव्यतत्वविदः अनेन सम्यक् परिचिता आसन् यथा ध्वनिकारः आनन्दवर्धनः '**काव्यस्य आत्माध्वनिरस्ति**' उक्तवान्, काव्यतत्वविदः अस्य सम्यग् विचारणात्पूर्वमेव प्रकाशितवन्तः – '**काव्यस्यात्मा ध्वनिरिति तैः समाम्नातपूर्वः**'। सर्वप्रथमम् आचार्य: आनन्दवर्धनः ध्वन्यालोकं रचयित्वा ध्वनिसिद्धान्तं स्थापितवान्। तदनन्तरम् आचार्यः अभिनवगुप्तः ध्वनिसिद्धान्तस्य **ध्वन्यालोकलोचनना**म्नी विस्तृतां टीकां विलिख्य ध्वनिशास्त्रस्य विवेचनामकार्षीत्। अनया टीकया अभिनवगुप्तः स्पष्टरूपेण असाधयत् यद्व्यञ्जनाशक्तिरेव रसाभिव्यक्तेः रहस्यं स्पष्टतः अवगमयितुं क्षमते। यतः रसभावादीनां बोधः वाच्यरूपेण न सन् व्यङ्ग्यरूपेण एव भवति। सः रस–अलङ्कार–वस्तूनां विवेचनं कुर्वन् अकथयत् यत्काव्यं रसद्वारेणैव जीवितं भवति, रसस्याभावे काव्यं वक्तुं न शक्यते। अलङ्कारध्वनिः तथा वस्तुध्वनिरपि रसध्वनावेव पर्यवस्यतः। अतः रसस्य ध्वनेश्च सिद्धान्तेषु कश्चित् तार्किकः वैषम्यो न विद्यते। आचार्य: अभिनवगुप्तानुसारं ध्वनौ शब्देन, अर्थेन, गुणालङ्कारैः युक्तस्य रसात्मकत्वस्य सौन्दर्योपेतमाकर्षणं भवेत्। विशेषरूपेण अलङ्कारवादिभिः एवं गुणवादिभिराचार्यैः ध्वनिप्रतिष्ठां सोढुं शक्यन्ते। तथा केचिद् एकावल्ल्यालङ्कारेष्वेव अस्य समावेशं व्यदधुः।

कूटशब्दाः – ध्वनिः, काव्यस्यात्मा, गुणीभूत:, प्रतीयमान:, लावण्यम्, अङ्गीकृतः, अलङ्कारः, अनुमानम्, चारुत्वम्, सहृदयाः।

****

संस्कृसाहित्ये काव्यशास्त्रकारैः दीर्घकाव्यशास्त्रपरम्परायां वाच्यार्थेतरं प्रतीयमानमर्थं अङ्गीकृतवन्तः। तैः एतदपि स्वीकृतं यत्प्रतीयमानेनार्थेन सहृदयाः सामाजिकप्राणिनः आनन्दमनुभवन्ति। एवञ्च तत्र पूर्णतया निमग्नाः अपि भवन्ति। परन्तु अयं प्रतीयमानोऽर्थ: एव काव्यस्यात्मा इति सुदीर्घकाव्यशास्त्रेषु केनापि कृतं स्यात्। प्रतीयमानार्थस्य आनन्दानुभूतेः सत्ता काव्येषु सर्वैः अङ्गीकृतेऽपि प्रतीयमानस्य काव्यजीवितभूततत्त्वरूपेण केनापि प्रत्यक्षतया नाङ्गीक्रियते। अस्मिन् संस्कृतकाव्यशास्त्राकाशे ध्रुवनक्षत्रवत् सर्वदैव अभिविराजमानः आचार्यः आनन्दवर्धनः। अनेन काव्यस्यात्मा ध्वनिरिति अङ्गीकृतः। अस्यैव तत्त्वस्य प्रतिष्ठापकत्वेन आचार्यः संस्कृतजगति प्रसिद्धो वर्तते। अधुना ध्वनितत्त्वस्य परिभाषा प्रस्तूयते। यथा –

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरित सूरिभि:कथितः॥[1]

यत्र शब्देन स्वार्थः गुणीभूतत्वेन अभिव्यज्यते, सः काव्यविशेषः विज्ञानध्वनिरित्युच्यते। आनन्दवर्धनाचार्यैः ध्वनितत्त्वस्य सत्ता लौकिकोदाहरणैः सोदाहरणं सरलोपायेन विश्लिष्टा।

प्रतीयमान पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥[2]

---

[1] धन्यालोक, 1:1.

[2] धन्यालोक, 1:4

महाकवीनां वाणीषु प्रतीयमानं किञ्चिद् अतिरिक्तं वस्तु विद्यते। तद्वाच्यार्थाद्भिन्नं सहृदयजनेषु प्रसिद्धं वर्तते। यथा अङ्गनालावण्यं प्रसिद्धालङ्कारात्तथा गुणनेत्रादिभ्यः भिन्नं तथैव। यथा स्त्रीणां दृष्टिगोचरीभूतं लावण्यं पृथग् रूपेण सहृदयानां अक्षिषु अमृतवद्भाति। तथैव प्रतीयमनोऽर्थोऽपि भवति। एतेषु विषयेषु विचारणीयः विषयः भवति किमिदं लावण्यम्? अतः लावण्यनामको गुणः शब्दकल्पद्रुमे स्पष्टीक्रियते यत् –

मुक्ताफलेषुच्छायायास्तरलत्वमिवान्तरा।

प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥[1]

अर्थाल्लावण्यं केवलं दृष्ट्वैव अवगन्तुं शक्यते। तस्य व्यक्तकरणं केनापि शब्देन न संभवति। ध्वनितत्त्वसत्तां व्याख्यायन् विद्याधराचार्यः आनन्दवर्धनाचार्यमनुसृत्य तस्य अभिमतमङ्गीकृत्य लिखन्ति **शब्दार्थौ काव्यदेहौ तथैव ध्वनिरेव काव्यात्मा।** एनमात्मभूतध्वनिं केऽपि नाङ्गीकुर्वन्ति। केऽपि च अनिर्वचनीत्वेन तथा भाक्तत्वेन स्वीकुर्वन्ति। किन्तु तथा नास्ति। ध्वनिरस्ति, तस्य सुस्पष्टं लक्षणमग्रे प्रदीयते। अस्मिन् संदर्भे ग्रन्थकारः आनन्दवर्धनस्वीकृतस्य ध्वनेः विरोधनं कृत्वा तद्विषये कञ्चन संशयमुपस्थाप्य समाधातुं यतते। एकावलीकारेण विद्याधरेण ध्वनिविवेचयन् पूर्वस्वीकृतानाम् अभितानां व्याख्या क्रियते। यथा–

शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभ्यधायि ध्वनिः

चार्वाक: इव कैश्चिदस्य न पुनः सत्तापि सम्भाव्यते।

कर्तुं लक्षणमक्षमैरयमनिर्वाच्यः परैरुच्यते

शब्दार्थौ वपुरस्य तत्र विगुणधैरात्माभ्यधायि ध्वनिः॥[2]

काव्यशास्त्रीय अन्ये च आचार्याः आनन्दवर्धनादि विद्वद्गण: शब्दं अर्थञ्च काव्यस्य शरीरमिति मन्यते। किन्तु आनन्दवर्धनाचार्यैः ध्वनिरेव काव्यस्यात्मा इति अङ्गीकृतः। दार्शनिकेषु चार्वाकैः यथा भौतिकशरीरमेव सर्वमिति मन्यते। तथैव केचन आचार्याः काव्यस्यात्मभूतं ध्वनिं नाङ्गीकुर्वन्ति। आलङ्कारिकेषु केचन तल्लक्षणं कथयितुमसमर्थत्वात् अनिर्वचनीयत्वेन अङ्गीकृतवन्तः। केचन लक्षणया अङ्गीकृतः। प्रसङ्गोऽयं सम्यक्तया अवगन्तुं ध्वन्यालोकस्य कारिकेयं विचार्यते। यथा – **काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-**

स्तस्याभावं जगदुरपरे भक्तमाहुस्तमन्ये।

केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं

तेन ब्रुमः सहृदयमनः प्रीतये तत्स्वरूपम्॥[3]

अतः ध्वनिस्वीकरणे प्रत्यक्षतया मतत्रयमायाति – १) ध्वनिनामकं किमपि तत्त्वं न संभवति, २) लक्षणाभावात् ध्वनिरनिर्वचनीयः, ३) यदि ध्वनिः तत्त्वस्वरूपः अर्थात् लक्षणया प्रतीयते। ईदृशं विपरीतं मतत्रयं उपस्थिते सति सर्वादौ

---

[1] Ibid. पृ. 33

[2] एकावली, 1:2

[3] धन्यालोक, 1:1.

ग्रन्थकारः ध्वन्यनङ्गीकारिणां सकाशे ध्वनिसत्तां प्रस्तौति। **ननुध्वनिर्नास्तीति प्रतिज्ञारोधः। ध्वनिरित्येनेन विधिः, नास्तीत्यनेन च निषेध स्तयोश्च परस्परविरुद्धयोरेकस्मिन् धार्मिणि तिमिरातपयोरिव महानवस्थानदुःस्थयोरेव निवारितत्तवात्। न चात्र विरोधपारिहारप्रयोजकयोः देशकालस्य तस्याप्युपादानमस्ति, येन विरोधः समाधीयेत।**

यदि ध्वन्यभावप्रसङ्गो अङ्गीक्रियते तदा सर्वादौ प्रतिज्ञाविरोधो दोषः आयाति। यतो हि ध्वनिपदेन ध्वनिः विहितः। तत्र नास्तीति पदेन तस्य निषेधः क्रियते। एवं प्रकारेण तिमिरातपवत् विरुद्धौ विधिनिषेधौ एकस्मिन् धर्मिणि स्थातुं दुष्करौ। ईदृशस्थले विरोधनिवारणार्थं देशकालयोः अन्यतरस्य प्रयोगः क्रियते। किन्तु अत्र तयोः उपादानं नास्ति, यत्र उक्तस्य विरोधस्य समाधानं कर्तुं शक्यते। एतदतिरिच्य '**ध्वनिः नास्ति**' इति अनेन कथनेन प्रश्नरुदेति यत् अत्र प्रतीतध्वनेः उत अप्रतीतध्वनेः निषेधः क्रियते? यदि अत्र उच्यते प्रतीतध्वनेः निषेधः क्रियते, तदा पुनः प्रश्नरुदेति यत् कीदृशोऽयं प्रतिषेधः कुत्रापि ध्वनिः नास्ति। उत ईदृशः क्वचित् क्वचित् अस्तीति। अनयोः पक्षयोः प्रथमः स्वीक्रियते चेत् सिद्धसाधनदोषः आयाति। यतो हि ध्वनिवादिभिः आचार्यैः ध्वनिः क्वचिद् क्वचिद् अभिमन्यते, न सर्वत्र। यदि उच्यते ध्वनिः कुत्रापि नास्ति, तन्नोचितम्। यतो हि प्रतीतवस्तुनः सर्वाधिकः निषेधः '**वदतो व्याघातः**' अर्थात् स्वकथनेन विरोधो भवति। यदि उच्यते यत् ध्वनेः प्रतीतिरेव न भवति, तदा ईदृश '**वदतो व्याघातः**' स्वरूपो प्रश्नोऽपि नोदेति। यतो हि प्रतोयोगिध्वनेः प्रतीतिरेव अत्र निषेधं प्रति हेतुत्वेन विद्यते। यदि कथ्यते ध्वनेः सत्ता विद्यते, किन्तु काव्येषु तस्य चारुत्वाधानं न क्रियते चेत् व्यर्थरेव। अर्थात् तस्याङ्गीकरणे आवश्यकता नास्ति। यदि ध्वनिवशात् काव्ये चारुत्वमायाति, तदपि चारुत्वधायकतागुणे अलङ्कारे अन्तर्भूतो भवति। ईदृशस्य तत्त्वस्य कृते नेतरं नाम प्रयोजनम्। "**ध्वनिः चारुत्व-धायकगुण अलङ्काराभ्यां पृथक् नास्ति, यतो हि सः चारुताहेतुस्वरूपः। यत्काव्यगतं तत्त्वं ततः भिन्नं तद् चारुताकारणं नास्ति। यथा – अविमृष्टाविधेयांशदोषः। ध्वनिः चारुताहेतुस्वरूपः। अतः अयं गुणालङ्काराभ्यां पृथक् नास्ति।**

यदि उच्यते गुणः अलङ्काराद्भिद्यते चेदपि रीतिवृत्त्योः काव्यचारुत्वाधायकवत् ध्वनिरपि गुणादिभ्यः पृथक् तथा चारुत्वाधायकस्वरूपेण मन्यते चेत् का आपत्तिः? एवं न भवति। यतो हि रीतीनां स्वरूपं गुणान् अतिक्रम्य न स्वीक्रियते अर्थात् रीत्याश्रयः गुणः इति वामनाचार्यः कथयति यत् – **काव्यशोभायाः कर्त्तारो धर्मा गुणाः,**[1] **ये खलु शब्दार्थयोः धर्माः काव्यशोभां कुर्वन्ति ते गुणाः। ते च ओजः प्रसादादयः। न यमकोपमादयः। कैवल्येन तेषामकाव्यशोभाकरत्वात्। ओजः प्रसादादीनान्तु केवलनामस्ति काव्यशोभाकरत्वमिति तदतिशयहेतवस्त्वलङ्काराः।**[2] वृत्तयः अलङ्कारे एव अन्तर्भवन्ति। यतो हि कठिन–कोमल–माधुर्यार्थानां निरूपणार्थं क्लिष्टकोमलमध्यमवर्णैः वृत्तीनां योजना क्रियते। अत एव अनुप्रासोऽलङ्कारः स्वीक्रियते। अत एव प्राज्ञैः आलङ्कारिकैः पृथक्तया अप्रदर्शितस्य तत्त्वस्य पारिभाषिकनामकरणं कृत्वा स्वात्मानं प्रतिभावान् इति अभिमत्वा हर्षकरणं अहेतुकम्। भवदपेक्षया केन तद्विषये अवगन्तुं शक्यते? एनमाक्षेपं समाधातुं ध्वनेः गुणान्तर्भावः न क्रियते। यतो हि अयमस्य धर्मः। तस्मात्मम्मटाचार्येण स्पष्टीकृतम् –

---

[1] काव्यलङ्कारसूत्रम् – 3.1.1.

[2] Ibid 3.1.2.

ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।

उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥[1]

ईदृशः ध्वनिः धर्मी। तथा धर्मे धर्मिणः नान्तर्भावः। अलङ्कारेऽपि ध्वनेरन्तर्भावः न क्रियते, यतो हि बह्वर्थ-प्रतीयमानः श्लेषाद्यलङ्कारः वाचार्थमात्रं बोधयित्वा विश्रान्तो भवति। अतः तस्मिन् ध्वनेरन्तर्भावः दोषपूर्णः। ध्वनेरन्त-र्भावाभावादपि यदि एतत् वक्तुं शक्यते यत् निम्नोक्तेषु अलङ्कारेषु ध्वनिः प्रतीयते। किन्तु समासोक्त्यादिषु अलङ्कारेषु स्पष्टतया अर्थः प्रतीयते। तत्र ध्वनिः अभिमन्यते। एतादृशं सम्भावितं तर्कं हृदये संस्थाप्य भामह–उद्भट्टादयः प्राचीनाः आलङ्कारिकाः वस्तुध्वनिमलङ्कारेषु स्थापयन्ति। नायं तर्कयुक्तः। व्यङ्ग्यार्थप्रधानत्वात् ध्वनिः स्वीक्रियते, तस्य गौणत्वात् समासोक्त्यलङ्कारः अङ्गीक्रियते। अनयोः ध्वनि–समासोक्त्यलङ्कारयोः क्षेत्रं भिन्नमस्ति। अतः अन्यतरस्य अपरे अन्तर्भावः कथमक्रियते? रूपक–दीपक–तुल्यायोगितादिषु अलङ्कारेषु उपमालङ्कारस्य व्यञ्जना स्वीकृता आचार्यैः। अयं प्रतीयमानेऽपि वाच्यार्थस्य उपस्कारो भवति। एवं प्रकारेण अलङ्कारध्वनिः अलङ्काररेव। एतदपि वक्तुं न शक्यते। यतो हि अस्यां स्थित्यामुपमा गुणीभूतव्यङ्ग्यत्वेन स्थीयते, न तु अलङ्काररूपेण। संवत्प्रेयसौर्जस्वीसमाहितनामे अलङ्कारे रसभावः रसाभासत्वेन तथा भासः अङ्गत्वेन स्थीयते। एवं प्रकारेण रसादीनामङ्गभूतानां स्थितत्वे तस्य अलङ्कारसिद्धिर्न भवति। आत्मतया तस्य स्थितौ अलङ्कारत्वशंका नैव संभवति। ईदृश्यां स्थित्यां ध्वनि आत्मतया चारुत्वहेतुस्वरूपः। एवं प्रकारेण त्रयाणां ध्वनिनां (वस्तुध्वनिः–अलङ्कारध्वनिः–रसध्वनिः) अलङ्कारत्व सिद्धिः न स्यात्।

ध्वनिः अनुमानभिन्नः इति आचार्यमहिमभट्टः। अयं निःसारमेव यतो हि अनुमानस्य मुख्याधारा व्याप्तिः। व्याप्तिं विना नानुमीयते। यदि पृच्छ्यते केन वक्तुं शक्यते यत् ध्वनिस्थले व्याप्तिः न संभवति। तस्योत्तरमिदं यत् व्याप्तिश्रवणार्थं ध्वनिवादिनः सर्वदैव अपेक्ष्यमाणा वर्तन्ते। यतो हि साध्यसामन्येन सह हेतुसामान्यस्य अविनाभाव एव व्याप्तिरित्युच्यते। प्रस्तुतेऽस्मिन् संदर्भे ध्वनिः साध्यसामान्यः तथा शब्दार्थः हेतुसामान्यः। किमत्र ध्वन्युपलब्धिः तस्य साधिका उत शब्दार्थयोः तादात्म्यम् उत्पत्तिश्चेति। अत्र अनुपलब्धिना साध्यं बोध्यते इति वक्तुं न शक्यते। यतो हि अभावरूपत्वात् केवलं साध्यसाधनैव समर्थः। उदाहरणार्थम् **अत्र न कुम्भः**। वाक्येऽस्मिन् उपलब्धयोग्यस्य घटस्य अनुलब्धिः कथिता। यतो हि अयं नोपलभ्यते। घटसामान्ये उपलब्धियोग्यता विद्यते। प्रकृतेऽस्मिन् संदर्भे ध्वनि–शब्दार्थयुगलयोः अनुपलब्धिः नास्ति। एतौ द्वौ संभावना प्रकारत्वात् हेत्वसिद्धौ। यतो हि प्रथमतः अत्र ध्वनेः अनुपलब्धिना ध्वन्यभावः असिद्धः, अपितु विपरीते प्रस्तुतेऽस्मिन् सन्दर्भे ध्वन्युपलब्धिना साधनमभीष्टम्। अत्र शब्दार्थस्य अनुपलब्धिना ध्वनिः न साध्यते। यदि शब्दार्थविशेषस्य अनुपलब्धिना ध्वनिसाधनेच्छा स्यात् तथापि तन्न संभवति, यतो हि गटस्यानुपलब्धिना घटाभ्यासः सिद्ध्यते।

तादात्म्येन ध्वनिभूतार्थस्य अर्थस्य नानुमितं न शक्यते। शिंशपा इत्यनेन तादात्म्येन वृक्षत्वसाधनमनुमीयते। यतो हि साध्यसाधनयोः तादात्म्यसम्बन्धस्य साधनेनैव तयोः साध्यसाधनभावः संभवति। किन्तु शिंशपावृक्षयोः तादात्म्यसम्बन्धे एतत् वक्तुं शक्यते यत्यो यो वृक्षः सः सः शिंशपा नास्ति। यथा चन्दनादिवृक्षोऽपि भवितुमर्हति किन्तु

---

[1] काव्यप्रकाश.कारिका – 8.86.

निश्चितोऽयं यत्यः यः शिंशपा, सः सः वृक्षः। अतः **वृक्षोऽयं शिंशपात्वात्** इत्यनुमानार्थं **यः यः शिंशपा सः सः वृक्षः** इति व्याप्तिर्भवति। एवं प्रकारेण वृक्षत्वं हेतुत्वेन मत्वा शिंशपा न निर्धार्यते, किन्तु शिंशपात्वं हेतुत्वेन मत्वा वृक्षत्वं साध्यते। अतः अनयोः मध्ये तादात्म्यसम्बन्धः विद्यते। प्रस्तुतेऽस्मिन् प्रसङ्गे तादात्म्यमिदं न संभवति, यतो हि यः शब्दः अर्थो वा ध्वन्यनुयापकत्वेन स्वीकर्तव्यः। तस्य शब्दस्य अर्थस्य वा प्रतीयमानार्थरूपेण साध्येन सह तादात्म्यसम्बन्धत्वेन गम्यगमकभावः न सिद्ध्यते। तद्विपरीते ध्वनिप्रकृतिः शब्दार्थतिरस्करणेन भवति। उक्तमपि –

यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।

व्यङ्क्त काव्यविशेष: ध्वनिरिति सूरिभिः कथितः॥[1]

अनन्तः तृतीयपक्षः एव अवशिष्यते। किन्तु विचारकाले पक्षोऽयं ध्वन्यनुमानकरणे अपि समर्थो न भवति। किमर्थमिदमिति चेदुच्यते यत्तदुत्पत्तिमूलकानुमानस्य प्रसिद्धमुदाहरणं वर्तते – **तत्र अग्निरस्ति**। यतो हि तत्र धूमोऽस्ति, धूमादेव अग्निरुत्पद्यते। अतः तेन अग्निः अनुमितुं शक्यते। संदर्भेऽस्मिन् अनुमानवादेन लिङ्गत्वेन स्वीकृतौ शब्दार्थौ ध्वनिकार्यत्वेन नैव स्वीकृतौ। तथैव च शब्दार्थाभ्यां प्रकटीभूतात् ध्वनेः प्राग् शब्दाकांक्षायोग्यानामस्तित्वे सति शब्दार्थौ प्रादुर्भूयेते। मीमांसकाचार्यस्य कुमारिलभट्टस्य अभिहितान्यवादमङ्गीकृत्य प्रतीयमानार्थे वितर्कयन्तः नैयायिकैः पृच्छ्यते यत् पदानां कस्मिन् अर्थे सङ्केतः स्वीक्रियते, व्यक्तिरूपार्थे उत जातिरूपार्थे। प्रथमपक्षस्वीकारे अनन्ताः सङ्केताः स्वीकर्तव्याः। तथा नूतनं पुस्तकादिकमर्थं दृष्ट्वा पुस्तकपदवाच्योऽयमिति अर्थबोधो भवति। अत्र व्यभिचारी दोषः उपस्थितः। अतः सङ्केतः विशेषार्थे नैव स्वीकर्तव्यः। प्रायः सामान्यरूपे (जातिरूपे)पदार्थे सङ्केतोऽस्ति इति अयं मन्तव्यः। सङ्केतोऽयं पदे वर्तते, अनेन सङ्केतपदेन पदार्थः अभिधीयते। पुनः अभिहितपदार्थे आकांक्षा–योग्यता–आसत्तिवशाद् अन्वयत्वात् पूर्वाननुभूतैः पदार्थैः अनभिषेधः एकः अपूर्वः विशेषरूपो वाक्यार्थ उदितो भवति। इदं विशिष्टवाक्यार्थं पदसङ्केतो नास्ति, तथापि तस्य विशिष्टवाक्यार्थस्य प्रगीतिः अभिधानेन संभवतीति स्वीकर्तव्या। यत्र वक्ता पदप्रयोगे केवलं पदस्वरूपमात्र प्रयुज्यते, न तु पदार्थावबोधनार्थम्। तत्र पदैः प्रतीयमानेन पदार्थेन निर्मितस्य वाक्यार्थस्य बोधः न भवति। अतः ध्वनेः पृथग् ग्रहणं निरर्थकम्। अन्विताभिद्यावयादवादीनां मते अन्वितपदार्थाः एव विशिष्टाः, न तु अनन्विताः। यतो हि अनन्वितपदार्थाः सामान्याः भवन्ति। तथा अभिधानमन्वितरूपम्। एवं विशिष्टपदार्थानमेव अभिधानं संभवति। अतः सामान्यार्था-भिधाने उपायापेक्षा वर्तते। एवं प्रकारेण येषां मते सङ्केताश्रयभूतविशिष्टवाक्यार्थः वाच्यतया स्वीकृतः, तथा स्ववाच्याद् अभिन्नस्य पदार्थस्य भूतादिसङ्केतितसामान्यार्थाभिधानस्य पदे सामर्थ्यं नास्ति। तेषां मते अर्थान्तरभूतो प्रतीयमानार्थयुक्तो वाच्यः स्वीकर्तव्यः। यदि उच्यते यथा बाणस्य दीर्घदीर्घतरव्यापारकवच-स्फोटमर्मभेदं तथा प्राणहरणपर्यन्तं सर्वमङ्गीकर्तव्यम्। तथैव तादृशं शब्दं श्रवणानन्तरं येन अर्थावगमः स्यात्, सः सर्वार्थाभिधाव्यापारस्य सेतुबन्धः। एतत् कथनमपि मिथ्याप्रलापस्वरूपम्।

राजसु उल्लसिताः वासश्वासादयः वाच्यार्थाः भवन्ति। यदि एतदतिरक्तिमभिधाभिन्नं व्यापारान्तरं न स्वीक्रियते, तदा लक्षणायां कीदृशं वैशिष्ट्यमस्ति यत् स्वीक्रियते, तथा दीर्घदीर्घतराभिधाव्यापारेणैव लक्ष्यार्थः किमर्थं प्रतीतिः स्यात्?

[1] धन्यालोक, 1:13.

तस्यां स्थित्यां लक्षाणायाः पृथग् स्वीकरणं निरर्थकमेव। यथा अभिधाभिन्नः लक्षणाव्यापारः स्वीक्रियते तथैव व्यञ्जना अपि स्वीकर्तव्या। एतदतिरिच्य यदि व्यङ्ग्यव्यञ्जनाभावः न स्वीक्रियते तदा च्युतिसंस्कारादिदोषः नित्यः तथा श्रुतिकद्वादिदोषः अनित्यः स्यात्, इदं विभाजनं निरर्थकम्। यतो हि वर्णव्यञ्जकतासिद्धान्ताङ्गीकारैव श्रुतिकद्वादिदोषोः अनित्यो भवति। वीर–रौद्रादीनां रसानां व्यञ्जनायां विद्यामाने सति श्रुतिकटुवर्णाः रसेषु गुणत्वेन अभिव्यज्यन्ते न तु दोषत्वेन। यतो हि ते शृङ्गारादिषु दोषत्वेन अङ्गीक्रियन्ते। एतदतिरिच्य यदि प्रतीयमानार्थः नाङ्गीक्रियते तदा काव्यान्तर्गतस्य निहितार्थस्य स्मारकार्थः इतरेषु पदार्थेषु अनन्वयात् असभ्यार्थः न प्रतीयते। फलतः एतस्य पदस्य प्रयोगः दोषरूपेण नाङ्गीक्रियते। यतो हि अस्य पदस्य असभ्येतरार्थस्य इतरैः पदार्थैः सह अन्वयः वाच्यो भवति। एवं प्रकारेण भेदकारणत्वात् विरुद्धधर्मस्य प्रतीतौ यदि वाच्यव्यङ्ग्ययोः मद्ये भेदस्वीकारः न क्रियते, तदा कुत्रापि भेदकल्पना न कार्या। अतः वक्तुं शक्यते यत् वाच्यलक्ष्याभ्यामतिरिक्तं व्यंग्यार्थः, तदर्थं व्यञ्जनाव्यापारोऽपि अङ्गीकर्तव्यः।

वाच्यव्यङ्गस्वरूपयोः भेदः निम्नलिखितरूपेण प्रस्तूयते – **हे महाराजन्! नृसिंहदेव! विदुषां सुमेरुपर्वतः, सूर्यस्य अश्वाः, चिन्तामणिः, कल्पवृक्षः इत्येताः पदार्थाः यदि अर्थिजनेभ्यः न वितरिताः तदा भवतः दानदातृरूपेण अभिमानः सर्वदैव निरर्थकः**। प्रस्तुतेऽस्मिन् पद्ये वाच्यार्थः निन्दारूपेण वर्तते, किन्तु प्रतीयमानार्थः स्तुतिरूपः। अतः अत्र वाच्यव्यंग्यार्थौ स्वरूपतः भिन्नौ। अत्रादौ वाच्यार्थः प्रतीयते, तदनन्तरं व्यंग्यार्थः। अनयोः मध्यकालभेदः अनिवार्यः। वाच्यव्यङ्ग्ययोः मध्ये आश्रयभेदोऽपि वर्तते। उदाहरणार्थं वाच्यार्थः केवलं शब्दाश्रितः, अर्थात् वाच्यार्थः शब्दमात्रे तिष्ठति, व्यङ्ग्यार्थः शब्दे शब्दैकदेशे अर्थात् शब्दगतप्रकृतौ प्रत्यये, अर्थे, वर्णे संघटने च विद्यते। एवं प्रकारेण वाच्यार्थं प्रति व्याकरणशास्त्रं हेतुः भवति। यत्र व्यङ्ग्यार्थं प्रति प्रकरणादिना प्रतिभा सातिशयं कारणं भवति। एवं प्रकारेण अर्थावज्ञाता बुधः, बोद्धा, विज्ञानः इत्यादिभिः पदैः अभिहितः। यत्र व्यङ्ग्यार्थावज्ञाता सहृदयः, विदग्धः, प्रतिभावान् इत्यादिभिः पदार्थैः अभिधीयते। वाच्यार्थागमनप्रक्रिया प्रतीतिः, तथा व्यंग्यार्थावगमनप्रक्रिया चमत्कारः इत्युच्यते। एवं प्रकारे वाच्यार्थस्य सम्बन्धः अभिधा, प्रतीयमानार्थसम्बन्धः परामर्शः इत्युच्यते। वाच्यव्यङ्ग्ययोः मध्ये विषयमभेद् वर्तते।

यथा – **कस्य वा न रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।**
सभ्रमर पद्माघ्रायिणि वारितयामे सहस्वेदानीम्॥[1]

अर्थात् प्रियायाः अधरं व्रणयुक्तं दृष्ट्वा रोषो न भवति। अतः भ्रमरयुक्तस्य कमलस्य आघ्राणं कुर्वन्ती त्वमेव सहस्व। प्रस्तुतेऽस्मिन् पद्ये 'कस्य वा' इति पदं तात्पर्यपूर्णमस्ति यत् कदापि केनापि न कृता ईर्ष्या एतादृशजनः। वारितवामस्य तात्पर्यं वर्तते यत् मदीयवचनं नाङ्गीकृतवती। तथा 'सहस्व' इति पदस्य तात्पर्य यत् उपालम्भस्य परम्परानुभवः। पद्येऽस्मिन् स्वच्छन्दचारिण्याः भूमिका केनापि प्रच्छन्नप्रेमिकेन कृता। उपपतिन विहरणं कुर्वन्ति। प्रियतमेन निश्चितः यत् तस्य कयापि सख्या नायको न दृश्यते। एतदृशं विहररूप्यपराधं गोपयितुम् एवमुक्तम्। अत्र उक्तेन 'सहस्व' इति पदेन स्वच्छन्दचारिणी नायिका अवगम्यते। तथा यं निरपराधः इत्यनेन व्यंग्यार्थः प्रियतमपरकोऽस्ति। नायिकाविषये व्यञ्जनैव व्यंग्यार्थः प्रकटीभूतः। नायकस्य अविनयं पिधाय्य तस्योपरि

[1] धन्यालोक.वाच्य – 1:4.5.

विश्वासनमित्यात्मको अर्थः प्रकट्यते। प्रस्तुतेऽस्मिन् पद्ये 'प्रिया' इति पदेन नायिकायाः सौभाग्यपतिशय सूच्यते तथा तस्याः अविनयसम्बन्धे उपालम्भत्वात् प्रमोदस्य व्यञ्जनात्मको विषयोऽस्ति। एतदतिरिच्य प्रकटीभूतम् अपराधं आच्छाद्य चातुर्यस्य प्रकाशनं कृतवान्। एवञ्च 'त्वमेवं मा कुरु येन सम्भोगचिह्नं प्रकट्यते' इत्यनेन व्यङ्ग्यार्थेन प्रच्छन-कामुको प्रकटीभूयते। एवं प्रकारेण मया रहस्यं गोपितम्। एवञ्च च वाच्यव्यंग्यार्थयोः विषयकाधारत्वेन अत्यधिको भेदः प्रतीयते। ध्वनितत्त्वं सत्यमेव सहृदयहृदयसंवेद्यमस्ति, किन्तु एतत् निश्चितं यत् तदनास्यमिति। अर्थात् लक्षणाकरण-सम्भवम्। पक्षोऽयं परीक्षाकरणेनापि न ग्राह्यम्। यतो हि ध्वनिसामान्यं तथा ध्वनिविशेष्यं ग्रन्थाकारेण सुस्पष्टतया प्रदर्शितम्। प्रसङ्गोऽयं आनन्दवर्धनकृते ध्वन्यालोक तथा मम्मटकृतौ उल्लिखितः। पुनः यदि ध्वनितत्त्वमनाख्येय-मित्युच्यते तदा एतत् अनाख्येयं सर्वत्र आरोप्यते। यदि अनाख्यरूपेण ध्वनिरियं लोकोत्तरा इति केनापि उच्यते चेत् अस्माकमभीष्टमेव सिद्यते। कैश्चन विचारकैः व्यङ्ग्यार्थः भक्तित्वेन अङ्गीकृतः। यतो हि तेषां मते अर्थोऽयं भक्त्याः तथा उपचाराद् प्राप्यते। तेषां कृते अस्माकं प्रश्नः यत् भक्तिव्यक्त्योः मध्ये किं तादात्म्यं वर्तते? अर्थात् भक्तिव्यक्ती अभिन्नौ, उत भक्तिः व्यञ्जनालक्षणा, उत भक्तिः व्यञ्जनोपलक्षणा? अत्र ध्वनिभक्त्योः अभिन्नत्वं न स्वीकर्तुं शक्यते। यतो हि तेषां विरुद्धत्वं उपलब्धिर्भवति। उदाहरणार्थं मुख्यार्थस्य व्याघ्रादीनां बोधे सति भक्त्याः प्रवृत्तिः स्यात्। यत्र व्यञ्जनाप्रवृत्तिः बोद्धॄणां तथा श्रोतृणामवगमनादनन्तरं भवति। अतः अनयोः मध्ये तादात्म्यं न संभवति। एतदतिरिच्य व्यञ्जनाभक्त्योः भेदसिद्धिः अनुमानेन भवति। अनुमानमीदृशं भवति – भक्तव्यञ्जने भिन्ने, यतो हि द्वयोः भिन्नार्थः वर्तते। ययोः पदार्थयोः भिन्नार्थः विद्यते तौ परस्परभिन्नौ।

<u>सहायकग्रन्थसूची</u>

1. आनन्दवर्धन (1960), धन्यालोक, सम्पा. विश्वेश्वर सिद्धान्तशिरोमणि, ज्ञानमण्डल लिमिटेड, वाराणसी।
2. वामन (1965), काव्यलङ्कारसूत्रवृत्ति, सम्पा. विश्वेश्वर सिद्धान्तशिरोमणि, दिल्ली विश्वविद्यालय, दिल्ली।
3. विमानचन्द्र भट्टाचर्य (1967), संस्कृत साहित्येर रूपरेखा, संस्कृत पुस्तक भाण्डार, कलकाता।
4. विश्वनाथ (2006), साहित्यदर्पण, सम्पा. उदय चन्द्र वन्द्योपाध्याय, संस्कृत वुक डिपो, कलकाता।
5. रमारञ्जन मुखोपाध्याय (1384 वङ्गाब्द), रससमीक्षा, संस्कृत पुस्तक भाण्डार, कलकाता।
6. सत्यरञ्जन वन्द्योपाध्याय (2006), संस्कृत अलङ्कार साहित्य समालोचना, संस्कृत पुस्तक भाण्डार, कलकाता।

<u>Author's Detail</u>
Address: State Aided College Teacher
Department of Sanskrit,
Kaliyaganj College, West Bengal
Email: 86dsm2@gmail.com

****

उच्चशिक्षास्तरीयसंस्कृतभाषाधिगमे बहुलमाध्यमनव्यप्रवृत्तयः

श्रुती के बि

शोधसारः

बौद्धिक–सामाजिक–सांस्कृतिक–मानवीयादिमूल्यानां सम्पादनाय शिक्षा अत्यन्तमावश्यकी एव। तस्याः शिक्षायाः विकासाय प्रदानाय च विविधविधीनाम् उपयोगः करणीयः। तेन उत्तमनागरिकतायाः विकासः संवर्धते। भाषाऽधिगमसन्दर्भे नैके विधयाः सम्प्रति समुपलब्धाः। उच्चशिक्षास्तरीय संस्कृतभाषाधिगमे एतेषामुपयोगः अवश्यं कुर्यात्। परन्तु परिवर्तनकालेऽस्मिन् बहुलमाध्यमीयाधिगमप्रक्रिया सौकर्यात्मकं भवति चेदपि परम्परागतशैक्षिकप्रक्रियाणामपेक्षया एषा प्रक्रिया क्लेशदायकी एव वर्तते। प्रायेण अस्य क्रियाकरणे प्रक्रियाज्ञानं भवेत् अध्यापकस्य। व्यवस्थानुगुणं प्रक्रियानुगुणं च उत्तमविधीनां स्वीकरणं वरम्।

कूटशब्दाः – अधीतिः, बोधः, आचरणं मानवीयमूल्यबोधः, तर्कविधिः, शिक्षा।

****

भारतीयसंस्कृतिः संस्कृतभाषायां निहितो वर्तते। यद्यपि पूर्वाचार्यैः संस्कृतस्य प्राचीनत्वं कल्प्यते तथाऽपि वयं नूतनपद्धती नामाधारेण सुलभतया अस्याः अध्ययनं कर्तुं शक्नुमः। परिवर्तनशीलेऽस्मिन् संसारे मानवः अल्पीयसि काले अल्पेनैव श्रमेण अधिगमसफलतायै निरन्तरं प्रयतमानो वर्तते।

प्राचीनतमसंस्कृतशिक्षणविधयः - गुरुकुलेषु गुरुः विभिन्नविधीनामाधारेण शिष्यान् पाठयति स्म। प्राचीनकाले कण्ठस्थीकरणस्य अधिकं महत्त्वमासीत्। अत एव पारायणविधिष्वपि पदपाठ, संहितापाठ, घनपाठादि विविधविधयः स्वीकृताः। एवं उच्चस्तरेषु गहनविषयाणां ज्ञानाय वादविवादप्रक्रियाऽपि समाश्रिता। अत्र आचार्यः प्रतिभाशाली विध्यार्थी वा विशिष्टविषयान् स्वीकृत्य स्वीयविषयस्योपरि समर्थनं विद्धाति। अन्ये शिक्षार्थिनः सश्रद्धं विषयमधि-गच्छन्ति। जटिलविषयाणां स्मरणाय सूत्ररीतेः अपि प्रयोगः कृतः। यदा कदाचित् गुरोः अभावेऽपि ज्येष्ठछात्राः लघुछात्राणां कक्ष्यासञ्चालनमपि कुर्वन्ति। विविधविषयाणां व्याख्यानमालाद्यनेकविधयः अनुपालयन्ति।

अधीतिबोधातरणप्रचारणैः दशाश्चतस्रः प्रणयान्नुपाधिभिः।[1]

अधीतिः, बोधः, आचरणं, प्रचारश्च अत्र बहुप्रामुख्यं भजन्ते। वैदिककालीनशिक्षायाः अवलोकनेन केषाञ्चन विधीनां प्रयोगः अधिकतया दृश्यते। केचन उच्चस्तरीयपाठशालाविधयः अधो निर्दिशन्ते–

व्याख्यानविधिः - विद्यार्थी ज्ञानपिपासुः भवेत्। एवं च ब्रह्मचारी, श्रद्धावान् संयतेन्द्रिययुक्तश्च भवति छात्रः। उक्तं हि - **श्रद्धवान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**[2] इति

व्याख्यानेन आचार्यः विविधविषयाणां विस्तृतोपदेशं ददाति। मननादिप्रक्रियया छात्राः गुरुणा पाठितांशानां निदिध्यासनमपि कुर्वन्ति स्म।

---

[1] नैष.च-1:3

[2] महाभारत, 25:39

श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम्।

निदिध्यासनमित्येतत् पूर्णबोधस्य कारणम्॥

आध्यात्मिकविषयाणां व्याख्यानं मौनेनापि भवति स्म। **अधीयानो नान्यो वाचो वदेत्।**[1]

गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः।[2]

भारद्वजश्रौतसूत्रम्निदर्शनानां प्रयोगो व्याख्यानेन भवति स्म।

तर्कविधिः - न्यायादिशास्त्राध्यापनं मुख्यतया तर्कविधिनाऽऽसीत्। अतिमहत्त्वपूर्णो भवति तर्कविधिः। उक्तं हि उपनिषदि – **नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ।**[3] अनेन विधिना छात्राणां भावनाप्रकाशनस्य विकासः भवति। छात्रेषु स्वाध्यायप्रवृत्तेश्चापि बलं भवति।

प्रश्नोत्तरविधिः - प्रश्नोत्तरविधिना पठितांशस्य दृढता समायाति। अनेन व्याख्यानस्यापि सम्पन्नता भवति। यावत्पर्यन्तं जिज्ञासायाः शान्तिर्न भवति तावत्पर्यन्तं प्रश्नशृङ्खला अनुवर्तते। वेदे – **आ शिक्षायै प्रश्निनं, तथा च, उपशिक्षायै अभिप्राश्निनम्।**[4] इत्यादिभिः मन्त्रैः प्रश्नकर्तुः महत्त्वं दृश्यते। वैदिकशिक्षायां प्रश्नोत्तरविधेः महत् प्राधान्यमस्ति।

सूत्रविधिः - अतिप्राचीनतमो विधिः सूत्रविधिः। व्याकराणदर्शनादिशिक्षणे अस्योपयोगः भवति। जटिल-विषयाणां सरलस्मरणाय सूत्ररूपेण कण्ठस्थीकरणं भवति अत्र।

कक्ष्यानायकविधिः - गुरोः साहाय्यानुगुणं प्रतिभाशाली छात्रः गुरोः अनुपस्थितौ शिक्षणकार्यं करोति। उन्नत-कक्ष्यायां विद्यमानछात्राः निम्नस्तरीयछात्रान् पाठयन्ति। अनेन छात्रस्य नेतृत्वक्षमता आत्मविश्वासश्च वर्धते।

व्याकरणविधिः - भाषायाः प्राणतत्वं वर्तते व्याकरणम्। व्याकरणं विना भाषापठनम् अपूर्णमेव। अतः एव व्याकरणज्ञानम् अत्यन्तमावश्यकम्। उक्तं हि – **रक्षार्थं वेदानाम् अध्येयं व्याकरणम्।**[5] अत्र भाषायाः ध्वनि तत्त्वानां परिचयः भवति छात्रस्य। भाषायाः शुद्धलेखनोच्चारणादयः फलत्वेन भवति व्याकरणविधेः।

ई–अधिगमः बहुलमाध्यमाधिगमश्च - परिवर्तमानेऽस्मिन् आधुनिककाले कक्ष्यागतमुखामुखसम्प्रेषणात् शिक्षणप्रक्रिया बहुपरिवर्तिता सञ्जाता। मुखामुखसम्प्रेषणं विना सम्प्रति अधिपङ्क्ति अधिगमेनापि छात्राः अधिगच्छन्ति। साङ्केतिकताविकासात् शिक्षायां बहुपरिवर्तनमानीतम्। तदनु अध्यापकाः अपि प्रौद्योगिकीविद्यायाः सिद्धतां सम्पादयन्ति। इदानीन्तनकाले वैद्युतीयोपकरणद्वारा शिक्षां प्राप्नोति छात्रः। सङ्गणकयन्त्रस्य आगमनेन शिक्षाक्षेत्रे विप्लवपरिवर्तनम् आनीतम्। सङ्गणकम्, दूरवाणी, अङ्कीयोपकरणद्वारा (Digital Tool) विषयाणां सरलप्राप्तिः जायते अधुना।

---

[1] भार.श्रौत. सू - 11

[2] तत्रैव, 12

[3] कठोपनिषद् 2:9

[4] यु.वे, 30:10

[5] महाभारत

ई–अधिगमः अथवा वैद्युतीयाधिगमः सम्प्रति शिक्षाक्षेत्रे अविभाज्यघटकत्वेन परिणतः। सूचनानां सम्प्रेषणाय प्रस्तुतीकरणाय च विद्यमानमाध्यमानां मिश्रणमेव बहुलमाध्यमः। दृश्यश्रव्यचित्रादीनां सम्मिश्रणेन बहुलमाध्यमस्य रूपकल्पना भवति। पाठ्यसञ्चिका, चित्रणं, श्रव्यसञ्चिका, दृश्यसञ्चिका, चित्रचालनं, चलच्चित्रम्, अन्तर्जालम् इत्यादयः बहुलमाध्यमघटकाः वर्तन्ते।[1]

बहुलमाध्यमाधिगमसफलतायै योजनाः - अत्याधुनिकसाङ्केतिकविकासः सार्वलौकिकतले पठनप्रक्रियायाः सर्वाङ्गीणपरिवर्तनाय कारणभूतो जातः। लोके विभिन्नसामूहिकसांस्कृतिकस्तरेषु शिक्षां स्वीकुर्वन्तः दशलक्षकाः ई–अधिगन्तारः वर्तन्ते। तेषु प्रायः अधिकसंख्यकाः जनाः स्वीय उद्योगप्राप्त्यर्थम् उच्चशिक्षां कुर्वन्तः एव। कक्ष्यागतप्रकोष्ठे अपि इदानीम् ई–अधिगमस्य सफलतां कुर्वन्ति छात्राः अध्यापकाः च। अनियन्त्रित पठनस्तरोयं वर्तते विद्युतीयाधिगमसन्दर्भः। अस्य सफलतायै केषुचित् अंशेषु दत्तश्रद्धा करणीया।

1. प्रोत्साहनं स्वानुशासनं च,	2. उद्देश्यसफलताय क्रियासूत्रणम्,
3. पठनलेखनकौशलानाम् आवश्यकता,	4. अधिगमस्य प्रतिबद्धतायाश्च आवश्यकता

बहुलमाध्यमीयाधिगमसम्प्रत्ययः - शिक्षाशास्त्रनिपुणैः शास्त्रकारैः पठनोपकरणानाम् आधारेण बहुळमाध्यमीयाधिगमः विविधप्रकारैः विभज्यते।

- सङ्गणकनियन्त्रिताधिगमः (Computer managed learning (CML)
- सङ्गणकसहकृतानुदेशनम् (Computer assisted instruction (CAI)
- समन्वय–अधिपङ्क्त्यधिगमः (Synchronous online learning)
- असमन्वयाधिपङ्क्त्याधिगमः (Asynchronous online learning)
- सुस्थिरबहुलमाध्यमाधिगमः (Fixed Multimedia learning)
- अनुकूलात्मकबहुलमाध्यमाधिगमः (Adaptive Multimedia learning)
- रेखीयवैद्युतीयाधिगमः (Linear E– learning)
- संवादात्मकबहुलमाध्यमाधिगमः (Interactive Multimedia learning)
- वैय्यक्तिकबहुलमाध्यमाधिगमः (Individual Multimedia learning)
- सहकृतबहुलमाध्यमाधिगमः (Collaborative Multimedia learning)

सङ्गणकनियन्त्रिताधिगमः (Computer managed learning (CML) - उच्चकक्षासु सङ्गणकशिक्षार्थिनोर्मिथः विद्यमानद्विमुखी प्रक्रिया एव इयम्। छात्राः स्वेच्छया पठनप्रवृत्तीनाम् अनुवर्तनं कर्तुं पारयन्ति। न केवलं विद्यार्थिनां कृते अपि च शैक्षिकप्रबन्धनप्रशासनादिकार्याणां सुसञ्चालनाय अस्योपयोगः भवति। दत्तांशसङ्कलनविश्लेषणादिविषये छात्राणाम् अनुक्रमाङ्कविषये, पाठ्यपद्धतीनां संरक्षणे, मूल्याङ्कनादिविषयाणामपि सुसज्जीकरणाय अस्योपयोगः अनिवार्यः एव।

[1] www.codeandpixels.net

सङ्गणकसहकृतानुदेशनम् (Computer assisted instruction (CAI) - परम्परागताध्यापनापद्धत्या सह सङ्कणकीयप्रयोगः एव सङ्गणकसहकृतानुदेशनप्रविधिः (CAI) अस्य सङ्गणकसहकृताधिगमः (CAL) इत्यपि नामान्तरं वर्तते। CAI इत्यस्य प्राथमिकलक्ष्यं वर्तते अन्यानि सङ्गणकयन्त्राण्युपयुज्य अध्यापनपरीक्षणमूल्याङ्कनादिद्वारा शिक्षार्जनम्। अधुना प्रायः परम्परागतेषु एवं नवीनशिक्षणकेन्द्रेष्वपि अधिपङ्क्तिद्वारा सङ्गणकसहकृताधिगमः क्रियते। तेन तत्रत्यछात्राणां पाठ्य–पाठ्येतरज्ञानविकासाय मार्गः स्पष्टीक्रियते।

समन्वय–अधिपङ्क्त्याधिगमः (Synchronous online learning) - विश्वे कस्मिंश्चित् कोणेस्थित्वा एकस्मिन्नेव समये निश्चितपठनप्रवृत्तौ भागग्रहणाय शिक्षार्थिसमूहानाम् अवसरः प्राप्यते। संविधानेऽस्मिन् प्रायः अधितन्त्रसन्देशविनिमयादिः) Online chat (सचित्र सम्मेलनम्) Video Conferencing (इत्यादि सुविधाः प्राप्यन्ते। अन्यैः सहयोगिजनैः सह परस्पराशयविनिमयाय, क्षणकाले प्रश्नकरणाय, मार्गदर्शकेभ्यः उत्तरदानाय च अवसरप्राप्तिः अत्र भवति। साङ्केतिकविद्यायाः द्रुतवेगपरिवर्तनमिदं सामूहिकाधिष्ठितशिक्षणाय अनेन अधिगमेन सुगमाधिगमस्य च अवसरप्राप्तिः सज्जीकृता।

असमन्वयाधिपङ्क्त्याधिगमः (Asynchronous online learning) असमन्वयाधिपङ्क्त्यध्ययने तत्क्षणाशय-विनिमयं न भवति। छात्राः विविधसमये विभिन्नस्थले स्वतन्त्ररूपेणाध्ययनं कर्तुमर्हन्ति। एष: प्रविधिः विद्यार्थिकेन्द्रित: भवति। अत्र अन्तरानुगुणं पठनं तावत् न भवति। स्वाध्यायक्षेत्रमिदं वर्तते। स्वीयसमयानुगुणं अध्ययनसौकर्यं छात्राणां लभ्यते। सङ्गणक–अन्तर्जालयोः आविर्भावात्पूर्वं प्रायः सर्वत्र वैद्युतोपकरणाधारिताधिगमः असमन्वितमिति परिगण्यते स्म।

सुस्थिरबहुलमाध्यमाधिगमः (Fixed Multimedia learning) - पाठ्यवस्तूनां प्राप्तिः शिक्षाव्यवस्थायाः प्रधानघटको एव। तत्र परम्परागतशिक्षणव्यवस्थाम् अनुकरोति। अर्थात् अध्यापकेन पूर्वमेव पाठ्यवस्तूनां निर्णयः तथा छात्राणां कृते पाठ्यवस्तूनां प्राप्तेः निश्चयोऽपि करणीयः। अत्र सर्वैः प्राप्यमानं निश्चितपाठ्यवस्तु एकमेव प्राप्तव्यम् इति अस्य लक्ष्यम्।

अनुकूलात्मकबहुलमाध्यमाधिगमः (Adaptive Multimedia learning) - नूतनप्रविधिः अयं वैयक्तिक-रूपेण अध्येतृणां कृते पठनसामग्रीणां रूपकल्पनां कर्तुं शक्यते। शिक्षार्थिनां प्रतिभा, लक्ष्याणि, व्यक्तित्वम्, अन्तर्निहित-शक्तयः, इत्यादीन् परिगणय्य वैय्यक्तिकशिक्षार्जनाय महत्प्राधान्यमर्हति संविधानमिदम्। शैक्षिकयुगस्य नूतनारम्भः एव एतेन भवति।

रेखीयबहुलमाध्यमाधिगमः (Linear Multimedia learning) - मानवसङ्गणकयोर्मिथः रेखीयाशयविनिमयः भवति। अर्थात् सम्प्रेषकात् स्वीकर्तारं प्रति विना क्लेशमायाति सूचना। वैद्युतीयाधिगमे अस्मिन् अध्यापकविद्यार्थिनोर्मिथः विद्यमान द्विमुखीसम्प्रेषणस्य अवसरः न्यूनः एव। तथापि बहुलमाध्यमाधिगमः इदानीन्तनकाले अग्रे प्रसरति। दूरवाणि, आकाशवाणी इत्यादिद्वारा जायमानशिक्षणप्रक्रियाः रेखीयवैद्युतीयाधिगमस्य उदाहरणान्येव।

संवादात्मकबहुलमाध्यमाधिगमः (Interactive Multimedia learning) - संवादात्मक बहुलमाध्यमाधिगमे सम्प्रेषणस्य आदानप्रदानं साक्षात् सिध्यति। प्रेषितसन्देशात् एवं स्वीकृतसन्देशादपि अध्ययनप्रक्रियाणां परिवर्तनं भवितुमर्हति। अत एव संवादात्मक ई–अधिगमः रेखीयाधिगमापेक्षया अधिकप्राधान्यमर्हति शिक्षाक्षेत्रे। अत्र अध्यापकविद्यार्थिनोर्मध्ये जायमानाशयविनिमयप्रक्रिया स्वतन्त्ररूपेण भवति।

वैय्यक्तिकबहुलमाध्यमाधिगमः (Individual Multimedia learning) - वैय्यक्तिकशिक्षणमित्यनेन विद्यार्थिकेन्द्रितमिति अशयादपेक्षया पाठ्यचर्यालक्ष्यप्राप्तिः एव संलक्ष्यते। परम्परागतशिक्षणसंविधानम् अस्योदाहरणत्वेन प्रतिपादयितुं शक्यते। वैय्यक्तिकरूपेण पठनपरिशीलनेन शिक्षार्थिनः पठनसामग्रीणां सङ्कलनं ततः अध्ययनमपि स्वयमेव कुर्वन्ति। ततः स्वीयपठनलक्ष्याणां प्राप्तिं छात्राः स्वयमेव अर्जयन्ति। शिक्षार्थिनां गणरूपेण कार्यकरणं, तद्वारा जायमानविकासः अत्र न सम्भवति।

सहकृतबहुलमाध्यमाधिगमः (Collaborative Multimedia learning) - एषा एका सामूहिकाधिगमप्रक्रिया वर्तते। अत्र गणरूपेण क्रियमाणप्रक्रियया स्वीयलक्ष्यप्राप्तिः परिलक्ष्यते। सामान्यलक्ष्याणां प्राप्त्यर्थं सामूहिकप्रक्रियाणामालोचनं भवत्येव। फलतः गणानामायोजनेन अध्ययनलक्ष्यप्राप्तिः भवति। तत्र विद्यार्थिनां बलं बलहीनता च परिगण्यते। छात्राणाम् आशयविनिमयशक्तिः अत्र प्रबलतां प्राप्नोति। सम्वादादिप्रक्रियाः अत्रान्तर्भवन्ति। परम्परागतकक्ष्याप्रकोष्ठीयं सम्विधानमिदं चेदपि अधुना बहुलमाध्यमाधिगमेन विना क्लेशम् अधिगमसफलतामायाति।

साहायकग्रन्थसूची:

1. डाँ.लोकमान्यमिश्रः, (2013) भारतीया पुरातनी शिक्षा, मृगाक्षी प्रकाशनम्.
2. डाँ.लोकमान्यमिश्रः, (2013) भारतीय आधुनिकी शिक्षा, मृगाक्षी प्रकाशनम्.
3. राजीव मालवीय. शैक्षिक तकनीकी एवं नवाचार.
4. Sharma, Dr. A R., Educational Technology.
5. https://e–student.org/types–of–e–learning/

Author's Detail

Address: शोधच्छात्रा,
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः

Email: sruthybabu9@gmail.com

****

कालिदासकाव्येषु गृहस्थाश्रमव्यवस्था तद्रीतयः नीतयश्च

डॉं. लक्ष्मीकान्तषडङ्गी

शोधसारः

शरीरस्य वंशस्य चोभयोः संरक्षणाय गार्हस्थ्याश्रमस्य सुव्यवस्था विहिता प्राचीनकालादेव। पाणिग्रहणसमनन्तरं गृहस्थः गृहस्थधर्माननुसरति। गृहे तीष्ठतीति गृहस्थः। गृहस्थाश्रमोऽयं सर्वेषु आश्रमेषु श्रेष्ठः इति प्रतिपादितं शास्त्रकारैः। धर्मस्य उद्देश्यः समाजधारणम्। तथा समाजधारणार्थं गृहस्थः एव अधिकाधिकं परिश्रमं कुरुते। कालिदासकृते रघुवंशे रघुः कौत्सं कुशलं पृच्छन् ब्रुते – "**कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते**"।[1] यतो हि यावन्तश्च सुखोपभोगाः अभिलषिता मनुष्यस्य तेषां सर्वेषां यथावत् अनुभवः अनुमतः अस्मिन्नेवाश्रमे। अत्रैव विवाहबन्धने प्रविश्य स्त्रीसुखम् आस्वाद्य पुत्रादीन् उत्पाद्य तांस्तान् इन्द्रियविषयान् उपभुज्य आत्मा सन्तोषयितव्यः। किन्तु एतत्सर्वं न अनिर्बन्ध्यम् उपभोक्तव्यम्। अपि तु समाजहितस्य अविरोधेन साधयितव्यम् इति उपदिष्टं शास्त्रकारैः। तदर्थम् एतादृशानि कर्तव्यानि विहितानि येन तादृशं समाजहितसाधनम् अनायासेन सम्पद्यते। महाभारते गृहस्थस्य कर्त्तव्यानि यथार्थेण एवमुवर्णितानि—

धर्मगतं प्राप्य धनं यजेत् दद्यात् सदैवातिथीन् भोजयेच्च।

अनाददानश्च परैरदत्तं सैषा गृहस्थोपनिषद् पुराणी॥[2] इति दिक्।

कूटशब्दाः – रीतयः, नीतयः, कालिदासकाव्येषु, रघुवंशम्, कुमारसम्भवम्।

****

भारतीयसमाजस्य संरचनायां सर्वेषां वर्णानां जीवनकालः चतुर्षु आश्रमेषु विभक्तः आसीत्। सामान्यतः जीवेम शरदः शतम् इति कथनानुसारं मनुष्यस्य जीवनं चतुर्षु ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–सन्यास आश्रमरूपभागेषु विभज्य आचारस्य विशिष्टानां नियमानां विधानं कृतमस्ति। एतान् नियमान् परिपालयन् मानवः शतं वर्षाणि जीवति। चत्वारि लक्ष्याणि यथा धर्मः अर्थः कामः मोक्षः चतुर्षु आश्रमेषु क्रमशः प्राप्यन्ते। अनेन प्रकारेण पुरुषार्थाः आश्रमाः संस्काराश्च एते सर्वे परस्परं सम्बन्धाः सन्ति। आश्रमधर्माणां सम्यगनुपालनेन मनसः निर्मलता, पारिवारिकसुखशान्तिः, लौकिकसुखसौविध्यानि च प्राप्यन्ते। एतदर्थमुच्यते वायुपुराणे –

आश्रमांश्चतुरो ह्येतान् पूर्वमस्थापयत्प्रभुः।

वर्णकर्माणि ये केचित्तेषामिह न कुर्वते॥[3] इति।

मनुष्यजीवनस्य प्रथमभागे विद्याप्राप्तिः द्वितीयभागे सांसारिकसुखवैभवप्राप्तिः तृतीयभागे वानप्रस्थाश्रमे निवृत्तिपरककर्मणां निष्पादनम्, चतुर्थे सन्यासाश्रमे धर्मरूपसत्कर्मणां निष्पादनं च मोक्षप्राप्तये भवति। इत्थं मानवः आत्मनः शक्तीनां विकासाय स्वजीवनं चतुर्षु विभागेषु विभज्य स्वजीवनकाले एव पुरुषार्थान् साधयति। तत्र चतुर्षु आश्रमेषु गृहस्थाश्रमः श्रेष्ठः भवति। उच्यते च–

---

[1] रघुवंशम्, 5:10, पृ. 235.

[2] महाभारतम्– आदि – 913.

[3] वायुपुराणम्, 1:5.22.

सर्वेषामपि चैतेषां वेदस्मृतिविधानतः।

गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि॥[1] इति।

संस्कारेऽस्मिन् विद्याध्ययनं समाप्य गुरुजनानामाज्ञया गुणवत्या सवर्णया च स्त्रिया सह विवाहं कृत्वा गृहस्थाश्रमे प्रवेशस्य विधानं भवति। संस्कारोऽयं पुरुषाय स्त्रिये च द्वाभ्यामपि अत्यन्तं महत्त्वपूर्णोऽस्ति। यत्र शरीरयोः विभिन्नतायामपि द्वयोः हृदयम् एकं भवति। अतः यथार्थेणोच्यते–

यदेतद् हृदयं तव तदस्तु हृदयं मम।

यदिदं हृदयं मम तदस्तु हृदयं तव॥[2] इति।

स्त्रीपुरुषयोः मेलनं एकः धार्मिकसंस्कारः। यत्र कामनावासनाप्रवृत्तेः प्रमुखता नास्ति अपि तु सन्तानसूत्रस्य संचालनाय जीवनस्य विधानं भवति। भगवता मनुना स्त्रीलाभस्योपायस्वरूपं अष्टविधविवाहस्य विभागं प्रदर्शितम्। तद्यथा – **ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।**

गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥[3] **इति।**

प्राचीनकाले गार्हस्थ्याश्रमव्यवस्थायाः गुरुत्वम् – वि–इत्युपसर्गात् "वह" धातोः "घञ्" इति प्रत्यये विवाह इति शब्दस्य निष्पत्तिर्जायते। यस्य शाब्दिकः अर्थः उद्वहः दारपरिग्रहः परिणयश्चेति। यया प्रक्रियया वधूं वरगृहं नीयते तामेव प्रक्रियां विवाह उद्वहः वा इत्युच्यते। विवाहः सन्तानकामाय, प्राकृतिकसुखाय, धर्मसम्पादनाय चाभवत्। संस्कारस्यास्य सातिशयं महत्त्वं परिलक्ष्यते। वंशस्य अक्षुण्णतानिमित्तं सन्तानोत्पत्तिरावश्यकी। देवपितृणां पूजनं विवाहेन सम्पन्नं भवति। अस्माकं देशे विवाहः श्रेष्ठस्थानं प्राप्नोति। विवाहः नवदम्पतीमध्ये नवीनं सम्बन्धं संस्थापयति। एषः एकः स्थायिसम्वन्धः भवति। न केवलं विवाहः जीवविज्ञानस्य प्रतीकोऽस्ति। अपि तु ऐश्वर्यतायाश्च प्रतीकमुच्यते। संस्कारेऽस्मिन् दुष्टताया दूरीकरणं सम्भवति। विवाहसंस्कारोऽयं मनुष्यजीवने एकं महान्तं सामाजिकं परिवर्तनं सृजति। संस्कारेऽस्मिन् पारस्पारिकात्मसमर्पणस्य भावना निहिता। विवाहे स्त्रीपुंसयोरुभयोः शारीरिकमानसिक–वौद्धिक–इहलौकिक–पारलौकिक आध्यात्मिकतायाश्चोन्नतिः भवति। संस्कारेणानेनोभयोः मधुरमिलनेन सुखशान्तिप्राप्तिरेव मुख्योद्देश्यमस्ति। प्राचीनकाले शास्त्रविधिमुत्सृज्य विवाहो न जायते। यतः विवाहे विवाहपूर्वसंस्काराणां ब्रह्मचर्यादीनां प्रतिफलनं भवति। अथर्ववेदे चोक्तम् – "**ब्रह्मचर्येण कन्या युवानं विन्दते पतिः**[4] इति। तदैव ब्रह्मचर्यात् संस्कारोत्पन्नयोः स्त्रीपुंसयोः सम्बन्धविशेषः विवाहः भवति। अतः ब्रह्मचर्यस्यानन्तरं व्यक्तिविशेषः विवाहं कृत्वा गृहस्थोऽभवत्। महर्षिः मनुः गृहस्थाश्रमस्य महत्त्वं प्रतिपादितम्। तेनोक्तं यदयमाश्रमः समुद्र इवास्ति। यथा सर्वाः नद्यः समुद्रं

---

[1] मनुसंहिता, 6:89, पृ. 434.

[2] मन्त्रब्राह्मणः, 1:3.9.

[3] मनुसंहिता, 3:21, पृ. 165.

[4] अथर्ववेदः 1:15.18.

प्रतिगच्छन्ति,तथैव सर्वेषामाश्रमाणां जनाः गृहस्थस्यैव पार्श्वे आश्रयं प्राप्नुवन्ति। अतएव सर्वेष्वाश्रमेषु अस्यैवाश्रमस्य सर्वाधिकं महत्त्वं विद्यते। तद्यथा–

यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्।

तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्॥[1]

साम्प्रतिकसमाजे गार्हस्थ्याश्रमे परिदृश्यमानाः समस्याः तत्परिहारोपायाश्च – प्राचीनकालात् समाजे सत्यपि एवं सुपरिकल्पितव्यवस्थायां संप्रति तु गार्हस्थ्यजीवने जनानां नैकाः समस्याः सन्दृश्यन्ते। यतो हि अधुना नैकाः जनाः गार्हस्थ्यजीवनस्य कर्त्तव्याकर्त्तव्यरीतिनीतिज्ञानविहीनाः सन्ति।फलस्वरूपं गार्हस्थ्यजीवनं सम्पूर्णं सुखप्रदं सुस्थिरञ्च नास्ति। अपरं तु प्रतिदिनं समाजे विवाहविच्छेदः, यौतुकसमस्या, वधुहत्या, वाल्यविवाहसमस्या, बहुविवाहसमस्या, पतिपत्नीनिर्यातना चादयः नैकाः समस्याः संलक्ष्यन्ते। आभिः समस्याभिः क्रमशः सम्प्रति दाम्पत्यजीवनस्य मेरुदण्डः भग्न इव प्रतीयते। अस्याः समस्यायाः कुप्रभावेण न केवलं जनानां दाम्पत्यजीवनं विनशष्टं भवति अपि तु समग्र-समाजोऽपि प्रभावितः भवति। समस्यापरम्परेयं परिवारे समाजे नगरे राज्ये राष्ट्रे च संलक्ष्यते प्रतिदिनम्। न केवलमात्रं प्रत्यक्षरूपेण अपि तु दैनन्दिनं संवादपत्रमाध्यमेन वेतारयन्त्रमाध्यमेन दूरदर्शनमाध्यमेन सामाजिकगणमाध्यमेन चेयं समस्याः बहुलभावेन प्रचारिताः सन्ति। आभिः समस्यापरम्पराभिः जनाः सततमुद्वेगेन कालं यापयन्ति। निरवच्छिन्नम् उद्वेगरहितं न कोऽपि जनः लक्ष्यते कदाचित् कदापि कुत्रापि वा। तथापि जनाः जिजीविषन्ति, समस्यासमाधाने च यथासाध्यं सचेष्टाः भवन्ति। इयमेव धारा प्रचलतितरां सर्वत्र सर्वदैव। परन्तु समस्यासमाधाने किं कर्तव्यं, का वा गतिः, कथं वा समस्येयं दूरीभूता भविष्यतीति जनानां प्रात्यहिकी चिन्ता। सफलगार्हस्थ्यजीवनस्य कृते कीदृशः मार्गः अवलम्बनीयः, कया रीत्या कीदृशेन पात्रेण सह कीदृश्या कन्यया वा सह विवाहः कर्त्तव्यः विवाहात्परं स्त्रीपुंभ्यां कथं स्थातव्यमित्यादिषु विषयेषु सम्प्रति बहवः जनाः चिन्तिताः। परन्तु चिन्तामुक्तः सूर्यकरोज्वलः सुप्रभातः कदाचित्कथं कीदृशं वा समागमिष्यतीति स्मारं स्मारम् अगणिताः मानवाः स्थविरत्वं प्राप्य पञ्चत्वलाभाय दिनं गणयन्ति। एवंविधपरिस्थितौ संस्कृतशास्त्रसहस्रं विशेषतः महाकवेः कालिदासस्य काव्यानि खल्वस्माकं परमसुहृदिव पथनिर्देशकाः भवितुमर्हन्तीति विबुधानां सिद्धान्तः। यतस्तत्रैव विद्यन्ते गार्हस्थ्यजीवनस्य समस्यासमाधानोपायाः तद्रीतयः नीतयश्च।

कालिदासकाव्येषु गार्हस्थ्याश्रमव्यवस्था - वैदिकयुगादारभ्य इदानीं यावद्गृहस्थाश्रमस्य सातिशयं महत्त्वं प्राचीन-शास्त्रेषु सर्वदा वरीवर्त्ति। यतो हि देव–ऋषि–पितृऋणानां शोधनाय अयमेवाश्रमः एकमात्रं साधनं विद्यते। लौकिक-संस्कृतसाहित्येऽपि महाकविकालिदासरचितकाव्येषु चतुर्णामाश्रमाणां कर्त्तव्याकर्त्तव्यविषयं महत्त्वं च सातिशयं वर्णितम्। रघुवंशमहाकाव्यस्यादौ कालिदासः रघुवंशीयानां राज्ञां चरित्रं वर्णयन् चतुर्णामाश्रमाणां प्रसङ्गं प्रतिपादयति। तेनोच्यते –

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।

वार्द्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥[2]

---

[1] मनुसंहिता, 6:90, पृ. 434.

[2] रघुवंशम्, 1:8, पृ. 52.

अर्थात् रघुवंशीयाः राजानः वाल्यवयसि वेदविद्यायां रताः आसन्। यौवने विषयाभिलाषे रताः आसन्। एवञ्च वार्द्धक्ये मुनिवृत्तिमवलम्ब्य अन्तिमे समाधियोगमार्गेण शरीरं त्यक्तवन्तः। रघुवंशीयानां नृपाणामिदं जीवनचरितं वैदिक-युगस्य आश्रमव्यवस्थायाः अनुरूपमस्ति। रघुवंशीयानां नृपाणां गृहस्थाश्रमस्य मुख्यम् उद्येश्यमासीत् पारलौकिकं सुखं न तु अन्यत् किमपि। यतो हि विवाहसंस्कारेण पवित्रवंशजः सन्तानः इहलोकस्य परलोकस्य च सुखाय कल्पते इति तेषां परमविश्वासः। एतदर्थं महाकविना राज्ञा दिलीपमुखेन उच्यते यत् –

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।

सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे॥[1] **इति।**

एवञ्च – **प्रजायैगृहमेधिनाम्।**[2] तेषां पत्नीग्रहणस्य मूलमुद्देश्यमासीत् पुत्रप्राप्तिः। पुत्रेणैव पितृऋणस्य हि शोधनं सम्भवति। उच्यते च – **पुत्रार्थे क्रियते भार्या पुत्रपिण्डप्रयोजनम्।**[3] अतः पुत्रस्यावर्तमाने पितृपुरुषाः पिण्डदानाभावात् अनाहारेण कालं यापयन्ति। गृहिणी यथा गृहमुच्यते, तथैव पुत्रोऽपि भवति गृहस्य सुखम्। गार्हस्थ्याश्रमे वंशधारा अक्षुण्णा भवति पुत्रद्वारेण। उक्तञ्च महाकविशूद्रकेन – **अपुत्रस्य गृहं शून्यम्।**[4] अतः पुत्रः एव संसारसुखस्य कारण-मस्ति। यागयज्ञादिजनितं पुण्यफलं मनुष्याणां परजन्मनि सुखं सम्पादयति। परन्तु जीवनकाले भक्तिसेवाशुश्रूषया पुत्रः पितुः आनन्दकारणं भवति। पुत्रसुखं दृष्ट्वा पितरौ संसारदुःखं विस्मरतः। पुत्रान् पराजयं प्राप्यापि पिता आनन्दितः भवति। उच्यते च **पुत्रात् शिष्यात्पराजयम्।** स च पुत्रः यथा इहकाले तथा परकालेऽपि पितृपुरुषाणाम् आनन्दाय भवति। अतः पितपुरुषाणां ऋणं परिशोधयितुं कामः रघुवंशीयाः राजानः सततमेव तत्पराः आसन्। अतः राजा दिलीपः आत्मनः पुत्राभावेन पितृपुरुषाणां पिण्डविच्छेदावस्थामभिलक्ष्य दुःखेन सह कुलगुरुं प्रत्याह–

नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः।

न प्रकामभूजः श्राद्धे स्वधासंग्रहतत्पराः॥[5]

न केवलमात्रं रघुवंशमहाकाव्ये अपितु कुमारसम्भवमहाकाव्येऽपि पर्वताधिराजस्य हिमालयस्य गुणावली-वर्णनप्रसङ्गे अनुरूपं मतं कविना समुपन्यस्तम्। तद्यथा –

स मानसीं मेरुसखः पितॄणां कन्यां कुलस्य स्थितये स्थितिज्ञः।

मेनां मुनीनामपि माननीयानामात्मानुरूपां विधिनोपयोगे॥[6] इति।

---

[1] Ibid. 1:69, पृ. 186.

[2] Ibid. 1:7, पृ. 50.

[3] प्रसिद्धशालवचनम्।

[4] मृच्छकटिकम्, 1:8, पृ. 12.

[5] रघुवंशम्, 1:66, पृ. 179.

[6] कुमारसम्भवम्, 1:8, पृ. 10.

अस्यार्थः मर्यादाभिज्ञः हिमालयः पितॄणां मानसीं मुनीनाम् अपि माननीयाम् स्वकुलस्य स्थितये वेदोक्तविधिना परिणीतवान्। एवं वंशरक्षामतिरिच्यापि पुत्रप्रयोजनस्यान्यत्तमानि कारणानि सन्ति। जनाः तारुण्यावस्थायां अर्थान् लब्धुं यतन्ते। ततः वार्धक्यावस्थायां पुत्राय गृहभारं समर्प्य स्वयमेव विश्राममभिवाञ्छन्ति। परम्परेयं प्राचीनकालात् एव भारतीयसंस्कृतौ प्रचलितास्ति अद्यावधि। एतदपि प्रतिपादयितुमुच्यते कालिदासेन–

सर्वः कल्ये वयसि यतते लब्धुमर्थान् कुटुम्बी।

पश्चात् पुत्रैरपहृतभरः कल्पते विश्रामाय॥[1]

यथैव पुत्रप्राप्तये यथार्थसमये पत्नीग्रहणस्यावश्यकता विद्यते तथैव पत्नीसकाशात्सुपुत्रप्राप्तये अपि यथार्थः समयः अपेक्ष्यते। शकुन्तलायाः प्रत्याख्यानानन्तरं दुःखानुतप्तः दुष्यन्तः आह यत् – यथार्थसमये बीजवपनेन धरित्री शस्यश्यामला समधिकशस्योत्पादनाय च सक्षमा स्यात्। एवं भूतां सामर्थ्ययुक्तां वसुन्धरां यथा कश्चित् त्यक्त्वा परवर्तिनिकाले अनुतप्ता भवति, तथैवाहं शकुन्तलायाः गर्भे आत्मस्वरूपबीजवपनं कृत्वा यदा सा पुत्रसन्तानप्राप्त्यर्थं सामर्थ्यवती आसीत्तदा तां त्यक्त्वा सम्प्रति अनुतप्तः भवामि। शकुन्तलाप्रत्याख्यानं मम पक्षे कदाचिदपि न समुचितमासीत्। तद्यथा– **संरोपितेऽप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा।**

कल्पिष्यमाणा महते फलाय वसुन्धरा काल इवोप्तबीजा॥[2] इति।

एवमपि दुष्यन्तेनोक्तं यत् – मम मृत्योः परं वेदोक्तविधानानुसारेण मम पितृपुरुषान् प्रति कः श्राद्धतर्पणादिकं समर्पयिष्यति इति चिन्तायाः व्यथिताः मम पितृपुरुषाः सम्प्रति मद्दत्तेन तर्पणजलेन अश्रुप्रक्षालनं विधाय अवशिष्टं तर्पणजलं पिबन्ति। तद्यथा कवेर्भाषया –

अस्मात्परं बत यथाश्रुतिसंभृतानि को नः कुले निवपनानि नियच्छतीति।

नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबन्ति॥[3] इति।

कालिदासकाव्येषु गार्हस्थ्याश्रमस्य रीतयः – रघुवंशमहाकाव्ये महाकविकालिदासेन श्लोकार्थेण गार्हस्थ्यजीवनस्य कृते गृहिण्यारूपादेयता सम्यक् रूपेणैवं प्रदर्शिता। तद्यथा–गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ। अतः भारतीयसंस्कृतौ विवाहस्तु यज्ञाधिकाराय धर्मसम्पादनाय च भवति। ब्रह्मचर्याश्रमे ब्रह्मचर्यमिव गृहस्थाश्रमे दाम्पत्यं प्रशंस्यते। **न गृहं गृहमित्याहुः गृहिणी गृहमुच्यते।**[4] गृहस्थाश्रमे सपत्नीकः यज्ञ एव सम्भवति। पुरुषः पत्न्यां पुत्रं समर्प्य पितृऋणात् मुक्तः भवति। परन्तु आदौ एव पुरुषस्य पक्षे कीदृशी कन्या विवाहयोग्या कन्यायाः पक्षे कीदृशः वरश्च ग्रहणीयः इति विषये ज्ञानमपेक्षते। उच्यते च **कन्यापितृत्वं खलु नाम कष्टम्**[5] इति। अतः कन्यापिता

---

[1] विक्रमोर्वशीयम्, 3:1, पृ. 120.

[2] अभिज्ञानशकुन्तलम्, 6:24, पृ. 512.

[3] Ibid. 6:24, पृ. 512.

[4] पञ्चतन्त्रम्, 3:77, पृ. 214.

[5] Ibid. 2:205, पृ. 40.

उपयुक्तवयसि उपयुक्तपात्राय स्वकन्यां प्रदाय आनन्दितो भवति। यथा कश्चित् जनः स्वसविधे वर्त्तमानं न्यासं समर्प्य भारमुक्तः सन् आनन्दमनुभवति तथैव कन्यापिता अपि स्वकन्यां सत्पात्राय प्रदाय अतीवानन्दमनुभवति। कन्या एव परकीयः अर्थः। परकीयस्य अर्थस्य परस्मै निवेदनमेव समीचीनम्। यथार्थेणोच्यते कविना –

अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।

जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥[1] इति।

एवं कन्यादानस्य सत्यपि नियमे उपयुक्तमर्थिनं विना कन्यादानं न करणीयम्। उच्यते च महाकविना – अयाचितारं न हि देवमद्रिः सुतां प्रतिग्राहयितुं शशाक।

अभ्यर्थनाभङ्गभयेन साधुर्माध्यस्थमिष्टेऽप्यवलम्बतेऽर्थे॥[2] इति।

महाभारतेऽपि उक्तमस्ति—

अयाचितानि देयानि सर्वद्रव्याणि भारत।

अन्नं विद्या तथा कन्या अनर्थिभ्यो न दीयते॥[3] इति।

पुनश्च यस्मै कस्मै अभ्यर्थिने योग्या कन्या न हि प्रदेया। **योग्यं योग्येन योजयेत्** इति नैषधकारस्य वचनमनुसृत्य कन्या प्रदेया। विषयेऽस्मिन् कालिदासस्योक्तिः प्रणिधानयोग्या —

त्वमर्हतां प्रागसरः स्मृतोऽसि नः शकुन्तला मूर्तिमती च सत्क्रिया।

समानयंस्तुल्यगुणं वधूवरम् चिरस्य वाच्यं न गतः प्रजापतिः॥[4]

श्लोकेऽस्मिन् राजा दुष्यन्तः योग्यपात्राणां मध्ये अग्रगामी तथा प्रशंसार्हः। शकुन्तला च सत्क्रियायाः मूर्तिमती अवतारिणी भवति। यथा दुष्यन्तः तथा शकुन्तला, अनयोः समन्वयं संस्थापयन् प्रजापतिः ब्रह्मा कदाचित् निन्दनीयः न भविष्यति, अपि तु सर्वकालं यावत्प्रशंसनीयः स्यात् इति। वैवाहिककर्मणि मातापित्रोरूभयोः मतोऽपि ग्रहणीयः। न केवलं पितुः अथवा मातुः। विशेषतः कन्याविवाहप्रसंङ्गे पितुः सम्मतेऽपि मातुः इच्छायाः प्राधान्यं प्रदीयते। अतः उच्यते—

शैलः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत।

प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः॥[5] इति।

सन्तानानां स्वेच्छया विवाहः नैव करणीयः। गान्धर्वरीत्या विवाहः बहुविवाहश्च श्रोत्रियादीनां पक्षे कर्त्तव्यः न तु अन्येषाम्। उच्यते च - **राजानः बहुवल्लभाः**।[6] अतः राजवंशीयानां एकाधिकपत्नीग्रहणं शास्त्रसम्मतम् न तु सर्वेषाम्।

---

[1] अभिज्ञानशकुन्तलम्, 4:24, पृ. 358.

[2] कुमारसम्भवम्, 1:52, पृ. 28.

[3] आनन्दरामायणम् यागकाण्डम्, 6:34.

[4] अभिज्ञानशकुन्तलम्, 5:15, पृ. 390.

[5] कुमारसम्भवम्, 6:85, पृ. 792.

[6] अभिज्ञानशकुन्तलम्, 3, पृ. 268.

राजकुमाराः राजकन्यादयश्च स्वेच्छया गान्धर्वविधिना पाणिग्रहणं कृत्वैव अनन्तरं गुरुजनैः अनुमोदिताः भवन्ति। एतदपि प्रतिपादयितुं कालिदासेनोच्यते—

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।

समुद्ररसना चोर्वी सखी च युवयोरियम्॥[1] इति।

अपि च — **गान्धर्वेण विवाहेन बह्वो राजर्षिकन्यकाः।**

श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः॥[2] इति।

गुरुजनानामनुमोदनेन आशिषेण च सन्तानानां दाम्पत्यजीवनं सततं मधुमयं स्यात्। एतदर्थं सकलसन्तानानां मातापित्रोः मनोऽभिष्टानुरूपं कन्यां वरञ्च ग्रहणीयम्। नगाधिराजः हिमालयोऽपि पितृणां मानसीकन्यां मुनीनां अपि माननीयाम् - **आत्मानुरूपां मेनां स्वकुलस्य स्थितये वेदोक्तविधिना परिणीतवान्।**[3] एवञ्च रघुवंशमहाकाव्ये—

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः।

विलम्बितफलैः कालं स निनाय मनोरथैः॥[4] इति

कालिदासकाव्येषु गार्हस्थ्याश्रमस्य नीतयः – सहधर्मचारिणीसंयोगो विवाहः। संस्कारेणानेन गार्हस्थ्यजीवनं परिपाल्यते। विवाहः सन्तानकामाय, प्राकृतिकसुखाय, धर्मसम्पादनाय च भवति। गृहस्थाश्रमस्य कृते अस्य संस्कारस्य सातिशयं महत्त्वं विद्यते। अतः सदैव विवाहस्यादरो परिदृश्यते। मानवस्य विकाशाय पशुपालनकृषिवाणिज्यादीना-मुन्नतये मूलकारणं विवाहः भवति। वैवाहिकसंस्कारः मानवजीवने एकं महान्तं सामाजिकं परिवर्त्तनं सृजति। विवाहे पतिज्ञातिपरिवाराणां समाजस्य च कल्याणनिमित्तम् इच्छापूर्वकम् आत्मसमर्पणं कर्त्तव्यम्। एतदर्थं संस्कृतसाहित्ये विशेषतः कालिदाससाहित्ये नैकाः सुनीतयः प्रतिपादिताः सन्ति। सुनीतिनामासां सम्यक् परिपालनं यदि जनाः करिष्यन्ति तर्हि अवश्यमेव गार्हस्थ्याश्रमः मधुमयः भवेत् इति मनीषिणां मतम्। प्रतिपादितासु नीतिषु प्रथमस्तावत् पाणिग्रहणनीतिः। कीदृशी कन्या विवाहयोग्या कीदृशः पात्रश्च विवाहयोग्यः विषयेऽस्मिन् नैकेषां जनानां सन्देहः वरीवर्त्ति। अतः सर्वादौ एव परिग्रहविषयः विचार्यः भवति। ये खलु सज्जनाः विवेकशिलाश्च तेषां तु अन्तःकरणप्रवृत्तयः एव विषयेऽस्मिन् प्रमाणमिति महाकवेः मतमस्ति। तद्यथा—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रबृत्तयः॥[5] इति।

---

[1] Ibid. 3:184, पृ. 268.

[2] Ibid. 3:21, पृ. 276.

[3] कुमारसम्भवम्, 1:18, पृ. 10.

[4] रघुवंशम्, 1:33, पृ. 115.

[5] अभिज्ञानशकुन्तलम्, 1:22, पृ. 136.

श्लोकेऽस्मिन् दुष्यन्तस्य शकुन्तला विवाहयोग्या न वा इति विषये दुष्यन्तस्य मुखेन महाकविना उच्यते यत्— इयं शकुन्तला निश्चिततया क्षत्रियस्य विवाहयोग्या भवति। यतः पुरुवंशसम्भवस्य मम आर्यजनोचितं मनः अस्यामाकृष्टं भवति। सन्देहास्पदेषु विषयेषु सज्जनानां मानसिकी प्रवृत्तिरेव प्रमाणं भवति। अर्थात् कर्त्तव्याकर्त्तव्येषु साधूनां मन एव प्रमाणम्। पौरवोऽहं साधुरेव मनश्च मे शकुन्तलां प्रति याति। अतः सा ग्राह्या। सच्चरित्रवान् जितेन्द्रियः जनः सर्वदा चन्द्रसूर्ययोरिव। चन्द्रः यथैव केवलं कुमुदानि विकासयति न तु पद्मानि, सूर्यः केवलं पद्मानि प्रस्फुटयति, न तु कुमुदानि। अतः जितेन्द्रियाः सर्वस्मिन् समये परदारसंस्पर्शविषये विमुखाः भवन्ति। एतदेव प्रकाशयितुं कामः महाकविना उच्यते— **कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव।**

वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः॥[1] इति।

अस्मात् दुष्यन्तः जितेन्द्रियः अतः परदारग्रहणं सः न करिष्यति इति तस्याशयः। एवं जितेन्द्रियजनस्य बहुष्वपि दारेषु समदृष्टिः विशिष्यते। समानदृष्ट्या दर्शनेनानेन कुलस्य संयातप्रणयस्य च यथार्थता अवश्यमेव स्यात् इति उच्यते। एतदपि प्रतिपादयितुं कामः काश्यपमुखेन महाकविना उच्यते यत्—

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः

त्वयास्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।

सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया,

भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥[2]

विवाहात् परं कन्यायाः सर्वविधं सुखं स्वभाग्याधीनम्। यतो हि कन्या स्वपतिसकाशादेव वीररमणीनामग्रे तिष्ठति पुनश्च स्वतनयसकाशादेव वीरपुत्रस्य जननीति कथ्यते। मालविकाग्निमित्रे यथार्थेनोच्यते—

भर्तासि वीरपत्नीनां श्लाघ्यानां स्थापिताधुरि।

वीरसूरिति शब्दोऽयं तनयात्त्वामुपस्थितः॥[3] इति।

पतिगृहे नारीणां दास्यत्वमपि श्रेयः इत्युच्यते। अतः विवाहिता पतिमती युवतिः बहुदिनं यावत् स्वपितुःगृहे न तिष्ठेत्। अन्यथा जनाः सतीमपि तां युवतिं असतीरूपेण आशङ्कते। अस्मात् कारणात् तस्याः युवत्याः आत्मीयाः तां प्रियाम् अप्रियां वा भर्त्तुः सविधे स्थापयितुं वाञ्छन्ति। तद्यथा महाकवेर्भाषया—

सतीमपि ज्ञातिकुलैकसंश्रयां जनोऽन्यथा भर्तुमतीं विशङ्कते।

अतः समीपे परिणेतुरिष्यते प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः॥[4]

---

[1] अभिज्ञानशकुन्तलम्, 5:28, पृ. 420.

[2] Ibid. 4:19, पृ. 344.

[3] मालविकाग्निमित्रम्, 5:16, पृ. 281.

[4] अभिज्ञानशकुन्तलम्, 5:17, पृ. 394.

सतीनार्यः सर्वदा पतिप्राणाः भवन्ति। भर्त्तुः सेवया एव नारीणां सद्गतिर्जायते। उच्यते च - **तुष्टे भर्त्तरि नारीणां सन्तुष्टाः सर्वदेवताः**।[1] यथा महानद्यः क्षुद्रनदीनां जलमपि पतिरूपं समुद्रं प्रापयन्ति तथैव भर्त्तृवत्सलाः नार्यः सपत्न्या सह अपि पतिं सेवन्ते। तद्यथा कवेर्भाषया—

प्रतिपक्षेणापि पतिं सेवन्ते भर्त्तृवत्सला साध्व्याः।

अन्यसरितामपि जलं समुद्रगाः प्रापयन्त्युदधिम्॥[2]

एवमनुरूपमुक्तिः शाकुन्तलेऽपि परिदृश्यते। पतिगृहे गुरुजनान् प्रति शकुन्तलायाः कीदृशः व्यवहार प्रदर्शनीयः विषयेऽस्मिन् उच्यते यत् काश्यपमुखेन महाकविना—

शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने

भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।

भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी

यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥[3]

श्लोऽस्मिन् कीदृश्यः युवतयः गृहिणीपदवाच्याः भवन्ति प्रसङ्गेऽस्मिन् शकुन्तलां प्रति काश्यपश्योक्तिः। हे शकुन्तले! त्वं यदा पतिगृहं प्राप्स्यसि तदा तत्रत्यानां गुरुजनानां सेवां कुरु। यास्तव सपत्न्यः सन्ति तत्र तासामपि सविधे प्रियसख्याः व्यवहारं प्रदर्शय। केनापि कारणेन यदि तव स्वामी क्रुद्धतया त्वां किमपि कथयिष्यति तदा त्वं रोषणतया तस्य किमपि प्रतिकूलं नाचर, ये तव परिजनाः सेवकाः भृत्याः वा स्युः तेषां कृते त्वं नितरामुदारा भव, पुनश्च राजकीये भोगवैभवे उन्मत्ता कदाचित् मा भव, एवं यदि काचिद् कन्या आचरति, तर्हि सा गृहिणीपदवाच्या भवितुमर्हति। किन्तु अस्य याः विपरीताचरणं कुर्वन्ति ताः सर्वाः युवतयः कुलस्य आधिस्वरूपाः कलङ्करूपाश्च भवन्ति। अतः त्वं यथा सुगृहिणी भविष्यसि तदर्थमवश्यं ममोपदेशं परिपालय। स्वामीनः प्रशंसनीये गृहिणीस्थाने अभिषिक्ता सती तस्य च बहुविधैः ऐश्वर्यमण्डितैः कार्यैः व्यापृता सती तथा च यथा प्राची दिक् पवित्रं अर्कं प्रसूते तथैव पवित्रवन्तं तनयमेकं प्रसूय तत् स्नेहेन नितरां समाकृष्टा सती विवाहिता कन्या मातृपितृविरहजनितं शोकं न चिन्तयिष्यति। यतो हि पतिगृहगमनानन्तरमवश्यं कन्यायाः मनः परिवर्त्तनं जायते। यथार्थेणोच्यते महाकविना —

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे

विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।

तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं

मम विरहजां न त्वं वत्से शुचं गणयिष्यसि॥[4] इति।

---

[1] हितोपदेशः, 1:245, पृ. 281.

[2] विक्रमोर्वशीयम्, 3:1, पृ. 119.

[3] अभिज्ञानशकुन्तलम्, 4:20, पृ. 346.

[4] Ibid. 4:21, पृ. 350.

तदा विवाहिताकन्यायाः पित्रालयं प्रत्यागमनस्यापि निर्दिष्टसमयविशेषः स्यात्। तस्मात् निर्दिष्टसमयात् प्रागेव पित्रालयमागमनं न कर्त्तव्यम्। एतदपि स्पष्टीकर्तुं शकुन्तलां प्रति काश्यपस्योक्तिः यथा—

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥[1] इति।

अर्थात् त्वं बहुदिनानि यावत् पृथिव्याः पत्नी भूत्वा अजातशत्रूं पुत्रं राज्ये अभिषिच्य तथा च तस्मिन् एव तनये कुटुम्बानां भरणपोषणभारं समर्प्य भर्त्ता दुष्यन्तेन सह अस्मिन् शान्ते आश्रमे पदार्पणं करिष्यसि, तेन च परिणतवयसि आरण्यकव्रतमत्र आश्रमे आचरिष्यसि इति भावः।

<u>सहायकग्रन्थसूची</u>

1. हेरकृष्णशतपथी. अभिज्ञानशकुन्तलम्, किताबमहल, कटक, ओडिशा।
2. प्रद्युम्नपाण्डेयः. कुमारसम्भवम्, चौखम्बाविद्याभवनम्, वाराणसी।
3. बुद्धिशर्मावाजपेयी. मालविकाग्निमित्रम्, चौखाम्बाविद्याभवनम्, वाराणसी।
4. विन्ध्येश्वरीप्रसादमिश्रः. विक्रमोर्वशीयम्, चौखम्बा कृष्णदास अकाडेमी, वाराणसी।
5. जनेशभट्टाचार्यः. रघुवंशम्, वि.एन. पावलिकेशन, सुव्रतपुस्तकालय, कोलकाता।
6. Kale M. R., पञ्चतन्त्रम्, बुकडिपो विधानसरणी, कोलकाता।
7. उदयचन्द्रवन्द्योपाध्याय. मृच्छकटिकम्, संस्कृत बुकडिपो विधानसरणी, कोलकाता।
8. मानवेन्दुवन्द्योपाध्यायः मनुसंहिता, संस्कृत पुस्तक भाण्डारः केलकाता।
9. अशोककुमारवन्द्योपाध्यायः मित्रलाभः, श्रीवलरामप्रकाशनी विवेकानन्दरोड, कोलकाता।

Author's Detail

Address: संस्कृतविभागाध्यक्षः
योगदा–सत्सङ्ग–पालपाडा–महाविद्यालयः
पूर्वमेदिनीपुरम्, पश्चिमवङ्गः,
Email: sanskrit.yspm@gmail.com

****

[1] अभिज्ञानशकुन्तलम्, 4:22, पृ. 352.

धर्मसापेक्षं विश्वम्

ममि महान्तः

शोधसारः

धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमपनुदन्ति। धर्मे सर्वं प्रतिष्ठितम्। तस्माद्धर्मं परमं वदन्ति। वचनमिदं समग्रविश्वप्रतिष्ठायाः उत्पत्तिस्रोतस्तु धर्मः इति सिद्धिं करोति। यथा शरीरे प्राणस्य अस्तित्वं, तथैव समग्रविश्वे धर्मस्य स्थितिः। धर्म एव कस्यचिदपि राष्ट्रस्य चेतनास्वरूपम्, येन विना समग्रविश्वं जीवनरहितं भवति। विश्ववासिनां जनानामभ्युदयनिः श्रेयस्य सिद्ध्यर्थं जगति विद्यमानस्य धर्मस्य महती प्रतिष्ठा वर्त्तते। एवं पाञ्चभौतिकं शरीरं परित्यज्यं पारलौकिकं यात्रा प्रारम्भमाणे जीवः धर्मरूपं पाथेयमादायैव परलोकं गच्छति। अत्रोक्तं महर्षिणा -

धनानि भूमौ पशवश्च गोष्ठे नारी गृहद्वारि जनाः श्मशाने।

देहश्चितायां परलोकमार्गे धर्मानुगो गच्छति जीवः एकः॥ इति

अर्थात् असारे खलु संसारे यं यमाश्रित्यानि अनेकविधानि पापानि आचरति जीवस्तानि सर्वाणि धनादिप्रभृतीनि वस्तूनि अन्तकाले परित्यज्य धर्मेणानुगम्यमानः भूत्वा पारलौकिकीं यात्रां करोति। संस्कृतजगति धर्मशब्दस्य बहुष्वर्थेषु प्रयोगः भवति। कुत्रचिद्धर्मशब्दः संज्ञारूपे, कुत्रचिद्विशेषणरूपे, कुत्रचित् आचारव्यवहारकर्त्तव्यार्थे, कुत्रचित्प्राचीनरीतिनितः। एवं परम्परारूपे, एवं वर्णाश्रमव्यवस्थारूपेण व्यवह्रियते। धर्मः सर्वप्रथमं मानवान् विवेकविरोधीसामर्थविरोधी च कार्यं वारयति। ततः विश्वे मानवः वीतक्रोधभयरागरहितः सन्नश्वरजीवनस्य चरमलक्ष्यं सुलभेन प्राप्नुवति। विश्वे स्थितः सामाजिकः आर्थिकः तथा राजनैतिकव्यवस्थानां समुचितं सम्पादनाय धर्म एव सापेक्षः। धर्मस्याभिप्रायः शैव-विष्णवादिधर्मेण सह न अपितु उत्तमाचरणः नीतिपरकव्यवहारः तथा शास्त्रविहितकर्मणा सह समन्वयते। धर्म हि प्राणीहिताय, समाजहिताय, राष्ट्रहिताय च प्रवर्त्तते। तर्हि कोऽस्ति धर्मः। कथं सः प्राप्यते? किं तत्स्वरूपम्? धर्मं विनाऽपि किं कोऽपि मानवो जीवितुं शक्यते। विश्वे कोऽपि राष्ट्रो धर्मापक्षां विना वा समुन्नतिपथं गन्तुं शक्नोति? एते सर्वे प्रश्नाः बुद्धौ प्रायः उद्भवन्ति। तेषां विचारः मया प्रस्तूयते शोधलेखेऽस्मिन्।

कूटशब्दाः - वेदः, रामायणं, श्रीमद्भगवद्गीता, सनातनधर्मं, स्मृतिशास्त्रं, सामान्यधर्मः, विशिष्टधर्मः, आपद्धर्मश्चेति।

****

समग्रविश्वे सर्वे प्राणिनः सुखमयं शान्तिपूर्णं च जीवनमिच्छन्ति। मानवसमाजं सुष्ठुभावेन परिचालनार्थं संस्कृतवाङ्मये यद्यपि नैकानि शास्त्राणि नीतिवाक्यानि उपदेशवाक्यानि च निर्मितानि, तथापि धर्मस्य स्थानं स्वतन्त्रम्। ऐहिकं पारलौकिकञ्च सार्वकालिकं सुखं प्राप्त्यर्थं धर्मः एव सक्षमः। एतद्विषये आचार्यचाणक्यो ब्रूते - **"सुखस्य मूलं धर्मं"** इति। धर्म एवैको मित्रम्, यो मरणेऽप्यभीष्टफलदानार्थम् अनुगच्छन्ति। अतो मनुनोक्तम्-

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।

शरीरेण समं नाशं सर्वमन्यद्धि गच्छति॥[1]

धर्मस्य महत्त्वं सर्वजनविदितम्। अनियतेऽपि संसारे धर्मस्यैव नियतत्वं सर्वैरनुभूयते। मनुष्यः स्वाभिलषितः पदार्थान् यस्मात् प्राप्तुं शक्नोति, तस्य प्रतिपादनमेव धर्मेण सम्भवति। धर्ममेव मानवचरित्रस्य नियामकम्।

[1] मनुस्मृति, ८:१७

धर्मस्य स्वरूपम् - **"धृञ्"** धारणपोषणयोरित्यस्मादौणादिके **"मन्"** प्रत्यय कृते धर्मशब्दो निष्पद्यते। धर्मशब्दस्य व्युत्पत्तिः त्रिधा वर्त्तते। **ध्रियते लोका अनेनेति धर्मः**, **धरति धारयति वा लोकं योऽसौ धर्मः**, **ध्रियते लोकयात्रानिर्वाहार्थं यः स धर्मः** इति। यथा महाभारते-

धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः।
तस्माद्धारणसंयुक्तं स धर्म इति निश्चयः॥[1] **इति**

अर्थाद्धर्मस्तु समग्रविश्वस्य धारणसंरक्षणसम्वर्धनादिश्च कार्यं सम्पादयति।

धर्मस्य भेदाः - धर्मस्य विभाजनप्रसङ्गे पण्डितैः नैकाः भेदाः परिकल्पिताः। धर्मशास्त्राधारेण धर्मः तु द्विविधा - श्रौतः स्मार्त्तश्चेति। अपि च मिताक्षरकारेण भगवता विज्ञानेश्वराचार्येण स्मार्त्तधर्मोऽपि षोढा विभज्यते। यथा – वर्णधर्म, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्च। साहित्ये धर्मस्य त्रिविधरूपं प्राप्यते। १. सामान्य-धर्मः, २. विशिष्टधर्मः, ३. आपदधर्मश्चेति।

१. **सामान्यधर्मः** - येन आचरणेन समाजस्याऽभ्युदयः निःश्रेयस्त्वञ्च प्राप्यते तदेव सामान्यधर्मः। सामान्यधर्मस्तु सामाजिकधर्मो इत्यपि कथ्यते।

२. **विषिष्टधर्मः** - चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागश इति भगवद्वचनासारं चतुर्वर्णानां (ब्राह्मणक्षत्रियवैश्य-शूद्राणां) एवं चतुर्णामाश्रमाणां (ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाश्रमाणां) शास्त्रनिर्देशानुसारं परिपालनमेव विशेषधर्मः।

३. **आपद्धर्मः** - सङ्कटकालिकीं दशामनुभूय, देश-काल-पात्राणां चिन्तनं कृत्वा सद्भावावलम्बनेन शास्त्रमर्यादानुसारं यस्य धर्मस्य पालनं भवेत्, स एव आपद्धर्मो कथ्यते।

धर्मं विना कोऽपि मानवो न हि अवस्थातुं शक्नोति। पाश्चात्त्यदेशे धर्मशब्दस्य प्रयोगः "रिलिजन्" इति शब्देन भवति। उपासनापद्धतिम् आश्रित्येव ते धर्मं निर्देशयन्ति। परन्तु भारतीयानां प्राणभूतस्य धर्मशब्दस्य बहुत्र बहुष्वर्थेषु प्रयुक्तः। कथ्यते यत् - **भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा** इति। भारतदेशस्य प्रतिष्ठात्मिके द्वे भवतः एका संस्कृतभाषा द्वितीया संस्कृतभाषाश्रिता भारतीयसंस्कृतिः। कोऽपि देशः काञ्चिद्विशिष्टां संस्कृतिमादधानो भवति। अस्माकं देशस्य प्राचीनतमो धर्मः सनातनधर्मः एवास्ति। सनातनधर्म कैश्चिदपि अन्यैधर्मैः (धर्माभासैः) सह विरोधो नास्ति। अन्यधर्मपरम्परापेक्षया सनातनधर्मः पूर्णरूपेण वैज्ञानिकः कल्याणकारी चास्ति। अपि विद्वांसः विश्वस्य कल्याणाय रक्षणाय च ततविनाशी स्वरूपं सनातनधर्मं नमस्कुर्वन्ति। यथा -

येन विश्वमिदं नित्यं धृतं चैव सुरक्षितम्।
सनातनोऽक्षरो यस्तु तस्मै धर्माय वै नमः॥ इति

सनातनधर्मस्य मूलं - अद्रोहः, अलोभः, दमः, दयाभावः, तपः, ब्रह्मचर्यः, सत्यं, क्षमा, धृतिः चेति मत्स्यपुराणे वर्णितमस्ति। यथा -

---

[1] महाभारते शान्ति., २०९:२२

अद्रोहश्चाप्यलोभश्च दमो भूततया तपः।

ब्रह्मचर्यं ततः सत्यमनुक्रोशः क्षमा धृतिः।

सनातनस्य धर्मस्य मूलमेतद्दुरासदम्॥[1] **इति।**

एषः सनातनधर्मः सदा सर्वैः सेवनीयो वरीवर्ति च। धर्मस्य परिपालनेन जीवनं सार्थकं लभते। धर्मे कुधर्मः अधर्मः परधर्मश्च अन्तर्भुक्तः भवन्ति। तेषां परिपालने मानवाणां महान् अनर्थः स्यात्।

- **धर्मे कुधर्मः** - अन्यान् प्रति अनिष्टचिन्तनं कूटनीत्यादिभावश्च धर्मे कुधर्मोऽस्ति।
- **धर्मे अधर्मः** - यज्ञे पश्वालम्भनम्, तथाऽस्मिन् शरीरेण मनसा च यद्धिंसात्मकं कर्म क्रियते, स एव धर्मे अधर्मः।
- **धर्मे परधर्मः** - स्वस्मै निषिद्धः परस्य कृते यद्विहितं कर्मक्रियते। स एव धर्मे परधर्मः।

एवं विधस्त्रिविधो धर्मो जनानां कल्याणाय न प्रवर्त्तते। एतान् परित्यज्य यदा सनातनधर्मः पाल्पते, तदानीमेव सद्गतेः प्राप्तिः भवति। महात्मागान्धि-स्वामिविवेकानन्दप्रभृतयो महापुरुषाः धर्मानुगाम्यमानः आसन्। तेषां मनसि धर्मयुक्तस्यैव राष्ट्रस्य निर्माणे सङ्कल्प आसीत्। फलतः सनातनधर्मध्वजवाहकस्य भगवतः श्रीरामचन्द्रस्य स्वरूपोऽस्य राष्ट्रस्य सम्बिधानग्रन्थस्य सर्वोपरि विद्यते। आचार्यचाणकोऽपि ब्रूते - **धर्मेण धार्यते लोक**[2] इति। विश्वमानवसभ्यतायाः संस्कृतेः सदाचारस्य सनातनधर्मस्य च परमप्राचीनतममूलग्रन्थो वेदः। वेदो भवति धर्मस्य स्रष्टा इति बहुत्र प्रतिपादितम्। गौतमधर्मसूत्रानुसारम् - **वेदो धर्ममूलम्। तद्विदां च स्मृतिशीले**[3] इति। ऋग्वेदानुसारं धर्मः नियमावस्थयोः द्योतकः भवति। येन नियमेन संसारस्य जनाः सुखस्वाच्छन्देन निवसेयुः। अथर्ववेदेऽपि धर्मन् शब्दस्य प्राबल्यं दृश्यते। तत्र - **ऋत सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च।**

भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले॥[4] **इति।**

अत्र धर्मशब्दः धर्मप्रचोदितसंस्कारेषु अर्जिताः गुणाः इत्यर्थे व्यवहृतः। उपनिषत्साहित्ये धर्मशब्दस्य प्रयोगः वर्णाश्रमाणां आचार-व्यवहार-संस्कारादिनाम् अर्थेऽपि व्यवह्रियते। तैत्तरियोपनिषदि - **सत्यं वद। धर्मं चर** इति मन्त्रे धर्मशब्दः अनुष्ठेयकमार्थे प्रयुक्तः। श्रीमन्नारायणोपनिषदि -

धर्मौ विश्वस्य जगतः प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पन्ति।

धर्मेण पापमपनुदन्ति धर्मे सर्वं प्रतिष्ठितम्, तस्माद्धर्मं परमं वदन्ति॥[5] **इति**

---

[1] मत्स्यपुराणे, १४४.

[2] चाणक्यनीति

[3] गौतमधर्मसूत्रम्, १:१.२

[4] अथर्व., ९:९१७.

[5] तैत्तिरीयारण्यकम्, १०:६५

इति वचनमिदं समग्रविश्वप्रतिष्ठायाः मूलाधारस्तु धर्मः इति सिद्धिं करोति। श्रुत्यनन्तरं धर्मविषये स्मृतेरेव मान्यता स्वीक्रीयते। स्मृतिग्रन्थेषु प्राचीनतमः मनुस्मृतिः। तत्र विस्तृतरूपे सम्पूर्णविश्वस्य प्रतिष्ठापकः धर्मस्य सुस्पष्टं गाम्भीर्यपूर्णमर्थं च लभते। यथा -

विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।

हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत॥[1] **इति**

अर्थाद्धर्मस्तु रागद्वेषविहिनः, साधुजनानां आचारणगतः, तथा सर्वहृदयानुज्ञातः। पुनः मनुः धर्मस्य दशलक्षणं प्रदत्तवान् –

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥[2] **इति**

धर्मस्य मूलप्रामाण्यरूपेण श्रुतिः, स्मृतिः साधूनामाचारः तथा आत्मसन्तोषश्चेति चत्वारि प्रमाणानि भवन्ति इति मनु बोधयति। यज्ञवल्क्यस्मृत्यामपि धर्मस्य एवं स्वरूपं विहितम्। तथा च दक्षस्मृतौ धर्मेण अभ्युदयः (लौकिकसुखम्) एवं निःश्रेयसः (मोक्षरूपसुखम्) प्राप्नोति इति उपदेशो लभ्यते। नारदस्मृतौ धर्मस्तु भगवान् सदृश्यमतिसूक्ष्मः अतः तस्य विचारयितुं न शक्यो इत्युल्लेखं प्राप्यते।

व्यवहारो हि बलवान् धर्मः तेनावहीयते।

सूक्ष्मो हि भगवान् धर्मः परोक्षो दुर्विचारण॥[3]

अपि च **धर्ममूलस्य पार्थिव** इति वचनासुरं राजधर्ममेव सर्वश्रेष्ठधर्ममिति महर्षि नारदस्य मतम्। राजधर्मस्तु सत्येन सिद्ध्यति -

सत्यमेव परं दानं सत्यमेव परं तपः।

सत्यमेव परो धर्मो लोकानामिति न श्रुतम्॥[4] **इति**

विश्वे सर्वेजनाः सुखमभिलषन्ति, तत्सुखं केवलं धर्मेण प्राप्यते। अस्मात्कारणात्सर्वे वर्णाः सर्वदा सप्रयत्नं धर्माचरणे संलग्नाः भवन्तु इति बोधयति। जगतिऽस्मिन्भारतीयसंस्कृतिप्रतिपादकः ग्रन्थद्वयं प्रसिद्धम् - रामायणं महाभारतश्चेति। श्रीमद्रामायणानुसारं सत्यमेव मानवतां परमधर्मो। यथा -

सत्यमेकपदं ब्रह्मं सत्ये धर्मः प्रतिष्ठितम्।

सत्यमेवावक्षया वेदाः सत्येनावाप्यते परम्॥[5] **इति**

---

[1] मनु., २:१

[2] Ibid. ६:९१

[3] नारदस्मृति, ४:२१३

[4] नारदस्मृति, १:४०

[5] वाल्मिकिरामायणम्, १:१४७.

अत्रैव वर्णधर्मः, राजधर्मः, आचार्यधर्म, नारिधर्मः, पितृधर्मः, मातृधर्मः, भातृधर्मः, पुत्रधर्मः, स्त्रीधर्म एवं मानवधर्मस्य परमं पराकाष्ठा उपलभ्यते। श्रीमद्रामायणे न केवलं रामः धर्मवान्, अपितु सर्वे पात्राः धर्मनिष्ठाः आसन्। भगवती माता सीतादेवी अपि सत्यपथधारिणी। तस्याः वाणी एवमस्ति -

धर्मादर्थः प्रभवति धर्मात् प्रभवत् सुखम्।

धर्मेण लभते सर्वं धर्मसारमिदं जगत्॥[1] **इति**

महाभारतान्तर्गता श्रीमद्भगवद्गीतायां धर्मविचारः भिन्नेषु अध्यायेषु भिन्नप्रसङ्गरूपेण विद्यते। कुत्रचिद्वाचकात्मको शब्दरूपेण, कुत्रचित्कुलमर्यादा इत्यर्थे, कुत्रचित्स्वकर्त्तव्यार्थे, कुत्रचित्सद्गुण एवं सदाचारस्यार्थे, कुत्रचिज्ज्ञानविज्ञानार्थेऽपि धर्मशब्दस्य प्रयोग भवति। यथा –

- कुत्र पुण्यकर्मणः वाचकात्मको शब्दरूपेण धर्मस्य प्रयोगः - **धर्मक्षेत्रे कुरूक्षेत्रे समवेता युयुत्सवः।**[2] **यया धर्ममधर्मं च कार्यं चाकार्यमेव च।**[3] **अधर्मं धर्ममिति या मन्यते तमसावृता।**[4] **याया तु धर्मकामार्थान् धृत्वा धारयतेऽर्जुन।**[5]
- कानिचन प्रसङ्गे धर्मस्य अर्थः कुलमर्यादा सूचयति - **अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः।**[6] **उत्सन्नकुलधर्माणां मनुष्याणां जनार्दनः।**[7]
- कुत्रचित्स्वकर्त्तव्यार्थे धर्मशब्दस्य प्रयोगः भवति - **पृच्छामि त्वां धर्मसमूढचेताः।**[8]

स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।[9]

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्टितात्।[10]

- कतिपय प्रसङ्गे सद्गणः एवं सदाचारस्यार्थे प्रयोजितः –

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।

अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥[11]

परित्राणाय साधूनां विनाशाय च दृष्कृताम्।

---

[1] वारा., ३:९३०.

[2] श्रीमद्भगवद्गीत्ता, १:१

[3] Ibid. १८:३१

[4] Ibid. १८:३२

[5] Ibid. १८:३४

[6] श्रीमद्भगवद्गीता, १:४०

[7] Ibid. १:४३

[8] Ibid. २:७

[9] Ibid. ३:३५

[10] Ibid. १८:४७

[11] Ibid. ४:७

धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥[1]

धर्मविरूद्धो भूतेषु कामोऽस्ति भरतर्षभ।[2]

त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरूषो मतो मे।[3]

- कानिचन प्रसङ्गे ज्ञानविज्ञानयोः वाचकात्मको रूपेण व्यवह्रियते शब्दोऽयम् -

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप।

अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥[4]

- अपि च बुद्धेः समतारूपस्य वाचकोऽयं धर्मशब्दः –

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।

स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥[5]

- कुत्रचिद्ब्रह्मणो यत्सत्ता वर्त्तते तदर्थे धर्मशब्दस्य प्रयोगः भवति।

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वां सर्वपापेभ्य मोक्षयिष्यामि मा शुच॥[6]

धर्मस्य तत्त्वं निहितं गुहायाम्।

महाजनो येन गतः स पन्थाः॥[7] **इति।** अस्यार्थः महाजनप्रदर्शितः मार्ग एव धर्मः।

उपसंहारः - यथा शरीरे प्राणस्य अस्तित्वं तथैव समग्रविश्वे धर्मस्य स्थितिः। धर्मस्याभिप्रायः शैववैष्नवादि-धर्मेण सह न अपितु उत्तमाचरणः, नीतिपरकव्यवहारः तथा शास्त्रविहितकर्मणा सह समन्वयते। विश्वे मानवानां सदा ग्राह्यो धर्मो विद्यते। मानवजीवनस्य मूले एवं विश्वधारणस्य निर्मितार्थं धर्मस्य महदावश्यकता वर्त्तते। महात्माविदुरः प्रोवाच - **एको धर्मः परंश्रेयः**। धर्म एव कस्यचिदपि देशस्य आत्मा भवति, येन विना राजनितिः कल्याणपक्षप्रदायिनी न भवति। उक्तश्चात्र कामन्दकेन - **धर्मेणैव वर्धते राज्यं तस्य स्वादु फलं श्रियः।**[8] **इति**

---

[1] Ibid. ४:८

[2] Ibid. ७:११

[3] Ibid. ११:१८

[4] Ibid. ९:३

[5] Ibid. २:४०

[6] श्रीमद्भगवद्गीता, १८:६६

[7] सुभाषितम्

[8] कामन्दकीयनितिसारः, १:२५

यदा मानवः धर्मस्य वास्तविकस्वरूपं जानाति तदैव समग्रविश्वे परिव्याप्तानाम् अधार्मिककार्याणां दूरीकरणं सम्भवति। समग्रविश्वे स्थितः सामाजिकार्थिकराजनैतिकव्यवस्थानां समुचितसम्पादनाय धर्मः एव सापेक्षः। धर्म हि मानवकल्याणाय समाजहिताय राष्ट्रहिताय च प्रवर्त्तते।

<u>सहायकग्रन्थसूची</u>

1. माण्ढलीकः विश्वनाथनारायण. (१९८८) मानवधर्मशास्त्रम्, गणपतिकृष्णाजी मुद्राणालयम्, बाम्बे।
2. डाँ जयकृष्णमिश्रः. (१८९३) धर्मशास्त्रस्येतिहासः, चौखम्बा संस्कृत सिरीज, वाराणासी।
3. मनुस्मृतिः, चौखम्बा संस्कृत सिरीज, वाराणासी।
4. स्वाई डा ब्रजकिशोर. (२००६), स्मृतिमीमांसा, अक्षय प्रकाशन, नई दिल्ली।
5. गोयन्दका श्री जयदयाल. (२००८) श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर।
6. प्रभुपाद श्रीमद् ए सी भक्तिवेदान्त स्वामी. (१९७५) श्रीमद्भगवद्गीता, भक्तिवेदान्त बुक् ट्रस्ट।
7. सेत्लुर एस् एस. (१९१२) याज्ञवल्क्यस्मृति, ब्रह्मवादिनीप्रेस, मद्रास।
8. गोयन्दका, हरिकृष्णदास. (२०१०) ईशादि नौ उपनिषद्, गीताप्रेस, गोरखपुर।

<u>Author's Detail</u>

Address:	Research Scholars (Ph.D.) Department of Sanskrit, Pondicherry University Puduchrry, 605014.
Email:	mamimahanta796@gmail.com

****

बौद्धानां चत्वार्यार्यसत्यानि

सुजितपरामानिकः

शोधसारः

दुःखमयमिदं जगत् "सर्वं दुःखं दुःखमिति"। सर्वे पुरुषाः दुःखेन सन्तप्ताः सन्ति। जगत् जीवनञ्च सर्वं दुःखमयम्। जन्मनः आरभ्य मृत्युपर्यन्तं सर्वं दुःखमयम्। कारणं विना कार्यं नोत्पद्यते। अतो दुःखस्यापि कारणमस्ति। दुःखस्य कारणं भवति अविद्या, तज्जन्यमासक्तिः तृष्णा। अविद्याजन्या तृष्णा काम वा सर्वानिष्टस्य कारणम्। इयं तृष्णा पुरुषस्य मनस्यनवरतमुत्पद्यते। दुःखस्य अन्तो नाशोऽस्ति। अविद्याग्रस्ता तृष्णा पुरुषस्य अन्तःकरणात् अपगच्छति चेत् दुःखं नोत्पद्यते। पुरुषैः मनसः तृष्णात्यागेन दुःखनिरोधः कर्तव्यः। दुःखनिरोध एव बौद्धानां मते निर्वाणमिति। तदेव पुरुषस्य स्वरूपं भवति। दुःखनिरोधाय भगवता बुद्धेन साधनरूपाः अष्टाङ्गिकमार्गा उपदिष्टाः सन्ति। बुद्धोक्ताष्टाङ्गिकमार्गाः सम्यक्तया पालनेन पुरुषः परमशान्तिं निर्वाणं स्वतः प्राप्तुं शक्नोतीति एते विषयाः "बुद्धस्य चत्वार्यसत्यानि" इति शीर्षकप्रबन्धे प्रतिपादिताः सन्ति।

कुञ्चीशब्दाः – आर्यसत्यम्, दुःखम्, दर्शनम्, दुःखसमुदयः, दुःखनिरोधः, अष्टाङ्गिकमार्गः, निर्वाणम्।

****

भारतीयसंस्कृते षडास्तिकदर्शनानि षड् नास्तिकदर्शनानि च प्रसिद्धानि सन्ति। वेदस्य अस्तित्वानास्तित्वे आस्तिक-नास्तिक इति विभागः। सांख्यो, योगो, न्यायो, वैशेषिकः, पूर्वमीमांसा, उत्तरमीमांसा इत्यादीनि आस्तिक-दर्शनानि, चार्वाकः, बौद्धः, जैन इति त्रीणि च नास्तिकदर्शनानि। नास्तिकदर्शनेषु बौद्धदर्शनमन्यतमं, यस्य प्रवर्तकः स्वयं भगवान् गौतमबुद्धः। भगवतः बुद्धदेवस्य महानिर्वाणस्यानन्तरं तस्य शिष्याः तस्य उपदेशाः त्रिपिटक इत्यस्मिन् बौद्धग्रन्थे पालिभाषायां लिपिबद्धमकुर्वन्। विनयपिटकः, सूत्तपिटकः, अभिधर्मपिटक इत्येषां त्रयाणां संज्ञा त्रिपिटक इति। विनयपिटके बौद्धभिक्षुकाणां आचाराजीवनं, सूत्तपिटके उपदेशात्मकसंक्षिप्तकथा, किञ्च अभिधर्मपिटके दार्शनिक-तत्त्वानामालोचना च विद्यन्ते। सर्वेषां दर्शनानां चरमं लक्ष्यं भवति मोक्षः निर्वाणं, कैवल्यं वा। दर्शनमित्युक्ते यत्र सृष्टि-संहारप्रक्रिया, ईश्वरतत्त्वं, संसारे जीवस्य गतिः, शरीरेन्द्रियैः साकं तस्य सम्बन्धः, तस्य कारणं किं, मुक्त्युपायः, इहलोक-परलोकगति इत्यादयः सर्वे विचाराः आलोच्यन्ते। यतो हि जन्म प्राणिनां दुःखकारणम्। तद्दुःखं जिहासितुं सर्वानि शास्त्राणि प्रवृत्तानि, तदेव अध्यासभाष्ये उल्लिखति यत् - **तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि।**[1] सांख्यशास्त्रेऽपि प्रोच्यते-

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।

दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात्॥[2]

---

[1] शङ्कराचार्येण रचितं ब्रह्मसूत्रस्य शारीरकाध्यासभाष्यम्।

[2] सांख्यकारिका १।

तत्र भगवता कृष्णेनापि श्रीमद्भगवद्गीतायामुच्यते यत् **"अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्**[1]**"** इति। जीवः वस्तुतः स्वपुण्यपापकर्मानुसारेण सुखदुःखञ्चानुभवति। जीवस्य दुःखं भगवतापि न सह्यते, अतः जीवान् उद्धर्तुं भगवान् अस्मिन् धराधाम्नि वारं वारम् अवतरति। तदेव वासुदेवेन उद्घोष्यते -

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।

धर्मसंस्थापनार्थाय संभवामि युगे युगे॥[2] इति।

एवं जीवान् उद्धर्तुं भगवतः बोधिसत्त्वस्यापि अवतरणमस्मिन् धराधाम्नि। जीवस्य दुःखान्मुक्तये सोऽपि निरन्तरः प्रयतमान आसीत्। तस्योपायरूपेण साधननिमित्तं तेन चत्वार्यार्यसत्यानि प्रोक्तानि सन्ति। एतानि आर्यसत्यानि बौद्धानां निर्वाणलाभस्योपायः दुःखजिहासस्य मुख्यसाधनानि। पण्डितानामेवं वादोऽपि श्रूयते यत् काव्यशास्त्रमिव बुद्धेन चतुर्णामार्यसत्यानामनुसन्धानं कृतं यत् सत्यस्य सम्यक् ज्ञानानुसन्धानेन तेनापि संबोधिः प्राप्ता। आर्यसत्यम् आर्यः अर्हत्पुरुषः सम्यक्तया जानाति। सत्यस्य संख्या अनन्तोऽस्ति। किन्तु अत्यधिकमहत्वशालित्वात् एतदार्यसत्यं सर्वश्रेष्ठमिति। आचार्यस्य चन्द्रकीर्तेः एवमभिप्रायोऽस्ति यत् आर्यसत्यमित्युक्ते आर्यः विद्वान् पुरुषः एवैतदवगच्छति, सत्यस्य शिखरं गच्छति अनुभवति वा। साधारणः पुरुषः पुनः पुनः म्रियते जायते च, किञ्च प्रतिक्षणं दुःखमनुभवति किन्तु यथार्थसत्यस्यानुसन्धानाय न प्रयतते। आर्यपुरुषाणामेव हृदि अनिष्टकरस्य दुःखस्य जिहासा आगच्छति, ते एव तत् छेत्तुं प्रयतमानाः भवन्ति। अविवेकिनः तत्र न यतन्ते। तदेव उपनिषदि समाम्नायते यत्

पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात् पराङ्पश्यति नान्तरात्मन्।

कश्चिद्धीरः प्रत्येगात्मनमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥[3] **इति।**

उच्यते यत् भगवान् बुद्धः सत्यस्याविष्कर्ता, उद्धर्ता किन्तु ऐतिहासिकदृष्ट्या पर्यालोच्यते चेत् ईक्ष्यते यत् बहुपूर्वमेव व्यासः, विज्ञानभिक्षुव इत्यादयो महर्षयः सत्यस्यानुसन्धानम् अकुर्वन् इति। यथा चिकित्साशास्त्रे व्याधिः अस्ति, व्याधेः हेतुः अस्ति, आरोग्यस्योपायरूपेण भेषजमस्ति, तद्वत् शास्त्रेऽपि संसारोऽस्ति, संसारहेतुः, मोक्षोपायः, मोक्षो दुःखस्य नाशोऽस्ति। यथा लोके वैद्यो व्याधिग्रस्तपुरुषस्य भेषजेन व्याधिं नाशयति, एवमेव तत्त्वज्ञानी पुरुषोऽपि तत्त्वज्ञानेन महाजालदुःखमहार्णवरूपं संसारं नाशयति। वैद्यशास्त्रेण साकं साम्यत्वात् भगवान् बुद्धो महाभिषक्, वैद्यराज इत्युच्यते। बौद्धसाहित्ये ये सूत्रग्रन्थाः सन्ति तत्रापि बुद्धस्य महाभिषक् इत्यभिधानं प्राप्यते। बौद्धानां सर्वं दुःखं दुःखं, सर्वं क्षणिकं क्षणिकं, सर्वं शून्यं शून्यं, सर्वं सलक्षणं सलक्षणमिति एते चतुर्वादाः प्रसिद्धाः सन्ति। तदिदं सर्वं दुःखं दुःखायतनं दुःखसाधनञ्चेति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं सम्पादनीयम्। तस्मात् तत्त्वज्ञानं सम्पादनार्थं बुद्धस्याभिमतानि चत्वारि तत्त्वानि आर्यसत्यानि प्रवृत्तानि। तानि चत्वार्यार्यसत्यानि तावत् दुःखं, दुःखसमुदायः दुःखस्य कारणं वा,

---

[1] श्रीमद्भगवद्गीता, ९:३३।

[2] ibid ४:८।

[3] कठोपनिषद्, २:१.१।

दुःखनिरोधः, दुःनिरोधमार्ग इति। एतानि चत्वारि आर्यसत्यानि ज्ञायन्ते चेत् तत्त्वज्ञानं भवति। बौद्धधर्मे तत्त्वज्ञानस्य कृते एतानि चत्वारि उत्तमानि साधनानि प्रोक्तानि। इदानीम् एतेषां चतुर्णां विवरणं बौद्धदर्शनदृष्ट्या क्रियते। प्रथमं तावत् -

दुःखम् - चतुर्षु आर्यसत्येषु दुःखमिति प्रथममार्यसत्यम्। बुद्धो दार्शनिकप्रश्नस्य विवेचनं न कृत्वा साक्षात् सारनाथः इत्यस्मिन् स्थाने भिक्षुकं प्रति आर्यसत्यानि उपदिष्टवान्। तस्य वक्तव्यमासीत् संसारे दुःखमेवास्ति, दुःखेन संसारस्था जनाः सन्तप्ताः। अतः आदौ तस्योपायः प्रथमं अन्वेष्टव्यः तद्विहाय यदि दार्शनिकतत्त्वानामन्वेषणं क्रियते तर्हि तत् मूर्खस्य परिचायकः। यथा कोऽपि बाणेन विद्धो भवति तत्र यदि बाणस्य उत्पाटनं न कृत्वा केन बाणेन विद्धोऽहं, कः बाणं क्षिप्तवान् क्षत्रियः उत ब्राह्मणः, कस्मात्क्षिप्तवान्, किमर्थं क्षिप्तवान् इत्यादिषु प्रश्नेषु सत्सु प्रश्नस्य सारः एव न तिष्ठति। स प्रश्नो मूर्खस्य प्रश्न इव प्रतिभाति। भगवान् बुद्धः दार्शनिकतत्त्वेषु आत्मा, ईश्वरः, कार्यं, कारणम् इत्यादिषु प्रश्नेषु मौनमेवावलम्बितवान्। वास्तवे बुद्धस्य दर्शनं नासीत् तस्य नीतिशास्त्रमेवासीत्। तत्र आर्यसत्यानां सिद्धान्ते व्यवहारस्य अनुपमः समन्वयोऽस्ति। किन्तु भाविनि काले बौद्धानां सौत्रान्तिकाः, वैभाषिकाः माध्यमिकाः, योगाचाराः एते चत्वारो दार्शनिकाः सम्प्रदायाः सञ्जाताः। एते एव पृथक् पृथक् भिन्नानि भिन्नानि मतानि सृष्टवन्तः। भगवतो बुद्धस्य मते जगति सर्वं दुःखमेवास्ति। जगत् जीवनञ्च सर्वं दुःखमयं, जन्मनः आरभ्य मृत्युः पर्यन्तं सर्वं दुःखमयं, जन्म दुःखं, जरा दुःखं, व्याधिः दुःखं, मृत्युः दुःखम्, अप्रियसंयोगः दुःखं, प्रियविच्छेदः दुःखं पञ्चोपादानं स्कन्दमयमिदं शरीरं, मनः सर्वं दुःखपूर्णम्। केवलं बौद्धदर्शने नास्ति अपि तु भारतीयानाम् अन्येषु दर्शनेषु सर्वजनवेद्यः दुःखप्रसङ्गः आगतः। सांख्यमते दुःखं प्रत्यात्मवेदनीयं "प्रत्यत्मावेदनीयं दुःखम्" इति। आचार्यवाचस्पतिमिश्रस्य मते यदि जगति दुःखं न स्यात् तर्हि शास्त्रे जिज्ञासा एव न भवेत्। दुःखमस्ति चेत् पुरुषाः तज्जिहासितुं प्रयतमानाः भवन्ति। नैयायिकानां दुःखं द्वादश प्रमेयेषु अन्तर्भवति। तेषां मते शरीरं दुःखस्यायतनम् इन्द्रियादिः दुःखस्य साधनं किञ्च सुखं दुःखानुसक्तं, न्यायमते दुःखस्वरूपे अज्ञाते चरमप्रमेयः अपवर्गः एव न ज्ञायेत। सूत्रकारः गौतममहर्षिः दुःखमिति बाधना इति प्रावोचत् यस्य नामान्तरं पीडा तापः वा। दुःखं सर्वेषां जीवानां प्रतिकूलवेदनीयमिति। दुःखस्य व्याख्याप्रसङ्गे भगवान् तथागतः शिष्यान् प्रति अकथयत् यत् हे भिक्षवः प्रथमम् आर्यसत्यं दुःखमिति। जन्मापि दुःखं, वृद्धावस्थापि दुःखं, मरणमपि दुःखञ्च भवति। शोकः, परिवेदना, दौर्मनस्य, उपायास इत्येतत् सर्वं दुःखमयम्। अप्रियवस्तुसंयोगोऽपि दुःखं, प्रियविच्छेद ईप्सितवस्त्वप्राप्तिः दुःखम्। संक्षेपेणैवमुच्यते यत् रागद्वारा उत्पन्नाः पञ्च स्कन्धाः रूपः, वेदना, संज्ञा, संस्कारः तथा विज्ञानमित्येतत् सर्वं दुःखमयमिति। जगति सर्वस्मिन् कार्ये किञ्च सर्वस्मिन् कारणे दुःखस्य सत्तास्ति। तथाहि प्रोच्यते - **इदं खो पन भिक्खवे दुक्खं, अरिय सच्चम्। जति पि दुक्खा, जरापि दुक्खा, मरणाम्पि दुक्खं, पियेहि विप्पयोगो दुक्खो, यम्पिच्छं न लभति, तम्पि दुक्खं, संख्यित्तेन पञ्चूपादानकखन्धापि दुक्खा** (५:२)। प्रियतमा प्रियसमागमनमेव स्वजीवनलक्ष्यमिति चिन्तयित्वा नितान्तानन्दमग्नो भवति किन्तु प्रियतमायाः अपि एकस्मिन् दिने वियोगः अवश्यम् भवति। यस्य प्राप्त्यर्थं पुरुषः परिश्रमं करोति तस्यापि प्राप्तिः नितान्तं कष्टकारकं भवति। धनोपार्जने दुःखं, रक्षणे दुःखं, व्ययेऽपि दुःखं तर्हि केन प्रकारेण धनं सुखस्य कारणं भवति। तथा हि धम्मपदे उक्तकथनं नितान्तं युक्तियुक्तमस्ति यत् - अयं संसारो भवज्वलया प्रदीप्तं भवनमिव, परन्तु मूढा अज्ञानेन एतत् सर्वं न ज्ञात्वा भवज्वलया

लिप्ताः भवन्ति। किञ्च दिवसे दिवसे भोगविलासं वर्धयन्ति, दुःखञ्च प्राप्नुवन्ति। परिश्रमेण लब्धं भोग्यवस्तु सुखं विहाय दुःखं प्रददाति। अतः अस्मिन् संसारे प्रथमं सत्यरूपेण दुःखस्य प्रतीतिर्भवति। तन्मूढाः अवेविकिनः प्रतिदिनं अनुभवन्ति किन्तु वारं वारं ते दुःखेन उद्विग्ना न भवन्ति। बुद्धस्यायमनुभवो नितान्तो वास्तविकोऽस्ति। महर्षिः पतञ्जलिः सत्यमेव अकथयत् यत् - **दुःखमेव सर्वं विवेकिनः**।[1] विवेकिनः पुरुषस्य दृष्ट्या कृत्स्नं संसारो दुःखमयः। बुद्धस्यापि सा दृष्टिः आसीत्। तस्य मते सर्वस्य अनिष्टस्य कारणं दुःखमेव। अतस्तदेव चतुर्षु आर्यसत्येषु प्रथमं निर्दिष्टवान् इति।

दुःखसमुदयः - चतुर्षु आर्यसत्येषु द्वितीयमार्यसत्यमस्ति दुःखसमुदयः। समुदय इत्यस्यार्थः कारणमिति। वस्तुतः दुःखसमुदयो नाम दुःखस्य कारणम्। कारणं विना कार्यस्यास्तित्वं नास्ति। कार्यकारणयोः नियमोऽच्छेद्योऽस्ति। यतो हि जगति दुःखमस्ति अतस्तस्य कारणमपि अवश्यमेवास्ति। दुःखं भवति कार्यम्। जगत्यकस्मादकारणेन किमपि न भवति। कार्यमात्रमेव सापेक्षं भवति। किञ्चिदाश्रित्यैव कार्यमुत्पद्यते। बौद्धानामिदं सत्यं प्रतीत्यसमुत्पादननीतौ उपरि प्रतिष्ठितमस्ति। दुःखस्य कारणं भवति अविद्या, तज्जन्यमासक्तिः तृष्णा। भगवान् बुद्धो भिक्षुकान् अवदत् यत् हे भिक्षुकाः दुःखसमुदयो द्वितीयम् आर्यसत्यमिति। दुःखस्य वास्तिविको हेतुः भवति तृष्णा, यद्वारं वारं मनस्युत्पद्यते। विषयवस्तु रागेण युक्तो भवति तेन रागेण पुरुषः स्वस्य तृप्तिनिमित्तं यत्र तत्र सर्वत्र स्वतृप्तिमन्वेषति। सा तृष्णा प्रकारत्रयमस्ति यत् कामतृष्णा, भवतृष्णा, तथा विभवतृष्णा इति।

कामतृष्णा - तृष्णा भिन्नं भिन्नं विषयं कामयते तद्भवति कामतृष्णा। तदेव दुःखस्य मूलकारणमिति।

भवतृष्णा - भवतृष्णा इत्युक्ते संसारतृष्णा। संसारतृष्णापि दुःखसमुदयस्य अन्यतमं कारणमिति। संसारस्थितेः कारणं स्वयमेव भवति। कारणं हि पुरुषस्य तृष्णा संसारं सृजति। संसारतृष्णापि अन्या काचन तृष्णा भवति।

विभवतृष्णा - विभव इत्यस्यार्थ उच्छेदः संसारस्य नाश इत्यर्थः। संसारनाशेच्छापि दुःखस्य कारणं भवति। यथा संसारः शाश्वत इत्यपि अभिलाषो दुःखं तद्वत्। चार्वाकाः संसारो नश्वर इति अभिमन्यते अतस्तेषां मते शरीरे नाशे किमप्यस्तित्वं न भवति। तस्मात् कः कस्य ऋणं परिशोधति। तेषामेव अभिप्रायोऽस्ति यत् -

यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेत्।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः॥[2] इति।

अत्र या तृष्णास्ति तत्समस्तस्य विद्रोहस्य तथा विरोधस्य जनयितास्ति। एतेन कारणेन राजा राज्ञा साकं बद्धो भवति, क्षत्रियः क्षत्रियेन साकं पुत्रो मात्रा सहेति। समस्तस्य पापकर्मणः कारणं भवति एषा विभवतृष्णा। एतस्मात् कारणात् तस्करो चोर्यकार्यं करोति, कामुकः परस्त्रीगमनं करोति, धनिकः दरिद्रस्य शोषणं करोति। तृष्णामूलकोऽयं संसारः। दुःखस्योत्पत्तेः कारणं भवति तृष्णा। अतो यदि तृष्णा पुरुषाणां मनसि न स्यात्तर्हि पुरुषाणां संसारज्वालापि न भवेत् किञ्च स दुःख्यपि न भवेत्। तृष्णा सर्वोत्तमं बन्धनमिति। सा तृष्णा संसारे पुरुषं बध्नाति। तस्य प्रकारौ द्वौ स्तः

[1] योगसूत्रम् २.५.

[2] चार्वाकदर्शनम्।

हेतूपनिबन्धनश्चेति। एकं भवति प्रत्ययाधारितम् अन्यत् कारणाधारितमिति। प्रत्ययाधारितस्य दुःखकारणस्य सूत्रं भवति इदं प्रत्ययफलमिति। अत्र इदमित्युक्ते कार्यसमूहः, प्रत्यय इत्युक्ते कारणसमवायस्य परिणामः। एवं कार्यं प्रत्ययस्य फलं भवति, न तु चेतनस्य। आशय एवमस्ति यत् कारणसमूहात् कार्यमुत्पद्यते तदेव प्रत्ययोपनिबन्धनसमुदाय इति। धम्मपदे उक्तमस्ति यत् यथा ऊर्णनाभिः स्वदेहोपादानेन जालं निर्माति किञ्च स्वस्य तत्रैव बन्धनं करोति। संसारेऽपि जीवानां दशा एवमेवास्ति। जीव एव स्वतृष्णया भिन्नेषु भिन्नेषु विषयेषु रागमासक्तिमुत्पादयति। तथा आसक्त्या स्वस्य बन्धनं कृत्वा कष्टमनुभवति। बुद्धो दुःखकारणस्यानुसन्धानं कृत्वा दुःखस्य कार्यकारणशृङ्खलाः अन्विष्टवान्। ते यथा अविद्या, संस्कारो, विज्ञानं, नामरूपम्, षडायतनम्, स्पर्शः, वेदना, तृष्णा, उपादानं, भवः. जातिः, जरामरणश्चेति। एते द्वादशनिदानम्, भवचक्रम् इत्युच्यते।

दुःखनिरोधः - आर्यसत्येषु तृतीयमार्यसत्यमस्ति दुःखनिरोध इति। निरोध इत्यस्य शब्दस्यार्थः नाश उत त्यागः। दुःखं जिहासितुं शक्यते दुःखस्य अन्तोऽस्ति। अस्य सत्यस्योपरि भगवान् बुद्धोऽवदत् यत् - **"हे भिक्षुकाः दुःखनिरोधः तृष्णायाः अशेषसम्पूर्णवैराग्यः, तृष्णाया त्यागः प्रतिसर्गो मुक्तिः तथा अनालयः"**। पृथिव्याः यत् किमप्यस्ति तत् सर्वमनित्यम्। यस्योत्पत्तिः अस्ति तस्य विनाशोऽपि अस्ति - **"यद्यदुत्पत्तिमत् तत्तद् विनाशि"** इति। सर्वत्रैव कार्यकारणसम्बन्धोऽनुस्यूतोऽस्ति। यदि कारणस्य नाशो भवति तर्हि कार्यस्यापि नाशो भवति। तृष्णा अविद्याग्रस्तस्य दुःखस्य कारणम्। अतस्तृष्णायां निरोधायां तृष्णाजन्यकार्यरूपजरामरणादिदुःखमपि नश्यति। न्यायशास्त्रे उक्तमस्ति यत्कारणापाये कार्यापायः। यथा मिथ्याज्ञानस्यापाये दोषापायः, दोषस्यापाये प्रवृत्त्यपायः, प्रवृत्त्यपाये जन्मनः अपायः किञ्च जन्मनः अपाये दुःखस्यापाय इति। तृतीयार्यसत्यसम्बन्धे भगवतो बुद्धस्य कथनमस्ति यत् - **यतो हि संसारे दुःखमस्ति तथापि तस्य निवृत्तिरपि सम्भवति**। दुःखनिरोध एव बौद्धानां मते निर्वाणमिति। तन्निर्वाणं स्वप्रत्यात्मवेदनीयम्। केवलं सिद्धपुरुषाः तेषाम् अन्तरे निर्वाणं सम्पादयितुं शक्नुवन्ति। केवलं तृष्णात्यागेन जीवितकाले एव पुरुषः तत्स्वरूपं स्वतः प्राप्तुं शक्नोति। अंगुत्तरनिकाये निर्वाणप्राप्तपुरुषस्योपमा शैलेन साकं प्रदत्तास्ति। प्रचण्ड-झंझायां पर्वतः स्वस्थानात् यथा च्यूतो न भवति तद्वत् निर्वाणप्राप्तपुरुषोऽपि सदा अच्यूतः स्थिरतया तिष्ठति। रूपरस-गन्धादिविषयाः तस्य शान्तं, चित्तं न कुलपयति, नाशान्तं करोति। संसारान्मुक्तो निर्वाणपुरुषः अखण्डानन्दमखण्ड-शान्तिञ्च अनुभवति।

दुःखनिरोधगामिनी प्रतिपद् - आर्यसत्येषु चतुर्थार्यसत्यं भवति दुःखनिरोधगामिनी प्रतिपद्। प्रतिपद् इत्यस्यार्थो मार्गः। यदि च गन्तव्यं स्थानं भवेत् तर्हि तस्य मार्गोऽपि अवश्यमेव स्यात्। बौद्धानां मते निर्वाणं सर्वेषां प्राणिनां प्राप्तव्यं स्थानम्। अतस्तन्निमित्तं मार्गकल्पना न्यायसंगतमेवास्ति। एतस्य मार्गस्य नाम अष्टाङ्गिकमार्ग इति। अष्टाङ्गिकमार्गो बौद्धानां धर्मस्य आचारमीमांसायाः चरमं साधनम्। यदि पुरुष इमं मार्गमाश्रयति तर्हि स दुःखं नाशयित्वा परमं शान्तिस्थानं निर्वाणं प्राप्नोति। धम्मपदेऽपे उक्तमस्ति यत् - **मग्गानठ्ठङ्गिको सेठ्ठो** (**मार्गाणामष्टाङ्गिकः श्रेष्ठः**) इति। बौद्धधर्मानुसारेण प्रज्ञा, शीलः तथा समाधि इत्येतत् त्रयं मुख्यसाधनमिति। अष्टाङ्गिकमार्ग अस्यैव साधनत्रयस्य विकसितमार्गः। भगवान् तथागतो निर्वाणार्थं कठिनमार्गं नोपदिष्टवान्। अपि च तत्त्वज्ञानस्य विसमप्रश्ने स

मौनमेवावलम्बितवान् तदेव तस्य मते श्रेयःकरः। आचारैरेव इत्युक्ते साधने तस्य मुख्यलक्ष्यमासीत्। यदि मनुष्यैः सम्यक्तया अष्टाङ्गिकमार्गं पाल्यते तर्हि तेनावश्यमेव शान्तिः प्राप्यते। एतदेव बुद्धवचनस्य सारमिति। केवलं शब्दत एव मार्गं ज्ञायते चेत् तस्य यथोचितं फलं न प्राप्यते। तस्य व्यवहारिकजीवने प्रयोगो भवेत्। एतदेव वचनं भगवान् बुद्धः पञ्चसहस्रानां भिक्षूकानां सविधे उद्घोषितवान्। यत् -

तुम्हेहि किंचं आतप्पं अक्खातारो तथागता।

पटिपन्ना पमोक्खन्ति झायिनो मारबन्धना॥

अस्य श्लोकस्यार्थस्तावत् - हे भिक्षुकाः साधनं युष्माभिः करणीयम्। केवलमुपदेशश्रवणमात्रेण दुःखनिरोधो न भवति। तस्य निमित्तं साधनमपेक्ष्यते। तेन उक्तं यत् उपदेशदानं मम कार्यं, साधनं युष्माभिः सम्पादनीयमिति। आरुढाः मार्गगामिनः पुरुषा एव बन्धानान्मुक्तिं तथा निर्वाणं प्राप्नुवति, न तु अन्यः पुरुषः। तस्य अष्टाङ्गिमार्गे सम्यक् इति विशेषणं योजितमस्ति। तर्हि इदानीं प्रश्नः समुदेति यत् कस्यां दशायां सम्यक् इति कथनं भवति। तस्मिन् विषये मतमस्ति यत् - अन्तः मध्यता एव सम्यक्ता इति। कस्मिञ्चित् विषये अत्यधिकत्वं किञ्च निम्नत्वम् अल्पत्वं वा न युक्तम्। यथा उदाहरणरूपेण अत्यधिकं भोजनं शरीरस्य कष्टदायकं भवति। अतः उभयोः मध्यभाग एव आश्रणीयः तदेवैव प्राणिनां श्रेयःकारको भवति। एवं मध्यममार्गस्य अधिकमहत्त्वत्वात् बुद्धस्य मार्गो मध्यमप्रतिपदा मध्यममार्ग इत्यभिधीयते इति - **मग्गानट्ठङ्गिो सेठ्ठो सच्चान चतुरो पदा।**

विरागो सेठ्ठो धम्मानं द्विपदानाच्च चकखुम॥ इति।

बौद्धानाम् अष्टाङ्गिकमार्गाः दुःखस्य आत्यन्तिकनिवृत्तेः उपायः। जीवस्य पारमार्थिकल्याणाय बुद्धस्य चतुर्थार्य-सत्यस्योपदेशः। अष्टाङ्गिकमार्गस्य चतुर्थार्यसत्यम् इत्यत्र अन्तर्भावः। दुःखनिरोधमार्गः अष्टाङ्गिकमार्गः। दुःखनिरोधमार्गस्य अष्टौ अङ्गानि सन्ति यथा सम्यक् दृष्टिः, सम्यक् सङ्कल्पः, सम्यक् वाक्, सम्यक् कर्मान्तः, सम्यक् आजीवः, सम्यक् व्यायामः, सम्यक् स्मृतिः, सम्यक् समाधिः चेति। अष्टाङ्गिकमार्गः संक्षेपेण शीलः, समाधिः, प्रज्ञा इत्यप्यभिधीयते। एतेषाम् अष्टाङ्गिकमार्गाणां समासेन विवेचना क्रियते। आदौ तावत् -

सम्यक् दृष्टिः - दृष्टि इत्यस्यार्थो ज्ञानमिति। सम्यक् दृष्टिः यथार्थज्ञानं सूचयति। जीवनजगत्सम्बन्धे मिथ्यादृष्टिः दुःखस्य मूलनिदानम्। धम्मपदे उक्तमस्ति यत् अविद्याच्छन्नो जीवो मिथ्यादृष्ट्या असारं सारं, सारम् असारमिति मन्यते। तेन कारणेन जीवो वारं वारं संसारभ्रमे पतितो भवति।

सम्यक् सङ्कल्पः - पार्थिविषयं प्रति अनासक्तिः सम्यक् सङ्कल्पः। सङ्कल्पं विना किमपि महत्कार्यं न सम्पद्यते। अतएव सम्यक् दृष्टिः यथा आवश्यकी तद्वत् सम्यक् सङ्कल्पोऽपि आवश्यकोऽस्ति। सङ्कल्पविकल्पात्मकं भवति मनः। तस्माद्बुद्धिमतः पुरुषस्य प्रार्थनास्ति **"तन्मे मनः शिवसङ्कल्पमस्तु"**, मनः सर्वदा शुभसङ्कल्पे संयुक्तं भवतु। एवं सम्यक् सङ्कल्पं विना बोधिज्ञानं दुर्लभमिति।

सम्यक् वचनम् - वाक्संयमः सत्यभाषणम् सम्यक् वचनमिति। सङ्कल्पस्य कार्याय अस्माकं वाक्यमपि

सुनियन्त्रितं भवेत्। वाक्संयमोऽपरिहार्यो भवति। सर्वदा अनृतभाषणं, पिशुनवचनं, कटुकथनम् इत्यादिभ्यः पुरुषः विरतो भवेत्। उपनिषदि अस्ति यत् सङ्कल्पात्मकं मनः वाक्ये प्रतिष्ठितं भवतु - "**मनो मे वाचि प्रतिष्ठितमिति**।

सम्यक् कर्मान्तः - सुनियन्त्रिताचारणम् सम्यक् कर्मान्तःइति। सङ्कल्पसिद्ध्यर्थं केवलं वाक्संयमः पर्याप्तो न भवति न्यायसङ्गतमाचारणमपि आवश्यकमस्ति। भगवतो बुद्धस्य मते सम्यक् कर्मान्त एव पञ्चशीलः। पञ्चशीलः यथा अहिंसा, अस्तेयः, ब्रह्मचर्यः, सत्यपालनं, मादकद्रव्यवर्जनञ्चेति। पञ्चशीलः पुरुषैः अवश्यमेव पालनीयः।

सम्यक् आजीवः - सदुपाये जीविकानिर्वाहनम् सम्यक् आजीवः इत्युच्यते। पुरुषस्य जीवनस्य कृते जीविका सर्वदा महती भवेत्। सर्वदा अवधेयं यत् जीवनस्य कृते जीविका भवति न तु जीविकायाः कृते जीवनमिति। जीवनं जीविकापेक्षया महत्। पञ्चशीललङ्घनं न कृत्वा सर्वदा वासनाशून्यं जीवनं यापनीयमिति।

सम्यक् व्यायामः - कुचिन्तादूरीकरणं, सच्चिन्तासंरक्षणम् इति सम्यक् व्यायामः। वैकल्पिकभावना मनसः दूरीकरणार्थं सम्यक् व्यायामस्यावश्यकतास्ति। शरीरस्वास्थ्यनिमित्तं यथा व्यायामस्य आवश्यकता वर्तते, तद्वत् मनसोऽपि स्वास्थ्यनिमित्तं मानसिकव्यायामस्य प्रयोजनीयतास्ति। चञ्चलग्रस्थस्य मनसः बाधकशक्त्या साकं सर्वदा संग्रामश्चलति। असत् चिन्तान्वितं मनः अस्मिन् संग्रामे जयी न भवति। सम्यक् व्यायामाभ्यासेन मनसः चञ्चलता दूरीकरणीया, स्थिरता शान्तता च सम्पादनीया। तस्मात् सम्यक् व्यायामस्य आवश्यकतास्ति।

सम्यक् स्मृतिः - ज्ञानप्रदीपस्य सर्वदा प्रदीप्तं ज्वलनमेव सम्यक् स्मृतिः। बहुप्रयासेन यो दीपः प्रज्वलितः तस्य निर्वापनं कदापि न करणीयम्। साधकैः, भिक्षुभिः, मुमुक्षुभिः सर्वदा एकाग्रचित्ते जगतः तथा देहमनसः अनित्यताविषये मननं करणीयमिति। ग्राह्यत्याज्यविषये सर्वदा मनसोऽवधानता भवेत्। अनित्यतायाः सम्यक् स्मरणं निर्वाणस्य द्वारमानयति।

सम्यक् समाधिः - अष्टाङ्गिकमार्गस्यान्तिमो मार्गो भवति सम्यक् समाधिः इति। पूर्वकथितस्य सप्तमार्गाणां यथार्थोऽनुशीलनेन सत्यकामो निरन्तरप्रज्ञावान् पुरुषोऽस्मिन् मार्गे उपनीतो भवति। सम्यक् समाधेः चत्वारः स्तराः सन्ति यथा वितर्कः, विचारः, उदासीनता, प्रज्ञा चेति। सम्यक् समाधिः ज्ञानस्य तथा निर्वाणस्य द्वारम्। एतास्मादेव पुरुषः परमपुरुषार्थं निर्वाणं प्राप्नोति, दुःखञ्च जहातीति।

उपसंहारः - एतानि चत्वारि आर्यसत्यानि यथार्थतया पाल्यन्ते चेत् पुरुषो निर्वाणं प्राप्स्यति। तेन संसाररूप-दुःखस्य समूलविनाशो भविष्यति। पुरुषः स्वस्वरूपं प्राप्नोति,. किञ्च परमसुखं परमानन्दञ्च प्राप्नोति। साधनं सम्यक्तया परिपाल्यते चेत् साध्यं स्वत एव सिध्यति। पुरुषैः साध्यं स्थिरीकृत्य साधने एव यत्नः करणीयः। भगवान् बुद्धोऽपि दार्शनिकतत्त्वे आदरं न चकार। तस्य दृष्टिः परमसाधनैवासीत्। तस्य मते दार्शनिकतत्त्वे केवलं विचार एव भवति। तेन नाना गतिः तर्कमूलकविचारा एव सिध्यन्ति न तु परमसाध्यम् निर्वाणः। एतद्वचनं श्रीमद्भगवद्गीतायामपि श्रूयते -

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।

बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥[1]

अपि च - **यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।**

वेदवादरताः पार्थ नान्यदस्तीति वादिनः॥[2]

तस्मात् भगवान् बुद्धः साक्षात् भिक्षुकान् परमसाध्यस्य कृते परमसाधनमुपदिष्टवान्। बौद्धानाम् एतानि चत्वार्या सत्यानि इतरेषु दर्शनेषु समानतया दृश्यन्ते। दुःखं जिहासार्थमेव अन्येषामपि शास्त्राणां तथा दर्शनानां प्रवृत्तिः। जननमरणजराव्याधिरूपं यत् दुःखं तस्योपशमनं साधनस्य मूललक्ष्यमिति। तदेव भिन्नेषु भिन्नेषु शास्त्रेषु आस्तिकनास्तिकदर्शनेषु प्रतिपाद्यते।

<u>सहायकग्रन्थसूची</u>

1. उपाध्यायः आचार्यबलदेवः (पो० बा०. नं० १०६९) बौद्धदर्शनमीमांसा, चोखम्बा विद्याभवन, वाराणसी.
2. राधाकृष्णन् डा० (२०१२) भारतीय दर्शन (प्रथमखण्डः), राजपाल एण्ड सन्ज, कस्मीरी गेट, दिल्ली.
3. रामचन्द्रमिश्रः आचार्यः (पो० बा०. नं. 2113) संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवनम्, वाराणसी.
4. (वि०. सं० २०६५) कठोपनिषद् (code 578) गीताप्रेस, गोरखपुर.
5. (वि० सं० २०५७) ब्रह्मसूत्रम् (पारायणसंस्करणम्), कैलासाश्रम (हिमालय), ऋषिकेश.
6. मिश्रः श्रीवाचस्पतिः (२११३) सांख्यतत्त्वकौमुदी (व्याख्याकारः पं० ज्वाला प्रसाद गौड), चौखम्बा सुरभारती प्रकाशन, वाराणसी.
7. त्रिपाठी यदुपतिः, भट्टाचार्यः जनेशरञ्जनः (२०१७) साम्मानिक संस्कृत वर्तिका वि. एन्. पाब्लिकेशन, कलकाता.

<u>Author's Detail:</u>

Address: सहाकार्यध्यापकः, नेताजी महाविद्यालयः
Vill - Telua, P.O - Bhalia,
Dist - Hooghly, State – West Bengal 712615
Email: sujit.rkmvu@gmail.com

****

[1]. श्रीमद्भगवद्गीता २:४१।

[2] ibid २:४२।

अलङ्कार चिन्तामणि मे वर्णित महाकाव्य के वर्ण्य विषयों का बृहत्त्रयी में अनुपालन

सोनाली बाजपेई

शोधसार

संस्कृत महाकाव्यों के इतिहास में कालिदासोत्तर परम्परा के प्रतिनिधि तीन महाकाव्यों को काव्यरसिक पण्डितमण्डली में बृहत्त्रयी कहकर प्रतिष्ठित किया गया है। समीक्षकों के अनुसार बृहत् शब्द का प्रयोग महाकाव्य के कलेवर को दृष्टि में रखकर किया गया है, प्रस्तुत शोधपत्र में अजितसेन विरचित अलङ्कार चिन्तामणि में उल्लेखित महाकाव्य के वर्ण्यविषयों का बृहत्त्रयी (किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम्) में अनुपालन का विवेचन किया गया है।

कूटशब्द - काव्यशास्त्र, अलङ्कार चिन्तामणि, बृहत्त्रयी, किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितम्, वर्णन, वर्ण्यविषय।

****

सृष्टि के आदिकाल में मानव ने उत्सवों के प्रसंगों, भावों की उद्वेलनता, धार्मिक कृतकृत्यों, अपनत्व के मार्मिकता में नृत्य-गान किए होंगे। शनैः शनैः सभ्यता के विकास क्रम में इन भावों को लिपिबद्ध किया गया तथा एक विस्तृत काव्य परम्परा अस्तित्व में आयी। काव्यशास्त्र में दृश्य श्रव्य दोनों रचनाओं को काव्य की संज्ञा से अभिषिक्त किया गया है –

दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।[1]

दृश्य काव्य को पुनः दो भागों में विभाजित किया गया है, रूपक तथा उपरूपक। जिसमें रूपक की संख्या दस तथा उपरूपक की सङ्ख्या अष्टादश प्राप्त होती है, श्रव्यकाव्य के भी तीन भेद प्राप्त होते हैं – पद्यकाव्य, गद्यकाव्य तथा चंपू। जिसमें छन्दोविहीन रचना को गद्यकाव्य, छन्दोबद्ध रचना पद्यकाव्य तथा गद्यपद्य मिश्रित रचना चम्पूकाव्य कही जाती है। गद्यकाव्य, कथा एवं आख्यायिका के भेद से दो प्रकार का होता है तथा पद्यकाव्य तीन प्रकार का है- महाकाव्य, खण्डकाव्य तथा मुक्तक काव्य। सामान्य लक्षणानुसार वह कवि जो आकार की दृष्टि से बृहद् हो, उसे महाकाव्य कहा जाता है। अग्निपुराण में, भामह ने काव्यालङ्कार में, दण्डी ने काव्यादर्श में तथा विश्वनाथ ने साहित्य दर्पण में महाकाव्य के लक्षणों का विस्तृत विवेचन किया है, इसके अतिरिक्त अजितसेन के अलङ्कार चिन्तामणि में महाकाव्य का विस्तृत लक्षण प्राप्त होता है। कालिदासोत्तर काल में इस देश में ज्ञानविज्ञान की विभिन्न शाखाओं, शास्त्रों, कलाओं, दर्शन और चिंतन का अभूतपूर्व विकास हुआ, जिसका प्रतिफलन काव्य रचनाओं में होना अवश्यम्भावी था। राजसभा में विद्वानों तथा कलाकारों का साहचर्य, पाण्डित्य प्रदर्शन, शास्त्रार्थ और पारम्परिक प्रतिद्वन्द्विता इन सबका प्रभाव महाकवियों की रचना पर स्वभावतः होना ही था। विचित्रमार्ग के अनुकरण तथा काव्य के आकार के आधार पर संस्कृत साहित्य में भारवि कृत किरातार्जुनीयम्, माघ विरचित शिशुपालवधम् तथा तीसरे क्रम में श्रीहर्ष विरचित् नैषधीयचरितम् नामक

---

[1] साहित्यदर्पण, 6:1

महाकाव्य को बृहत्त्रयी के अन्तर्गत ग्रहण किया जाता है। अलङ्कार चिन्तामणि में महाकाव्य का विस्तृत लक्षण प्राप्त होता है। तानि वर्ण्यानि कथ्यन्ते महाकाव्यादिषु स्फुटम् - **कविवृन्दारकैर्यानि प्रबन्धेषु बबन्धिरे।**

भुभुक्पत्नी पुरोधाः कुलवरतनुजामात्यसेनेशदेश-

ग्रामश्रीपन्तनाब्जाकरशरधिनदोघानशैलाटवीद्धाः।

मन्त्रो दूतः प्रयाणं समृगयतुरगभर्त्विनेन्द्वाश्रमाजि

श्रीवीवाहा वियोगास्सुरतसुरापुष्कला नर्मभेदाः॥[1]

(क) राजकीय वर्ण्यविषय - महाकाव्य में राजकीय गुणों में कीर्ति, प्रताप, दुष्टनिग्रह, धीरता, उदारता, साम-दाम-दण्ड विभेद इत्यादि उपायों का प्रयोग राजा के चरित्र में करने का वर्णन किया जाए। इसी प्रकार महिषी, राजकुमार, राजपुरोहित, राजमन्त्री, सेनापति, देशादि का वर्णन महाकाव्य में अवश्य होना चाहिए।[2] किरातार्जुनीयम् में राजा द्वारा संयमित व्यवहार को अपनाने की शिक्षा प्राप्त होती है -

शिवमौपयिकगरीयसीं फलनिष्पत्तिमदूषितायतीम्।

विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः॥[3]

शिशुपालवधम् में श्रीकृष्ण के द्वन्द्वचित्त की स्थिति में बलराम व उद्धव मन्त्री का ही कार्य करते हैं। नृपवर्णन में श्रीकृष्ण की सुन्दरता का तथा नृप युधिष्ठिर द्वारा आयोजित राजसूय यज्ञ का वर्णन भी प्राप्त होता है। दान, दया, क्षमादि राजा के चरित्र के स्वाभाविक गुण होते है, जिनका चित्रण कवि द्वारा सुष्ठुरूपेण किया गया है।[4] इसी प्रकार नैषधीयचरितम् के मङ्गलाचरण में राजा नल के महान् चरित्र का उल्लेख प्राप्त होता है -

निपीय यस्य क्षितिरक्षिणः कथां तथाद्रियन्ते न बुधास्सुधामपि।

नलस्सितच्छत्त्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः॥[5]

नल की विद्वता की तुलना शिव के शास्त्ररूपी तीसरे नेत्र से प्राप्त होती है। इसीप्रकार रानी दमयन्ती की अप्रतिम सुन्दरता का वर्णन भी प्राप्त होता है, कवि सम्पूर्ण सृष्टि के कमलों से दमयन्तीमुख के सौन्दर्य को श्रेष्ठ सिद्ध करना चाहता है। कमलनाल से भी श्रेष्ठ भुजयुग्म का वर्णन करने के साथ कवि नल तथा दमयन्ती की सदृशता प्रमाणित करता है।[6]

---

[1] अलङ्कारचिन्तामणि, 1:24-25.

[2] Ibid. 1:4-9.

[3] किरातार्जुनीयम्, 2:35.

[4] शिशुपालवधम् 8:15, 14:34, 41-44.

[5] नैषधीयचरितम् 1:1.

[6] Ibid. 1:6, 27/2:29.

ख) देश-काल के वर्ण्यविषय - देश-काल के वर्ण्यविषय के अन्तर्गत देश में पद्मरागादि मणियों, नदी, स्वर्ण, अन्नभण्डार, विशालभूमि, ग्राम, जनबाहुल्य, नहर, अन्नादि, सरोवर, लता, वृक्ष, नगर परकोटा, दुर्गप्राचीर, अट्टालिका, तोरण, ध्वजा, महलादि का वर्णन प्राप्त होता है।[1] किरातार्जुनीयम् के चतुर्थ सर्ग में अर्जुन के प्रस्थान मार्ग की दशाओं का वर्णन प्राप्त होता है - **ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणाम्।**

उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां भुवम्॥[2]

अर्जुन द्वारा ग्राम के समीप अनिन्द्यकर्म करने वाले लोगों से युक्त आश्रम के मण्डप के समान विकसित पुष्पों से निर्मित निवासवृक्षों को देखने तथा सरोवर के सुन्दर दृश्यों का वर्णन प्राप्त होता है।[3] शिशुपालवधम् के तृतीय सर्ग में द्वारकापुरी का रोचक वर्णन प्राप्त होता है -

त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसंपत्प्रसरस्य सीमा।

अदृश्यतादर्शतलामलेषु च्छायेव या स्वर्जलधेर्जलेषु॥[4]

द्वारकापुरी का चञ्चल समुद्र के जलप्रवाहों से उछलते हुये शङ्ख समूहों से व्याप्त सुमेरु के शिखर के अनुकरण का, रत्नों के भण्डार का, अङ्गनाओं का तथा द्वारकापुरी की तुलना अमरावती से करने का वर्णन प्राप्त होता है।[5] इसी प्रकार निषध देश के वन में स्थित सरोवर की तुलना मन्थन से भयभीत समुद्र से की गई है -

अथ स्वमादाय भयेन मन्थनाच्चिरत्नरत्नाधिकमुच्चितं चिरात्।

निलीय तस्मिन्निवसन्नपांनिधिर्वने तडागो ददृशेऽवनीभुजा॥[6]

नगरी वर्णन में कुण्डिनपुरी का उल्लेख प्राप्त होता है, जहाँ कुण्डिनपुरी सूर्योदय तथा अस्त के मध्य देदीप्यमान सूर्यकान्तमणि के प्रकारों से उत्पन्न अग्निपुञ्ज से परिवेष्टित हो बाणासुरनगरी की श्रेष्ठता को धारण कर लेती है।[7] तथा निषधनगरी का पोषितभर्तृका नायिका के रूप में वर्णन प्राप्त होता है -

मसारमालावलितोरणां पुरीं निजाद्वियोगादिव लम्बितालकाम्।

ददर्श पश्यामिव नैषधः पथामथाश्रितोद्ग्रीविकमुन्नतैर्गृहैः॥[8]

इसी प्रकार अन्य वर्णन भी प्राप्त होते हैं।[9]

---

[1] अलङ्कारचिन्तामणि, 1:37-39

[2] किरातार्जुनीयम् 4:1

[3] Ibid. 4:19, 5.

[4] शिशुपालवधम्, 3:35

[5] Ibid. 3:37, 42, 46, 62

[6] नैषधीयचरितम् 1:107

[7] Ibid. 2:87

[8] नैषधीयचरितम्,16:121

[9] नैषधीयचरितम्, 2:101, 104

ग) प्राकृतिक वर्ण्यविषय - प्राकृतिक वर्ण्यविषय के अन्तर्गत सरोवर में कमल, गजक्रीडा, हंसहंसी, चक्रवाक, भ्रमर, उद्यानलता, पुष्पादि का, समुद्र में विद्रुम, मणि, तरंग, मकर, चन्द्रोदयजन्य हर्ष, कृष्णकमल, गर्जनादि का, नदी में हंसमिथुन, रत्नादिवर्णन, वन में सर्प सिंहादिवर्णन तथा सूर्य चन्द्रमादि वर्णन प्राप्त होता है।[1] किरातार्जुनीयम् के पञ्चमसर्ग में हिमालय वर्णन, इन्द्रकील पर्वत का वर्णन प्राप्त होता है -

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया।
अभिययौ स हिमाचलमुच्छ्रितं समुदितं नु विलङ्घयितुं नभः॥[2]

हिमालय के शिखर रत्नराशियों से रहित नही हैं, इसकी कन्दराएं लताभवनों से न्यून नही हैं तथा हिमालय की नदी-वधुएं सिकतामय तट और विकसित कमलों से रहित नहीं हैं, यहाँ कोई भी वृक्ष ऐसा नही है, जो पुष्पित न हो।[3] इसी प्रकार इन्द्रकील पर्वत पर वृक्षों की शाखाओं पर भ्रमर गुञ्जन अर्जुन की जयध्वनि के समान बताया गया है -

तमनिन्द्यवन्दिन इवेन्द्रसुतं विहितालिनिक्वणजयध्वनयः।
पवनेरिताकुलविजिह्मशिखा जगतीरुहोऽवचकरुः कुसुमः॥[4]

नदी में लीलाएं करते गजराज का वर्णन प्राप्त होता है, तैरती मछलियां नदी के नेत्रसम प्रतीत होती हैं तथा चन्द्रमा की कलाएं जिस प्रकार अन्धकार को दूर करती हैं उसी प्रकार अर्जुन द्वारा इन्द्रियों को बाह्य विषयों से आकृष्ट कर आत्माराम होकर पापमय अज्ञान को नष्ट करते हुए प्रतिदिन चन्द्रमा के ही समान वृद्धि को प्राप्त करने का वर्णन मिलता है।[5] शिशुपालवधम् के तृतीय सर्गान्तर्गत समुद्र का वर्णन प्राप्त होता है -

लक्ष्मीभृतोऽम्भोधितटाधिवासान् द्रुमानसौ नीरदनीलभासः।
लतावधूसम्प्रयुजोऽधिवेलं बहूकृतान् स्वानिव पश्यति स्म॥[6]

चन्द्रमा के उदय होने पर समुद्र में आने वाले ज्वार-भाटे से जल ऊपर उठता है जिससे समुद्र तट पर मोती फैल जाते हैं जिससे ऐसा प्रतीत होता है कि समुद्र ने सूर्यकिरणों का इतना अधिक पान कर लिया कि अन्ततः उनका वमन करना पडा।[7] किरातार्जुनीयम् की भांति शिशुपालवधम् में रैवतक पर्वत का वर्णन प्राप्त होता है, रैवतक पर्वत पर ही सूर्यकान्तमणि का भी वर्णन प्राप्त होता है -

---

[1] अलङ्कारचिन्तामणि, 1:40-45, 55

[2] किरातार्जुनीयम् 5-1

[3] Ibid. 5:7

[4] Ibid. 6;2

[5] किरातार्जुनीयम्, 6:11, 16, 20

[6] शिशुपालवधम्, 3:71

[7] Ibid. 3:72

क्रान्तं रुचा काञ्चनवप्रभाजा नवप्रभाजालभृतां मणीनाम्।

श्रितं शिलाश्यामलताभिरामं लताभिरामन्त्रितषद्पदाभिः॥[1]

इसी प्रकार नैषध में सरोवर की कमलिनी में अप्सरत्व की कल्पना की गई है -

प्रकाममादित्यमवाप्य कण्टकैः करम्बितामोदभरं विवृण्वती।

धृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाप्सरयिता॥[2]

तथा उसी सरोवर में स्वर्णहंस भी परिलक्षित होता है -

पयोधिलक्ष्मीमुषि केलिपल्वले रिरंसुहंसीकलनादसादरम्।

स तत्र चित्रं विचरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः॥[3]

इसी प्रकार अनेक वर्णन प्राप्त होते है।[4]

घ) युद्धादि के वर्ण्यविषय - युद्धादि वर्ण्यविषयान्तर्गत मन्त्र में कार्यारम्भ उपाय, पुरुष तथा द्रव्य सम्पत्ति, देश-काल विभाग, विघ्न प्रतीकार, कार्यसिद्धि के पञ्चाङ्गों का, साम, दान, दण्ड, भेद, चार उपायों, प्रभाव,उत्साह तथा मन्त्र शक्तियों का, दूत के वाणी चातुर्य का, शत्रुविजय हेतु यात्रा का, रणभेरी, कोलाहल, पृथ्वी कम्पन, रथ, हाथी, हिरणों का भयपलायनादि, अश्व, गज, तूर्यादि वाद्यों की ध्वनि, छत्रभङ्ग, कवचभेदन, रथादि का वर्णन प्राप्त होता।[5] किरातार्जुनीयम् के प्रथम सर्ग में वनेचर रूपी दूत की गम्भीर वाणी तथा बुद्धि के दर्शन प्राप्त होते हैं -

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।

स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे॥[6]

अर्जुन के तपस्या प्रस्थान में स्वयं प्रकृति ने दिव्य युद्ध स्तिथियों का निर्माण किया था।[7] इसी प्रकार पन्द्रहवें सर्ग में अर्जुन के शौर्य से शबरसेना का भयभीत होना परिलक्षित होता है -

अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसु।

भेजे दिशः परित्यक्तमहेष्वासा च सा चमूः॥[8]

---

[1] Ibid. 4:3

[2] नैषधीयचरितम्, 1:115

[3] Ibid. 1:117

[4] Ibid. 11:106/19-33

[5] अलङ्कारचिन्तामणि 1-45, 46, 47, 48, 49, 58

[6] किरातार्जुनीयम् 1-3.

[7] किरातार्जुनीयम् 3-60

[8] किरातार्जुनीयम् 15-1

अर्जुन को चन्द्रेश अर्थात् शिवपुत्र कार्तिक को पीड़ित करने वाला बताया गया है। इसी प्रकार अनेक वर्णन प्राप्त होते हैं।[1] षोडश सर्ग में युद्ध का अद्भुत् वर्णन प्राप्त होता हैं।[2] पराक्रमी व्यक्ति से शत्रु का भयभीत होना स्वाभाविक गुण हैं तथा भयभीत हुए व्यक्ति का तेज नष्ट होता है, तेजविहीन व्यक्ति बुझे हुए दीपक की भांति उत्साह छो़ड देता है -

दृष्टावदानाद्व्यथतेऽरिलोकः प्रध्वंसमेति व्यथिताच्च तेजः।
तेजोविहीनं विजहाति दर्पः शान्तार्चिषं दीपमिव प्रकाशः॥[3]

इसीप्रकार शिशुपालवधम् में षड्गुण, त्रिशक्त्यादि का वर्णन प्राप्त होता है -

षड्गुणाः शक्तयस्तिस्त्र सिद्धयश्चोदयास्त्रयः।
ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोप्यलम्॥[4]

द्वितीय सर्ग में राजा द्वारा राजनीति में प्रयोग किये जाने कर्तव्याकर्तव्य का विस्तृत उल्लेख प्राप्त होता है।[5] तृतीय सर्ग में श्रीकृष्ण की सेना का तथा सप्तदश सर्ग में श्रीकृष्ण के तिरस्कार द्वारा सभा के क्षोभ का वर्णन प्राप्त होता है।[6] नैषधीयचरितम् में अश्वों द्वारा इतनी धूल उडाई जाती है जो समुद्र को पाटने में भी समर्थ होती है -

प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायनाम्।
इतीव वाहैर्निवेगदर्पितैः पयोधिरोधक्षममुत्थितं रजः॥[7]

द्वादश सर्ग में स्वयंवर में पधारे राजाओं के वर्णनक्रम में वीररस युक्त युक्तियों का समुचित प्रयोग कवि द्वारा किया गया है।[8]

ङ) ऋतुओं का वर्ण्यविषय - ऋतुओं के वर्ण्यविषय में वसन्त ऋतु में दोला, मलयानिल, कुड्मलोत्पत्ति, आम्र, मधुक, वृक्षादि, का, ग्रीष्मऋतु में मल्लिका, ऊष्णता, सरोवर, पथिक, शुष्कता, मृगतृष्णा, जलक्रीडा करती नारियों का, वर्षाऋतु में मेघ, मयूर, झंझावात, हंसों का निर्गमन, केतकी-कदम्बादि की कलिकाओं का, शरदऋतु में चन्द्र-सूर्य की स्वच्छ किरणों का, हेमन्त में लताओं, मुनियों की तपस्यादि का वर्णन प्राप्त होता है।[9] किरातार्जुनीयम् के चतुर्थ सर्ग में शरदऋतु का का बृहद् वर्णन प्राप्त होता है -

---

[1] किरातार्जुनीयम् 15-5, 37

[2] किरातार्जुनीयम् 16-2, 7, 8

[3] किरातार्जुनीयम् 17-16

[4] शिशुपालवधम् 2-2

[5] शिशुपालवधम् 2-27, 81, 82

[6] शिशुपालवधम् 3-26, 27/17-21

[7] नैषधीयचरितम् 1-69

[8] नैषधीयचरितम् 12-10, 11, 18, 20

[9] अलङ्कारचिन्तामणि 1-50, 51, 52, 53, 54, 55

विनम्रशालिप्रसवौघशालिनीरपेतपङ्कासससरोरुहाम्भसः।

ननन्द पश्यन्नुपसीम स स्थलीरूपायनीभूतशरद्गणश्रियः॥[1]

शरद की धूप में पुष्पित पुष्पों की तुलना स्त्रियों के ओष्ठवर्ण से की गई है, इस ऋतु में बलाकाएं नही उड़ती हैं, इन्द्रधनुष धारण करने वाले मेघ भी नही घुमड़ते तथापि आकाश उत्कृष्ट शोभा को धारण कर रहा है -

पतन्ति नास्मिन्विशदाः पतत्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः।

तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणम्॥[2]

इसीप्रकार सुराङ्गनाओं के जलविहार का वर्णन प्राप्त होता है –

ह्रदाम्भसि व्यस्तवधूकराहतेरवं मृदङ्गध्वनिधीरमुज्झति।

मुहुः स्तनैस्तालसमं समाददे मनोरमं नृत्यमिव प्रवेपितम्॥[3]

शिशुपालवधम् के षष्ठसर्ग में षड्ऋतुओं का वर्णन प्राप्त होता है, रैवतक पर्वत पर श्रीकृष्ण भगवान के विहार के प्रसङ्ग में ऋतुवर्णन का अद्भुत् चित्र कवि द्वारा दर्शाया गया है, यमकादि अलङ्कारों से युक्त पद्यों में भगवान श्रीकृष्ण की सेवा करने के लिये, वृक्षों ने अपने अनुसार पल्लव तथा पुष्पादि की शोभा उत्पन्न किये हुये वसन्तादि ऋतु समूह ने एक साथ अपने-अपने चिह्नों को प्रकट किया -

अथ रिरंसुममुं युगपद्गिरौ कृतयथास्वतरुप्रसवश्रिया।

ऋतुगणेन निषेवितुमादधे भुवि पदं विपदन्तकृतं सताम्॥[4]

तथापि षड्ऋतुओं का वर्णन एकसाथ करना अशक्य होने से वसन्तादि ऋतुओं का क्रम से वर्णन प्राप्त होता है -

विलुलितालकसंहतिरामृशन्मृगदृशां श्रमवारि ललाटजम्।

तनुतरङ्गततिं सरसां दलत्कुवलयं वलयन्मरुदाववौ॥[5]

शिशुपालवधम् के षष्ठसर्ग के एकविंशति श्लोको में वसन्तऋतु का, तत्पश्चात् ग्रीष्मऋतु का, षोडश श्लोकों में वर्षाऋतु का, त्रयोदश श्लोकों में शरदऋतु का, द्वादश श्लोकों में हेमन्तऋतु का, पञ्च श्लोकों में शिशिरऋतु का क्रमपूर्वक वर्णन प्राप्त होता है - **विलुलितालकहंसतिरामृशन्मृगदृशां श्रमवारि ललाटजम्।**

तनुतरङ्गततिं सरसां दलत्कुवलयं वलयन्मरुदाववौ॥

रवितुरङ्गतनूरुहतुल्यतां दधाति यत्र शिरीषरजोरुचः।

उपययौ विदधन्नवमल्लिकाः भुचिरसौ चिरसौरभसम्पदः॥

---

[1] किरातार्जुनीयम् 4-2

[2] किरातार्जुनीयम् 4-23

[3] किरातार्जुनीयम् 8-43

[4] शिशुपालवधम् 6-1

[5] शिशुपालवधम् 6-3

स्फुरदधीरतडिन्नयना मुहुः प्रियनिवागलितोरूपयोधरा।

जलधरावलिरप्रतिपालितस्वसमया समयाञ्जगतीधरम्॥

स विकचोत्पलचक्षुषमैक्षत क्षितिभृतोऽङ्कगतां दायितामिव।

शरदमच्छगलद्वसनोपमाक्षमघनामघनाशनकीर्तनः॥

गजपतिद्वयसीरपि हैमनस्तुहिनयन् सरितः पृषतां पतिः।

सलिलसन्ततिमध्वगयोषितामतनुतातनुतापकृतं दृशाम्॥

कुसुमयन् फलिनीरलिनीरवैर्मदविकासिभिराहितहुङ्कृतिः।

उपवनं निरभत्सर्यत प्रियावियुवतीर्युवतीः शिशिरानिलः॥[1]

कवि द्वारा सम्पूर्ण षष्ठसर्ग में षड्ऋतुओं का अद्भुत वर्णन किया गया है।[2] इसी प्रकार नैषधीयचरितम् में राजा नल जब उपवन में भ्रमण हेतु जाते हैं, तब वहां वसन्तऋतु के लक्षणों का ही चित्र कवि द्वारा प्रस्तुत किया जाता है -

रसालसालः समदृश्यतामुना स्फुरद्द्विरेफारवरोषहुङ्कृतिः।

समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्ज्जवाभियम्॥[3]

कामपीडित दमयन्ती के लिये हेमन्तऋतु के भी दिन दीर्घ होने लगे तथा ग्रीष्मऋतु की पूर्णता पर भी रातें दीर्घ होने लगी थी - **अहो अहोर्भिर्महिमा हिमागमेऽप्यतिप्रपेदे प्रति तां स्मरार्दिताम्।**

तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे॥[4]

इसी प्रकार ऋतुओं के अनेक वर्णन प्राप्त होते हैं।

च) **श्रृङ्गारिक वर्ण्यविषय** - काव्यशास्त्रीय ग्रन्थों में श्रृङ्गार के दो भेद पाये जाते हैं संयोग तथा विप्रलम्भ। संयोग श्रृङ्गार में कण्ठालिङ्गन, करधनी-कङ्कण-मञ्जीर की ध्वनि तथा स्त्री का पुरुष के समान आचरण अर्थात् विपरीत रति का तथा विप्रलम्भ वर्णन में उष्णनिःश्वास, मानसिक चिन्ता, शरीर की दुर्बलता, शिशिरऋतु में गर्मी की अधिकता, रात्रि की दीर्घता, रात्रि जागरण का वर्णन किया जाता है।[5] किरातार्जुनीयम् में श्रृङ्गाररस का भी समुचित विवेचन परिलिक्षत होता है, षष्ठसर्ग में अर्जुन की परीक्षा हेतु इन्द्र द्वारा अप्सराओं का भेजना, सप्तम सर्ग में गन्धर्वों सहित अप्सराओं का स्वर्ग से इन्द्रकील के लिये प्रस्थान, अष्टम सर्ग में देवाङ्गनाओं का वनविहार एवं जलक्रीडा का, नवम सर्ग में सन्ध्याकाल,

---

[1] शिशुपालवधम् 6-3, 22, 25, 42, 55, 62

[2] Ibid. 6-27, 28, 29, 30, 44, 46, 57, 63, 67

[3] नैषधीयचरितम् 1-8

[4] Ibid. 1-41

[5] किरातार्जुनीयम् 1-61, 62, 64

अन्धकार, चन्द्रोदय एवं विलास-वर्णन, दशम सर्ग में अप्सराओं का अर्जुन को लुभाने हेतु समीप आना आदि वर्णन प्राप्त होता है।[1]

शिशुपालवधम् में भगवान श्रीकृष्ण अपनी सेना सहित रैवतक पर्वत पर विहार हेतु प्रस्थान करते हैं, षष्ठसर्ग में षड्ऋतुओं के वर्णन में शृङ्गारिक चेष्टाओं का अद्भुत चित्र कवि द्वारा प्रस्तुत किया गया है, सप्तम् सर्ग में वनविहार में रमणियों का विलास परिलक्षित होता है, इसी में जलविहारादि क्रियाएं भी वर्णित हैं, नवम् सर्ग में रमणियों की सुरतक्रिया का उल्लेख प्राप्त होता है, दशम सर्ग में मद्यपान-वर्णन में सम्भोग शृङ्गार का विस्तृत चित्र प्रस्तुत किया गया है, एकादश सर्ग में प्रभात वर्णन में कामियों के सुरतालस्य का वर्णन प्राप्त होता है।[2] नाट्यशास्त्र में वर्णित व्यभिचारीभावों का समुचित प्रयोग कवि द्वारा काव्य में दर्शाया गया है, विभिन्न प्रकार की नायिकाओं के लक्षण भी यहां प्राप्त होते हैं यथा-खण्डिता, मुग्धा, कलहान्तरिता, स्वाधीनपतिका, नवोढा आदि। रस के उद्भावक विभिन्न अनुभावो का भी अप्रतिम चित्र कवि द्वारा प्रस्तुत किया गया है यथा-श्रमानुभाव, अङ्गभङ्गादि।[3] बृहत्त्रयी का तृतीय महाकाव्य नैषधीयचरितम् स्वयं शृङ्गार रस प्रधान महाकाव्य है, शृङ्गार के विप्रलम्भ तथा संयोग दोनो पक्षों का नैषध में सुन्दर चित्रण प्राप्त होता है। रतिकाम के परिणयोत्सव पर सहस्रधारों में बरसते देव से तुष्टि की कामना करते हुए कवि ने इस काव्य की आशीर्वादात्मक समाप्ति की है।

छ) माङ्गलिक वर्ण्यविषय - माङ्गलिक वर्ण्यविषयान्तर्गत जन्मकल्याण में गर्भावतरणादि का जन्माभिषेक, समदैरावत, सुमेरुपर्वतादि का, विवाह में स्नान, शरीर की स्वच्छता, सुमधुर गीत, विवाहमण्डप, वेदी, नाटक, नृत्यादि का, स्वयंवर वर्णन में नगाडा, मञ्च, कन्या तथा पधारे हुए राजाओं के वंश, प्रसिद्धि, यशादि का वर्णन करना चाहिये।[4] किरातार्जुनीयम् में उपरोक्त विषय उपलब्ध नही होते हैं। परन्तु अर्जुन की तपस्या द्वारा प्रसन्न शिव का शस्त्र प्रदान करना भी माङ्गलिक विषयों के अन्तर्गत आता है -

इति निगदितवन्तं सूनुमुच्चैर्मघोनः प्रणतशिरसमीशः सादरं सान्त्वयित्वा।
ज्वलदनलपरीतं रौद्रमस्त्रं दधानं धनुरूपपदमस्मै वेदमभ्यादिदेश॥[5]

शिशुपालवधम् में भी उपरोक्त माङ्गलिक विषय अप्राप्य हैं तथापि युधिष्ठिर द्वारा आयोजित यज्ञ का वर्णन माङ्गलिक वर्णन ही है -

धन्योऽसि यस्य हरिरेष समक्षेव दूरादपि क्रतुषु यज्वभिरिज्यते यः।
दत्त्वार्घमत्रभवते भुवनेषु यावत् संसारमण्डलमवाप्नुहि साधुवादम्॥

---

[1] Ibid. 7-14/8-14, 29/9-59, 76/10-58

[2] शिशुपालवधम् 7-3, 5, 6, 7, 8, 9

[3] शिशुपालवधम् 7-13, 14, 44, 71, 72

[4] अलङ्कारचिन्तामणि 1-59, 60, 63

[5] किरातार्जुनीयम् 18-44

बृहत्त्रयी के तृतीय प्रबन्ध नैषधीयचरितम् में विवाह तथा स्वयंवर का अद्भुत् वर्णन प्राप्त होता है।

रथैरथायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च दृष्टपाराः।

स्वयंवरं शम्बरवैरिकायत्यूहश्रियः श्रीजितयक्षराजा॥[1]

दमयन्ती के सौन्दर्य पर मोहित हो चारो दिक्पाल भी स्वयंवर में पधारे तथा देवादि सभी स्वयंवरार्थियों का अनुरूप वर्णन भगवती वाणी ही कर सकती थी अतः दमयन्ती को राजाओं के गुण बताने हेतु स्वयं शारदा पधारी थी।[2] दमयन्ती के समक्ष नागराज वासुकि के गुणों का वर्णन सरस्वती इसप्रकार करती है -

पाणौ फणीभजति कङ्कणभूयमैशे सोऽयं मनोहररमणीरमणीयमूर्त्तिः।

कोटिरबन्धनधुनुर्गुणयोगपट्टव्यापारपारगमुं भज भूतभर्त्तुः॥

सम्पूर्ण एकादश सर्ग में विभिन्न राजाओं का इसीप्रकार का वर्णन प्राप्त होता है। एकादश, द्वादश, त्रयोदश व चतुर्दश सर्ग में स्वयंवर लीलाओं का ही वर्णन प्राप्त होता है, पञ्चदश सर्ग में विवाह सम्बन्धी माङ्गलिक कार्यों का सजीव चित्र कवि द्वारा प्रस्तुत किया गया है।[3] इसप्रकार अजितसेन विरचित् अलङ्कार चिन्तामणि में वर्णित महाकाव्य में वर्णित विषयों का बृहत्त्रयी में समुचित प्रयोग प्राप्त होता है। पृथक एवं अपेक्षाकृत रूढ, बौद्धिक आधारभूमि के पश्चात् भी भारवि, माघ तथा श्रीहर्ष के महाकाव्यों में काव्य की जीवन्तता तथा हृदयस्पर्शी मार्मिकता सुरक्षित रही है तथा दुर्घट भावों, पदविन्यासों ने भी चारुता का रूप धारण कर लिया है।

सहायकग्रन्थसूची

1. राधाकृष्णन् डा०. (२०१२) भारतीय दर्शन (प्रथमखण्डः) राजपाल एण्ड सन्ज, कस्मीरी गेट, दिल्ली.
2. झा एवं श्रीमाली (१९८४) प्राचीन भारत का इतिहास, हिन्दी माध्यम कार्यान्वयन निदेशालय, दिल्ली विश्वविद्यालय, दिल्ली।
3. कुमारी, श्रीमती सुजाता (२००२) महाभारत में भारतीय संस्कृति, संजय प्रकाशन, दिल्ली.
4. रामचन्द्रमिश्रः आचार्यः (पो० बा०. नं. 2113) संस्कृतसाहित्येतिहासः, चौखम्बा विद्याभवन, वाराणसी.

Author's Detail

Address: Research Scholar
Department of Sanskrit & Prakrit Languages,
University of Lucknow.
Uttar Pradesh, 226007.

Email: sonalibajpai1994@gmail.com

****

[1] नैषधीयचरितम् 10-1

[2] नैषधीयचरितम् 10-10/11-7

[3] नैषधीयचरितम् 15-12,13

भारतीय संस्कृति एवं संस्कृत साहित्य

डॉ० संगीता कुमारी

शोधसार

आचारों और विचारों का समन्वय ही 'संस्कृति' है। इस दृष्टि से भारतीय संस्कृति की समग्रता की खोज करने के लिए उसके विचार-साहित्य का अनुशीलन करना आवश्यक है और इसमें अग्रणी है - **'संस्कृत साहित्य'।** संस्कृत साहित्य में भारतीय संस्कृति की गहनता, गम्भीरता, विशालता और प्राचीनता आदि विभिन्न पहलूओं का सम्यक् विश्लेषण निहित है। जीवन के निर्माण और उन्नयन के मार्ग को सुझाना या दिखाना ही संस्कृत साहित्य को अभिप्रेत है। **विशेषकर वैदिक साहित्य** हमारे देश की मौलिक चिन्तन के उत्स हैं। यहाँ की संस्कृति की नींव उन्हीं पर आधारित है। **वस्तुतः संस्कृत साहित्य एवं भारतीय संस्कृति में शाश्वत एवं अटूट संबंध है।**

कूट शब्द - संस्कृति, संस्कृत, भारतीय, वैदिक, साहित्य।

****

संस्कृति किसी देश या राष्ट्र का प्राण है। संस्कृति ही किसी व्यक्ति, जाति या राष्ट्र का प्रतिनिधित्व करती है क्योंकि उसमें व्यक्तियों, जातियों और राष्ट्रों की अन्तश्चेतना समाहित होती है। आचारविचार, शासन, शिक्षा, धर्म और साहित्य आदि उस अन्तश्चेतना के उपादान हैं। किसी भी देश की संस्कृति वहाँ के विज्ञान, दर्शन एवं धर्म के अनुरूप ही होती है। पाश्चात्त्य विचारधारा में धर्म और दर्शन दोनों के अपने स्वतन्त्र स्थान हैं किन्तु भारतीय विचारधारा में दर्शन, धर्म एवं विज्ञान इन तीनों में साम्यभाव रहता है। वे एक-दूसरे की भावनाओं को तिरस्कृत नहीं करता वरन् एक-दूसरे के अन्वेषण कार्य में सार्थक भूमिका निभाता है। 'साहित्य' या 'कृति' समाज का दर्पण है। शब्द एवं अर्थ के मञ्जुल सामञ्जस्य का सूचक है – 'साहित्य', जिसकी कामना महाकवि कालिदास ने 'रघुवंशम्' के मङ्गलाचरण में की है **वागार्थप्रतिपत्तये**। साथ ही, "हितेन सहितम्, सहितम्, **सहितस्य भावः साहित्यम्**- इस विग्रह के अनुसार 'साहित्य' का शाब्दिक अर्थ है - 'जिसमें हित की भावना सन्निहित हो'। परन्तु जिस ग्रन्थ में समष्टिगत हित-चिन्तन प्राप्त होता है, वही 'साहित्य' या 'कृति' है। दूसरे शब्दों में, साहित्य का हित-चिन्तन विश्वात्मैक्य और विश्व-कल्याण की भावना पर आधारित होता है। प्रत्येक युग का श्रेष्ठ साहित्य अपने युग के प्रगतिशील विचारों द्वारा किसी न किसी रूप में अवश्य प्रभावित होता है। वस्तुतः साहित्य अपने समय का प्रतिबिम्ब होता है। दूसरे शब्दों में, वही साहित्य, 'साहित्य' है, जिसमें समाज का सामाजिक, सांस्कृतिक, धार्मिक, राजनीतिक, आर्थिक तथा वैज्ञानिक प्रत्येक पहलू का यथार्थ चित्रण है और ऐसा ही है हमारा संस्कृत साहित्य।

संस्कृत साहित्य में भारतीय संस्कृति की गहनता, गम्भीरता, विशालता और प्राचीनता आदि विभिन्न पहलूओं का सम्यक् विश्लेषण निहित है। विशेषकर वैदिक साहित्य हमारे देश की मौलिक चिन्तन के उत्स हैं। यहाँ की संस्कृति की नींव उन्हीं पर आधारित है। भारतीय संस्कृति में आध्यात्मिक साधना का जो प्रभाव लक्षित होता है, उसका आधार भी यह तत्त्व-चिन्तन ही है। महान् वैज्ञानिक डॉo अल्बर्ट आइन्स्टाइन ने 'संस्कृति का मूल आधार' नामक अपने लेख के अंत में लिखा है – **मानवजाति जिस दिन संस्कृति के महत्त्व को समझेगी, उसी दिन वह अपनी आत्मा के साथ**

साक्षात्कार करने के योग्य हो सकेगी। संस्कृति न तो भौगोलिक सीमा-बंधनों को महत्त्व देती है और न राजनीति को ही। संस्कृति तो अखिल मानवता की सम्मिलित पूंजी है।

वस्तुतः संस्कृति का क्षेत्र सार्वभौमिक और सार्वकालिक है। मनुष्य मात्र की मूल इच्छाएँ एवं चित्तवृत्तियाँ समान होने के कारण समस्त मानवता की संस्कृति एक ही है। किसी देश या जाति के आधार पर संस्कृति का विभाजन करना उचित प्रतीत नहीं होता है। विश्व के किस राष्ट्र ने अपना कितना अधिक विकास किया, इसका मानदण्ड उसकी संस्कृति होती है। भारतीय दृष्टिकोण से संस्कृति को मानवधर्म के रूप में स्वीकार किया गया है। मानवजीवन के जो संस्कार और परिष्कार हैं, जिनसे 'मानवता' का निर्माण हुआ, वे ही संस्कृति के मूल उपादान हैं। उन्हीं से भारतीय संस्कृति की उदात्त एवं व्यापक परम्परा का प्रवर्त्तन हुआ। भारतीय संस्कृति का विकास दो रूपों में हुआ- आध्यात्मिक और आधिभौतिक। प्राकृतिक पदार्थों में मानवकृत परिवर्तनों एवं संस्कारों से भौतिक संस्कृति का निर्माण हुआ। मानव की जिस क्रिया में उसकी आत्मा या प्रकृति का संस्कार होता है, उसे संस्कृति का आध्यात्मिक पक्ष कहा जाता है। वस्तुतः आचारों और विचारों का समन्वय ही संस्कृति है। इस दृष्टि से भारतीय संस्कृति की समग्रता की खोज करने के लिए उसके विचार-साहित्य का अनुशीलन करना आवश्यक है और इसमें अग्रणी है- संस्कृत साहित्य।

वैदिक साहित्य का भारत ही नहीं, विश्व के साहित्यिक एवं सांस्कृतिक अध्ययन के लिए महत्त्वपूर्ण स्थान है। पाश्चात्त्य विद्वान् विन्टरनिट्ज का कथन है - **जो मनुष्य वैदिक साहित्य को समझने में असमर्थ रहता है, वह भारतीय संस्कृति को नहीं जान सकता। इतना ही नहीं, वैदिक साहित्य से अनभिज्ञ व्यक्ति बौद्ध साहित्य के रहस्य को भी समझने में असमर्थ रहता है, क्योंकि बौद्ध साहित्य वैदिक साहित्य का नवीन विकास या नव्य रूप है।** उनका यह भी कहना है - If we wish to learn, to understand the beginning of our own culture, If we wish to understand the oldest Indo-European culture, we must go to India, where the oldest literature of an Indo-European is preserved.

वस्तुतः विश्ववन्द्य, सर्वग्राह्य भारतीय संस्कृति अपनी अनन्य विशेषताओं के कारण विश्व में अत्यन्त सम्मानित स्थान रखती है। आध्यात्मिकता भारतीय संस्कृति का प्राण है तथा वेदान्त इसी आध्यात्मिकता के पोषक हैं। यहाँ प्रत्येक कार्य का सम्बन्ध आत्मा-परमात्मा से जोड़ा जाता है - **यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत् प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्मेति।**[1]

भारतीय संस्कृति के विकास में देवतावाद एवं अवतारवाद का भी महत्त्वपूर्ण योगदान रहा है। श्रीकृष्ण ने *गीता* में कहा है -

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे-युगे॥[2]

---

[1] तैत्तिरीयोपनिषद्, 3:1

[2] श्रीमद्भगवद्गीता, 4:7, 8

कर्मफल एवं पुनर्जन्मवाद भी भारतीय संस्कृति की बहुत बड़ी विशेषता हैं। कर्मफल, चाहे शुभ कर्मों का हो अथवा अशुभ कर्मों का, दोनों की समाप्ति पर ही मोक्ष मिलता है और यही भारतीय जीवन का परम लक्ष्य है। निष्काम कर्म की बात कही गई है - **कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**

मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥[1]

भारतीय संस्कृति में यमनियमों के पालन एवं यज्ञों के प्रति आदरभाव प्रदर्शित करने की भी बात कही गई है। व्यक्तिगत लाभ की चिन्ता न करते हुए लोककल्याण कामना से किए गए सारे कार्य यज्ञ हैं। श्रीकृष्ण ने तो परमात्मा को भी यज्ञ में ही स्थित माना है-

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।

तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥[2]

भारतीय संस्कृति में पुरुषार्थ-चतुष्टय (धर्म, अर्थ, काम तथा मोक्ष) की सिद्धि भी व्यक्ति की लौकिक तथा पारलौकिक उन्नति के लिए परमावश्यक बताई गई है। महर्षि वेदव्यास ने घोषणा की है-

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे।

धर्मसंस्थापनार्थाय सम्भवामि युगे-युगे॥[3]

भारतीय संस्कृति में वर्णाश्रमव्यवस्था का भी अत्यधिक महत्त्व है। श्रीकृष्ण ने अर्जुन के समक्ष स्वयं को ही वर्णव्यवस्था का स्रष्टा बताकर इसके महत्त्व का उद्घोष किया है-

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।

तस्य कर्त्तारमपि मां विद्ध्यकर्तारमव्ययम्॥[4]

भारतीय संस्कृति में व्यक्ति के मानसिक और शारीरिक स्वास्थ्य की दृष्टि से षोडश संस्कारों की प्रशंसनीय कल्पना की गई है और पूज्य व्यक्तियों एवं महापुरूषों के प्रति आदरभाव रखने की प्रेरणा दी गई है। **आचार्य देवो भव, मातृदेवो भव, पितृदेवो भव और अतिथिदेवो भव** आदि उपनिषद्वाक्य ऐसे ही प्रेरणा देते हैं। भारतीय संस्कृति विश्वकल्याण कामना की भावना से भी ओतप्रोत है। 'खुद जियो औरो को भी जीने दो' का नारा ऋषियों द्वारा इस प्रकार लगाया गया- **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग् भवेत्॥

---

[1] श्रीमद्भगवद्गीता, 2:47

[2] श्रीमद्भगवद्गीता, 3:15

[3] श्रीमद्भगवद्गीता, 4:7, 8

[4] गीता, 4:14

परोपकराय सतां विभूतयः मन्त्र की उद्घोषणा करने वाली भारतीय संस्कृति का महान् उपदेश है कि दूसरों की भलाई अपने प्राण त्याग कर भी करनी चाहिए। भारतवर्ष में तो व्यक्तियों को ही नहीं प्रकृति को भी परोपकारपरायण माना गया है- **भवन्ति नम्रास्तरवः फलागमै-**

र्नवाम्बुभिर्दूरविलम्बिनो घनाः।

अनुद्धताः सत्पुरुषाः समृद्धिभिः

स्वभाव एवैष परोपकारिणाम्॥[1]

भारतीय संस्कृति त्याग भावना से ओत-प्रोत है अर्थात् यह शिक्षा देती है कि इस संसार में सब कुछ ईश्वरमय है; ईश्वर से नियन्त्रित है, अतः प्राप्त का त्यागपूर्वक उपभोग करना चाहिए और किसी के धन की लिप्सा नहीं करनी चाहिए- **ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।**

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यविद्धनम्॥[2]

भारतीय संस्कृति में सार्वजनिक लेकिन शालीन बहस की परम्परा रही है। अमर्त्य सेन ने अपनी पुस्तक "**द आर्गुमेन्टेटिव इंडियन**" यानी "**तर्कशील भारतीय**" में ऐसा ही विचार व्यक्त किया है। इस धारणा के समर्थन में इन्होंने इतिहास और पौराणिक कथाओं से कई दृष्टांत दिए हैं। यथा- कुरुक्षेत्र की रणभूमि में अर्जुन और कृष्ण के बीच जो वार्तालाप हुआ था, वह केवल कृष्ण का आदेश नहीं था बल्कि वह दो नैतिक विचारों में बहस थी। अर्जुन की सोच यह थी कि हालांकि धर्म और नैतिकता पांडवों के पक्ष में है, फिर भी ऐसा युद्ध करना सही नहीं क्योंकि इसमें एक भयानक नरसंहार और विनाश निश्चित है। इसके विपरीत कृष्ण की धारणा यह थी कि यदि उद्देश्य नैतिक है तो मनुष्य का फर्ज केवल कर्म करना है क्योंकि कर्म के परिणाम पर मनुष्य का कोई वश नहीं है। भारतीय संस्कृति प्रवृत्ति और निवृत्ति का समन्वित रूप है। प्रवृत्ति और निवृत्ति का समन्वय ही उच्छृङ्खल मानव जीवन को मर्यादित एवं प्राकृतिक जीवन को सांस्कृतिक बनाता बनाता है, यह भारतीय संस्कृति का महान् उपदेश है। वस्तुतः इस संस्कृति का उद्भव ही ज्ञान से हुआ है क्योंकि इसका बीज वेदों में छिपा है। भारतीय संस्कृति कहती है - **दृष्टिपूतं न्यसेत्पादम्, वस्त्रपूतं पिबेज्जलम्** अर्थात् विचारपूर्वक व्यवहार कीजिए, देखकर कदम बढ़ाइये तथा छानकर पानी पीजिए। उपर्युक्त मूलभूत विशेषताओं से युक्त भारतीय संस्कृति विश्व की अन्य संस्कृतियों से विलक्षण है। इसको अपनाने से व्यक्ति भौतिक एवं आध्यात्मिक – दोनों दृष्टियों से उन्नत हो सकता है। वस्तुतः वैदिक साहित्य पर आधारित भारतीय संस्कृति अपनी सनातन मान्यताओं के कारण ही सर्वप्रथम एवं सार्वभौम संस्कृति कही जाती है - **सा प्रथमा संस्कृतिर्विश्ववारा॥**[3]

---

[1] अभिज्ञानशाकुन्तलम्, 5:12

[2] ईशावास्योपनिषद्

[3] यजुर्वेद 7:14

परन्तु यह दुःखद सत्य है कि आज हमारा देश सम्प्रदायवाद, पूँजीवाद, आतंकवाद, जातिवाद, क्षेत्रवाद, प्रान्तवाद, पदवाद आदि से इस प्रकार ग्रस्त हो गया है कि हमारी भारतीय संस्कृति की कान्ति धूमिल होती जा रही है। इतना ही नहीं आधुनिक पीढ़ी पश्चिमी संस्कृति एवं सभ्यता के पीछे दौड़ते हुए इतना आगे बढ़ती जा रही है कि भारतीय संस्कृति के अस्तित्व पर प्रश्नचिह्न लगने लगा है। वरिष्ठ नौकरशाह पवन कुमार वर्मा ने अपनी पुस्तक "**भारतीयता की ओर**" में इसी बात पर प्रकाश डाला है कि पश्चिमी सभ्यता और संस्कृति की अंधाधुंध नकल करने के चक्कर में हम अपनी प्राचीन सभ्यता और संस्कृति से कैसे दूर होते जा रहे हैं, भूमंडलीकरण के नाम पर कैसे दुनिया में एक खास संस्कृति का प्रभुत्व कायम होता जा रहा है और आने वाले दिनों में इसके संभावित खतरे क्या हो सकते हैं आदि।

अतः भारतवर्ष की आत्मस्वरूपिणी एवं हमारे स्वाभिमान की द्योतिका भारतीय संस्कृति की रक्षा-सुरक्षा नितान्त आवश्यक है। वस्तुतः संस्कृत साहित्य एवं भारतीय संस्कृति में शाश्वत एवं अटूट संबंध है। जीवन के निर्माण और उन्नयन के मार्ग को सुझाना या दिखाना ही संस्कृत साहित्य का अभिप्रेत है। दार्शनिक दृष्टि से जीवन पर विचार करने की अपनी निज पद्धति है, अपने विशेष नीति-नियम हैं और इन नीति-नियमों और पद्धतियों के माध्यम से जीवन का वैज्ञानिक अध्ययन प्रस्तुत करना ही वेदान्त का प्रयोजन है और यही विचारप्रधान संस्कृति है।

सहायकग्रन्थसूची

1. एवं श्रीमाली (1984), प्राचीन भारत का इतिहास, हिन्दी माध्यम कार्यान्वयन निदेशालय, दिल्ली विश्वविद्यालय, दिल्ली।
2. गैरोला, वाचस्पति (1997), वैदिक साहित्य और संस्कृति, चौखम्बा संस्कृत प्रतिष्ठान।
5. कुमारी, श्रीमती सुजाता (2002), महाभारत में भारतीय संस्कृति, संजय प्रकाशन, दिल्ली।
6. शास्त्री, डॉ० दयाशङ्कर (2001), गीतापीयूष, साहित्य निकेतन, कानपुर।
7. डॉ० राधाकृष्णन् (1973), भारतीय दर्शन, राजपाल एण्ड सन्ज, दिल्ली।
8. शर्मा, 'ऋषि' प्रो० उमाशंकर (2006), सर्वदर्शन संग्रह, चौखम्बा विद्याभवन,वाराणसी।
9. श्री अरविंद (1994), भारतीय संस्कृति के आधार, श्रीअरविंद आश्रम, पांडिचेरी।
10. सिंह, 'दिनकर' रामधारी (2000), संस्कृति के चार अध्याय, लोकभारती प्रकाशन, इलाहाबाद।
11. अग्रवाल, डॉ० वासुदेवशरण (1971), संस्कृति और साहित्य, विश्वविद्यालय प्रकाशन, वाराणसी।
12. पांडे, विशम्भरनाथ (1996), भारत और मानव संस्कृति, प्रकाशन विभाग, सूचना और प्रसारण मंत्रालय, भारत सरकार।
13. शर्मा, आचार्य श्री राम (1998), भारतीय संस्कृति के आधारभूत तत्व, अखण्ड ज्योति संस्थान।

Author's Detail

Address: असिस्टेंट प्रोफेसर,
संस्कृत एवं वेदाध्ययन विभाग,
देवसंस्कृति विश्वविद्यालय, हरिद्वार
Email: kmrsangeeta1@gmail.com

****

महाभारते योगस्वरूपम्

डाँ गोबिन्ददासः

शोधसारः

भारतवर्षस्य सर्वस्वं तस्य दर्शनशास्त्रम्। तत्रापि योगदर्शनस्य महत्त्वमप्रतिमम्। योगदर्शनप्रतिपिपादयिषितस्य योगस्य महिमा महर्षिव्यासदेवविरचिते महाभारते सगौरवमभ्युपगतः। भगवता व्यासेन शुकदेवं प्रति यथा योगोपदेशः प्रदत्तः तस्य सम्यक् वर्णनं महाभारतस्य शान्तिपर्वणः मोक्षपर्वण्युपलभ्यते। शान्तिपर्वणः षोडशाधिकत्रिशततमोऽध्याये दृश्यते यत्परब्रह्मणः प्राप्तये महर्षिणा याज्ञवल्केन जनकाय योगसाधनोपदेशः कृतः। तन्मते इह संसारे साङ्ख्यसमं ज्ञानं नास्ति योगसमं बलञ्च नापरं किमप्यस्ति। अनयोः सांख्ययोगयोः एकमेव लक्ष्यम्। तद्यथा **जन्ममृत्युचक्रादमृतपदप्राप्तेः निवृत्तिश्च** इति।[1] विपुलकायेऽस्मिन्ग्रन्थे ब्रह्मतत्त्वलाभाय योगमार्गस्योपदेशः दरीदृश्यते। तेन सह समाधिनिष्ठस्य योगयुक्तपुरुषस्य लक्षणान्यपि निरूपितानि। तत्रैव योगाङ्गाः, अष्टसिद्धयः, व्रतोपवासः, क्षमाशौचादीनाञ्च धार्मिककर्त्तव्यानां सम्पादनेन सह अहिंसायाः पालनस्य निर्दिशोऽपि वर्तते।

कुञ्चीशब्दाः - ध्यानयोगः, योगयुक्तयोगी, योगाङ्गः, योगफलम्।

****

शान्तिपर्वणः पञ्चनवत्यधिकशततमोऽध्याये महात्मा भीष्मः युधिष्ठिरं प्रति योगेषु ध्यानयोगस्य महत्त्वं प्रतिपादयन् ध्यानयोगावलम्बनेनैव दुःखशोकादिरहितं निर्वाणपदं प्राप्यते योगिना इत्यावदत्। अनेन ध्यानयोगेन येन द्रव्येण सुखं लभते तदन्येन केनापि पुरुषार्थेन दैवयोगेन वा न लब्धुं शक्यते। ध्यानजन्यसुखसम्पन्नो योगी पुनः पुनः तल्लाभाय प्रतिदिनं ध्यानयोगे प्रवृत्तो भवति। तेनोक्तम् -

सुखेन तेन संयुक्तो रंस्यते ध्यानकर्मणि।
गच्छन्ति योगिनो ह्येवं निर्वाणं तन्निरामयम्॥[2] इति

प्राणायामसमये मनसः सम्बन्धः यदा सगुणं सगुणात्मकतत्त्वेन सह भवति तदा सगुणो योगो भवति। तदभावे तु निर्गुणो योग इति। महाभारतमते निर्गुणयोगसाधकः रात्रौ प्रहरे च ध्यानाभ्यासं विदध्यात्। सर्वाणीन्द्रियाणि मनः बुद्धिश्च स्थिरीकृत्य समाधिस्थः भूत्वा पाषाणवद् अविचलितभावेन तिष्ठेत्। अथवा शुष्ककाष्ठवन्निष्कम्पः अथवा पर्वतेव स्थिरो भवेत्। यस्मिन्समये साधकः एतादृशीमवस्थामाप्नोति तदा एव शास्त्रवेत्तारो तं साधकं योगयुक्तं मन्यन्ते तं योगीति संज्ञया जानन्ति सर्वे। निर्गुणयोगदशायामसम्प्रज्ञातयोगावस्थायां वा योगी न श्रृणोति, न जिघ्राति, नास्वादयति, न पश्यति न वा स्पृशति। साधकस्य मनसि सङ्कल्पविकल्पाबुद्धिश्च नोदीयन्तेन् नाभिमन्यते। निर्गुणसाधनावस्थायां साधकः स्वस्य शुद्धस्वरूपं वेत्ति। तदुच्यते -- **न श्रृणोति न चाघ्राति न रंस्यति न पश्यति।**
न च स्पर्शं विजानाति न सङ्कल्पयते मनः॥

---

[1] महाभारतम्, शान्ति, ३१६:२

[2] Ibid. १९५:२२

न चाभिमन्यते किंचिन्न च बुध्यति काष्ठवत्।

तदा प्रकृतिमापन्नं युक्तमहुर्मनीषिणः॥[1]

शास्त्रकारा मन्यन्ते यत् अणो अणीयसं महत्तो महत्तरं प्राणीनां शरीरेषु वर्तमानम् अन्तर्यामिनं परमात्मनं केवलं योगिनः द्रष्टुं पारयन्ति। सूक्ष्मबुद्धिरेव योगिनां धनम्। योगिनः मनोमयदीपकप्रकाशनेन लोकस्रष्टारं परमात्मानं साक्षात्कर्तुं समर्थाः। परमात्मा तमसः परं तमोगुणरहितमस्ति। स "**तमोनुदम्**" इति। तं योगज्ञा जानाति। लिङ्गरहितत्वात् परमात्मा अलिङ्गनाम्ना प्रसिद्धः। योगिनः योगसिद्धिः तदा भवति यदा ते आत्मनं परमात्मना सह योजयन्ति। एतदतिरिक्तं योगस्य नान्यत्किमपि लक्षणं भवितुमर्हति। अनेन प्रकारेण साधना कुर्वाणाः योगिन अवश्यमेव सर्वद्रष्टारम्, अजरम्, अमरं परमात्मानं प्राप्नुवन्ति।[2] शान्तिपर्वणः षोडशाधिकत्रिशततमोऽध्याये याज्ञवल्क्यजनकसम्वादे जनकं प्रति याज्ञवल्केन योगविभागस्योपदेशः सङ्केतेन रूपकमाध्यमेन वा कृतः। तद्यथोक्तम् -

वेदेषु चाष्टगुणिनं योगमाहुर्मनीषिणः।

सूक्ष्ममष्टगुणं प्राहुर्नेतरं नृपसत्तम॥[3]

श्लोकोक्तः गुणमिति पदस्यार्थः अङ्गमिति। महर्षेः याज्ञ्यवल्क्यस्य मते वेदानुसारं सूक्ष्मस्थूलभेदेन योगः द्विविधः। तयो सूक्ष्मयोगः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधित्वेन अष्टविधः। पर्वण्यस्मिन् षडधिकत्रिशततमो-ऽध्याये जनकं प्रति महर्षिणा वशिष्ठेन योगस्य सांख्यस्य च सदुपदेशः कृतः। तत्रैव ध्यानस्य महात्म्यं मुक्तौ हेतुरपि च प्रदर्शितः। तेन ऋषिणापि ध्यानप्राणायामयोः वैशिष्ट्यं प्रतिपादितम्। तदनुसारेण योगिभिः ध्यानाभ्यासः सर्वादौ करणीयः। ध्यानमेव बलमिति तेषां मतम्। तत्र ध्यानस्य सगुणनिर्गुणौ द्वौ भेदौ। आभ्यां साकं प्राणायामं ध्यानस्यापि भेदरूपेण प्रदर्शितः। अतः ध्यानस्य भेदविशेषः प्राणायाम इति। सोऽपि प्राणायामः सगुणनिर्गुणभेदेन द्विविध इति विचारः महर्षेः वशिष्ठस्य।[4] योगी यदि परमात्मानं साक्षात्कर्तुमिच्छति तर्हि पूर्वमिन्द्रियाणां मनसश्च वशीकृत्वा बुद्धिसहितमव्ययात्मनि नियोजयेत्। तेन स नित्यमुक्तं, अणोः अणीयसं महतो महत्तरमात्मानं पश्यति -

अजं पुराणमजरं सनातनं यदिन्द्रियैरूपलभेत निश्चलैः।

अणोरणीयो महतो महत्तरं तदात्मना पश्यति मुक्तमात्मवान्॥[5]

पुनरप्यस्मिन्नेव अध्याये व्यासदेवेन शुकदेवं प्रति कथं योगाभ्यासेन परमात्मनः प्राप्तिर्भवति तदुपदृष्टम्। योगिनः कृते साधनायां यद्वर्जनीयमुपेक्षणीयञ्च भवति तत्सर्वं निरूपितं येन साधनामार्गे अन्तरायाः विघ्नाः वा न भवेयुः। तथा च

---

[1] महाभारतम्, शान्ति, ३०६:२६-२७

[2] Ibid. ३०६:२३-२५

[3] Ibid. ३१६:७

[4] Ibid. ३०६:७-८

[5] महाभारतम्, शान्ति, २४०:३४

तत्र इन्द्रियनिग्रहं परमावश्यकम्। अर्थात् चञ्चलमनसः निग्रहः इन्द्रियैः सहैव विधेयः। तेनैव योगी आत्मबलमर्जति। ब्रह्मसाक्षात्काराधिकारी च भवति - **विधूम इव दीप्तार्चिरादित्य इव दीप्तिमान्।**

वैद्युतोऽग्निरिवाकाशे दृश्यतेऽऽत्मा तथाऽऽत्मनि॥[1]

यमनियमादीनां योगाङ्गानां सम्यगभ्यासपूर्वकं साधनां कुर्वाणो योगी शीघ्रातिशीघ्रं सर्वत्र समदृष्टिभावं प्राप्य कर्मफलानि उल्लंघ्य षण्मासाभ्यन्तरे परब्रह्मणः परमात्मनः साक्षात्कारं प्राप्नोति। पुनश्च व्यासदेवेन शुकदेवं प्रति स्थूल-सूक्ष्मकारणरूपस्य शरीरत्रयभिन्नस्य जीवात्मनः परमात्मनश्च साक्षात्काराय नैकाविधाः साधनोपाया उपदिष्टः। शरीर-तत्त्वज्ञाः जितेन्द्रियाः योगिनः स्थूलशरीरेभ्यः पृथक्भूतं सूक्ष्मलिङ्गशरीराश्रितं जीवात्मानं सूक्ष्मबुद्ध्या प्रत्यक्षं कुर्वन्ति -

तानि सूक्ष्माणि तत्त्वानि विमुक्तानि शरीरतः।

स्वेन सत्त्वेन सत्त्वज्ञाः पश्यन्ति नियतेन्द्रियाः॥[2]

योगिनः जड-स्थूल-सूक्ष्मशरीरं तथा व्रजतुल्यकारणादिशरीरत्रयमतिक्रम्य योगशास्त्रोपदिष्टस्य मार्गस्य सम्यगभ्यासेन आत्मदर्शनं कुर्वन्ति। तथा च तत्त्वविद्योगी परब्रह्मपरमात्मनः साक्षात्कारो लभते -

योगशास्त्रपराभूत्वा तमात्मानं परीप्सवः।

अनुच्छ्वासान्यमूर्तानि यानि वज्रोपमान्यपि॥[3]

एवं ते रूपादिना पञ्चतन्मात्रेण सह मनबद्धिरूपं सप्तसूक्ष्मतत्त्वानां सम्यक् रूपेण साक्षात्कृत्य तदनन्तरं महेश्वरस्य षडङ्गरूपयोगैश्वर्यं ज्ञातुं समर्थाः भवन्ति। पुनः सत्त्व-रज-तमेति त्रिगुणात्मिकायाः प्रकृतेः परिणामभूतं जगदिदं साक्षात्करोति- **विदित्वा सप्तसूक्ष्माणि षडङ्गं च महेश्वरम्।**

प्रधानं विनियोगज्ञः परं ब्रह्मानुपश्यति॥[4] इति

विषयेऽस्मिन् श्रीमता भगवता कृष्णेन अपि प्रतिपादितं यत् - **यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्**'[5] इति अर्थात् योगिजनाः स्वहृदये चित्तं सर्वतः समाकृष्यैनमात्मानं प्रयत्नेन प्रत्यक्षं निरीक्षन्ते। महाभरतस्य मोक्षधर्मपर्वणान्त-र्गतस्य अग्निमेष्वध्यायेषु युधिष्ठरं प्रति भीष्मपितामहेनापि मनः, बुद्धिः, त्रैगुण्यं पञ्चभूतानां योगतत्त्वविषयानां वर्णनं कृतम्। अत्रायं विशेषः यन्मनसः धैर्यादयः नवगुणाः तथा च बुद्धेः पञ्चगुणाः निरूपिताः। अत्रैव महाभारते वशिष्ठेन जनकाय विद्या-अविद्ययोः, क्षराक्षरतत्त्वं, प्रकृतिपुरुषयोः स्वरूपः सांख्ययोगनुसारं प्रतिपादितः। तन्मते योगी योगसाधनया प्रकृतेः गुणव्यूहभूतं चराचरं जगज्जानाति। तत्रैव अव्यक्तायां प्रकृतौ पुरुषोऽपि परमात्मनि लीयते इति -

---

[1] Ibid. २४०:१९

[2] Ibid. २५३:४

[3] Ibid. २५३:१३

[4] महाभारतम्, शान्ति, २५३:१५

[5] श्रीमद्भगवद्गीता, १५:११

क्षरो भवत्येष यदा तदा गुणवतीमथ।

प्रकृतिं त्वभिजानाति निर्गुणत्वं तथाऽऽत्मनः॥[1]

अतः पुरुषोऽपि क्षरतत्त्वकोटौ निविष्ट इति। साधक अव्यक्तप्रकृतिं महत्तत्वादि व्यक्ततत्त्वान् सगुणनिर्गुणरूपेण आत्मानि साक्षात्कृत्य परमात्मस्वरूपो भवति। योगस्योच्चतमां स्थितिं प्राप्य योगी इन्द्रियजयं करोति। तस्य मनसि स्थिरतामायाति। तस्मात् स अविचलितभावेन समाधौ निमग्नो भवितुमर्हति कदापि न विचलितो भवति। एवं प्रकारेण योगी दीर्घकालाभ्यासवशात्पूर्णतः समाधिनिष्ठो भवति। स च योगी महतः तमसः मध्ये प्रकाशमानं प्रज्वलिताग्नेः शिखासमं हृद्देशे स्थितिमविनाशिनं परब्रह्माणं साक्षात्करोति।[2]

अनेन प्रकारेण जनकस्य वार्तातः योगस्य स्वरुपो ज्ञायते। एतदतिरिक्तं तस्याः धारणायाः फलम्, अष्टसिद्धिः, शिवयोगः, प्राणायाम, ध्यानप्रभृतयः सामग्रविषयाः। यत्र तत्र प्रफुटितं भवन्ति। प्रत्याहारस्य स्वरूपं स्पष्टीकृत्वा जनकः कथयति यत्साधकः सर्वपथममिन्द्रियाणां जेतितव्यम्।[3] तेषा स्वभावः चञ्चलत्वात्। अतः साधकानां मार्गदर्शनं दीयते यदभ्यासेन चित्तं विषयेभ्यः विमुखीकृत्य बुद्धौ संलग्नः करणीयः।[4] तथा संयमपूर्वकं योगभ्यासं कुर्वन् यदा चित्तवृत्तयः शान्ताः भविष्यन्ति तदा रागादीन् विषयान् त्यक्त्वा ध्याने योगाभ्यासे च सहायकदेशः, कर्म, अर्थः, उपायः, आहारः, संहारः, मनः, दर्शनम्, अनुरागः, निश्चयम्, चाक्षुषश्च एते द्वादश-योगाङ्गानामाश्रयं प्राप्नोति। महाभारतानुसारं ध्याने सर्वे दोषे विनष्टे कृते सति साधकः परमात्मानः स्वरूपे तिष्ठति, यत्र पुनरागमन जन्ममरणचक्रस्य आवर्तणं समाप्तं जाति।

निष्कर्षः - परमतत्त्वलाभाय ध्यानादेः योगोपदेशाः महाभारतेऽपि निरूपिताः सन्ति। अत्रैव समाधिनिष्ठयोग-युक्तस्य पुरुषस्य स्वरूपाणि प्रतिपादितानि। तत्रैव प्रसङ्गक्रमेण योगाङ्गाः, अष्टसिद्धयः, व्रतोपवासः, क्षमाशौचादीनाञ्च धार्मिककर्त्तव्यानां सम्पादनेन सह अहिंसादयः यमस्य विधानं पालनीयमिति निर्दिष्टमस्ति। अत्रैव योगः सूक्ष्मस्थूलेति भेदेन द्विविधेति। तयोः सूक्ष्मयोगः यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधित्वेन अष्टविधेति स्पष्टतया उल्लिखितः। इतिहासग्रन्थेऽस्मिन् योगफलैः सह योगान्तराणानां वर्णनं व्यासेन कृतमस्ति। योगाङ्गानां सम्यगभ्यासपूर्वकं साधनां कुर्वाणो योगी साधको वा झटिति सर्वत्र समदृष्टिभावं लब्ध्वा परमैश्वर्यं परमबलं वा अर्जयति। आत्मनि परमब्रह्मसाक्षात्कृत्य परमात्मस्वरूपो भवतीति। महाभारतोक्तः योगविषयः प्रायः समानरूपेण पतञ्जलिना विरचितस्य योगशास्त्रेऽपि दृश्यते।

---

[1] महाभारतम्, शान्ति, ३०७:१९

[2] Ibid. ३१६:२५-२७

[3] Ibid. षष्ठखण्ड, पृ ५७७५

[4] Ibid. अनु, ९६:१३९

सहायकग्रन्थसूची

1. अग्रवाल डा. मदनमोहन, १९९६, श्रीमद्भगवद्गीता, चौखम्बा संस्कृत प्रतिष्ठान, वाराणसी।
2. अभयङ्करः काशीनाथवासुदेव, १९५२, सर्वदर्शनसङ्ग्रहः, ओरियण्टल् बुक् एजेंसी, पटना।
3. ईश्वरकृष्णः, २०५१ (वि. सं.), साख्यकारिका (नवमसंस्करणम्), चौखम्बा संस्कृत सीरीज आफिस, वाराणसी।
4. उपाध्याय श्रीबलदेव, १९७७, भारतीयदर्शन, चौखम्बा संस्कृत सीरीज, दिल्ली।
5. ओमानन्दतीर्थः श्रीस्वामी, २०६४ (वि. सं.) पातञ्जलयोगप्रदीप, गीताप्रेस, गोरखपुर।
6. गुप्ता वेदप्रकाश, १९९२, सम्पूर्ण महाभारत, एस् एन् प्रिन्टर्स प्रेस् प्रकासन मन्दिर दिल्ली।
7. नन्द श्रीमद्धरिहार, २००२, पातञ्जलयोगदर्शन (बाङ्गलाभाषया विरचितम्) पश्चिमवङ्ग राज्य पुस्तक पर्षद, कलिकता।
8. भट्टाचार्यः रामशङ्कर, (सम्पा.) १९७९, पातञ्जलयोगदर्शनम् (द्वितीयसंस्करणम्) मोतिलाल बनारसीदास, दिल्ली।
9. रामदेव स्वामी, २००५, पातञ्जलयोगदर्शनम् (हिन्दीव्याख्या), दिव्य प्रकाशन हरिद्वार।
10. वर्म रामचन्द्र, १९८८, महाभारत (प्रथमसंस्करणम्), भारतीय प्रकशन संस्थान, गाजियावाद।
11. शास्त्री, प. रामनारायण, २०१२, महाभारत (सम्पूर्ण छः खण्ड), गीताप्रेस, गोरखपुर।

Author's Detail

Address: Assistant Professor,
Debra Thana Sahid Kshudiram Smriti Mahavidyalaya
Vill - Chakmadhuri, P.O. - Chak Puru Sottam,
Dist. - Paschim Medinipur, West Bengal, 721211,
Email: dasgobinda064@gmail.com

****

महाकविव्यासदेवकृत-माद्रीचरित्रस्य नवमूल्यायनकारः डॉ. दीपकचन्द्रः

डॉ. पौलमीरायः

शोधसारः

संस्कृतसाहित्यमिव बङ्गसाहित्येऽपि महाभारतस्य नवमूल्यायनं दरीदृश्यते। परन्तु एतद् नवमूल्यायनं भवति मुख्यतया महाभारते यदस्ति तद्विहाय यन्नास्ति, किन्तु यस्य प्रयोजनमासीत् अथवा यस्य उपस्थितौ महाकाव्यस्य कथा आधुनिकमनुष्याणां जीवनगाथा भवितुमर्हति, केवलं तदन्वेषणम्। विंशशतके एकविंशशतकस्य चिन्तनशैलीमवलम्ब्य बङ्गसाहित्ये डॉ. दीपकचन्द्रः धाराप्रवाहरूपेण नवानुशीलनेन महाभारतस्य नवमूल्यायनं कृतवान्। लेखकोऽयं प्रचलितविश्वासं परित्यज्य सम्पूर्णे वास्तविकाङ्किके औचित्यानौचित्यनिरपेक्षरूपेण महाभारतकथायाः भिन्नाङ्किके महाकविकृतमाद्रीचरित्रस्य नवमूल्यायनं कृतवान्। डॉ. चन्द्रस्य दृष्टौ महाकवेः माद्री महाभारते केवलम् एका क्रीडायन्त्री इव व्यवहृता अभवत्। पितामहभीष्मस्य व्यासदेवस्य कुन्त्याः विदुरस्य च परिकल्पितनृशंसराजनीत्यौ बलिरूपेण व्यवहृतास्ति। इतोऽपि डॉ.दीपकचन्द्रः इमां माद्रीं कुरुक्षेत्रयुद्धस्य सम्भाव्यबीजरूपेण निर्णीतवान्। अस्य लेखकस्य उपन्यासस्य विशेषता इयमस्ति यत्, इयं माद्री सन्तानहीना। एवंरूपेण नूतनतथ्यानुसन्धानेन भाविकालिकपाठकानां सम्मुखे नवचेतनायाः द्वारमुन्मोचितं भवतु इत्यासीत् डॉ. चन्द्रस्य ऐकान्तिककामना, एवं मन्ये।

कुञ्चीशब्दाः - नवमूल्यायनम्, बङ्गसाहित्य, क्रीडायन्त्री, सन्तानहीना, कुरुक्षेत्रयुद्ध, सम्भाव्यबीज।

****

वेदपुराणानन्तरम् आर्षकाव्ययोः रामायणमहाभारतयोः क्रमः समायाति। ग्रन्थरत्नद्वयमिदं सकलकाव्यवाङ्मय-मूर्द्धाभिषिक्तं विश्ववाङ्मयरत्नभूतञ्च, तत्र न कापि संशीतिः। भारतवर्षस्य द्वितीयमार्षकाव्यं हि महाभारतम्। त्रिषु लोकेषु महाभारतस्य महज्ज्ञानरूपे प्रतिष्ठा वर्तते। भारतीयपरम्परानुसारं ग्रन्थरत्नमिदं महर्षिणा कृष्णद्वैपायनेन वेदव्यासेन प्रणीतम्। युद्धवर्णनं न केवलं व्यासस्य लक्ष्यमपितु भौतिकजीवनस्य असारतां प्रकाश्य प्राणिनां मोक्षमार्गे प्रवर्तनमेव व्यासस्य महाभारतप्रणयने उद्देश्यमासीत्। महाभारतं यद्यपि गृहयुद्धाख्यानमात्रम्। तथापि मानवचिन्तितो न कोऽप्येतादृशो विषयः प्रमेयो वा यः काव्येऽस्मिन् निबद्धः न स्यात्। भारतीयसंस्कृतेः विश्वकोशः महाभारतम्। संस्कृतेः सर्वे पक्षाः अत्र प्रकाशिताः। भारतीयायाः संस्कृतेः सभ्यतायाश्च सुरम्यं स्वरूपमस्मिन् महाकाव्ये सम्यक् विराजतेतराम्। भारतीयधर्म-दर्शन-राजनीति-अर्थशास्त्र प्रभृतिविषयाणामयं प्रामाणिको विवेचकः। इतोऽपि चतुर्वर्गस्य सर्वे विषयाः धर्म-अर्थ-काम-मोक्षाः सम्यक् प्रतिपादिताः सन्ति। स्वयं व्यासेन अस्य महाकाव्यस्य प्रशंसायां सत्यमेवोक्तम् -

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।
न चाख्यानमिदं विद्यान्नैव स स्याद्विचक्षणः॥ [1]
श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यन्न रोचते।
पुँस्कोकिलगिरं श्रुत्वा रूक्षा ध्वांक्षस्य वागिव॥ [2]

---

[1] सा विद्याच्चतुरा वेदान् साङ्गोपनिषदो द्विजः – BR/01/01/002/235a https://mahabharata.manipal.edu/#/search

[2] श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यत्र - BR/01/01/002/236a

भारतीयसाहित्यस्य महानाकरः अयं ग्रन्थः यत्र तात्कालीनानां सर्वेषां सांस्कृतिकसाहित्यिकादिविषयाणां समन्वयः विद्यते। इतोऽपि धर्मार्थकाममोक्षसम्बन्धितं यत् किञ्चिदपि अस्मिन् महाकाव्ये कथितं तदेव अन्येषु शास्त्रेषु अपि कथितं किन्तु यद् अस्मिन् महाकाव्ये न वर्णितं, तत् भारतराष्ट्रे अन्यकुत्रापि न वर्णितम्। अतः महाभारतकारेण यथार्थोक्तम् – **धर्मे च अर्थे च कामे च मोक्षे च भरतर्षभ।**

यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्॥[1]

अस्य महाकाव्यस्य विशालतया, रोचकतया, सरलतया, विद्वत्तया साहित्यकाराः एतदधिकं प्रभाविताः अभवन् येन महाभारतमेव स्वकीयमुपजीव्यम् अमन्यन्त। कश्चित् किमपि आख्यानं गृहीत्वा, कोऽपि धार्मिकतत्त्वमवलंब्य, कश्चित् सांस्कृतिकतत्त्वमादाय, कोऽपि वा विशिष्टं चरित्रमाधृत्य स्वकाव्यरचनां कृतवान्। इत्थंप्रकारेण महाभारतं सर्व-प्रमुखमुपजीव्यकाव्यरूपेण विश्वप्रसिद्धम् भूत्वा सर्वेषां कृते काव्यरचनायाः चिन्तनक्षेत्रस्य द्वारमुन्मुक्तं करोति। अधुनापि ग्रन्थोऽयं कविभ्यः प्रेरणास्रोतोऽस्ति। काव्यक्षेत्रे अस्य ग्रन्थस्य साहित्यिकमहत्त्वमपि प्रशंसार्हं। पौराणिकचित्रकल्प-रूपेण परिगणितं महाग्रन्थं महाभारतमीदृशमेकं साहित्यं यन्मध्ये एव तात्कालिकीभारतवर्षस्य मनुष्याणां चिन्तनशैली, सभ्यता, संस्कृतिः च प्रतिविम्बितं भूत्वा आगामीप्रजन्मानां समीपे उन्मोचिता भवति। एतद्कारणवशात् महर्षि-व्यासदेवस्य आर्यप्रतिभायाः अनवद्यसृष्टिं महाभारतमिदं मानवसभ्यतायाः श्रेष्ठावलम्बनरूपेण अद्यावधि विश्ववन्दितम्।

भारतवर्षस्य साहित्यसंस्कृतेः प्राणप्रवाहस्य एकं प्रधानमुत्सं भवति अस्माकं प्राचीनपुरावृत्तम्। पौराणिकीकथा न केवलं तात्कालिकीजनजीवनं प्रभावितं कृतमासीत्, अपि तु साम्प्रतिककालेऽपि अस्याः प्रभावः अधिकतरः दृश्यते। अस्याः व्यतिक्रमः अद्यापि नास्ति। अस्माकं भारतवर्षे संस्कृतजगति यथैव पौराणिकीकथामाश्रित्य, कदापि तद्विहितविविधचरित्राणि अनुसृत्य, कदापि वा कथान्तर्गतानुभावनामाश्रित्य आधुनिकसमयोपयोगिचिन्तनशैल्यानु-सारेण नवाङ्गिके तेषां नवनिर्माणं विनिर्माणं पुनर्मूल्यायनं वा कृतवन्तः कुर्वन्ति वा तथैव बङ्गलेखकाः अपि आत्मनः प्रतिभया स्वस्वाभिव्यक्तिमाध्यमेन च पौराणिकीकथायाः नवमूल्यायनं कुर्वन्तः सन्ति इदानीं पर्यन्तम्। अतः महाभारत-महाकाव्यस्य प्रभावेन संस्कृतसाहित्यभाण्डारः यथैव सुसमृद्धः तथैव बङ्गसाहित्यिकनिधिः अपि अतिशयः समृद्धो वर्तते।

बङ्गसाहित्यजगति साहित्याध्ययनस्य प्रधानोपादानं भवति बङ्गभाषा। बङ्गीयजनान् निकषा अस्याः भाषायाः महत्त्वमपि संस्कृतभाषापेक्षया न न्यूनम्। बङ्गभाषा अपरप्रादेशिकभाषासु अन्यतमा। अस्यां भाषायामपि संस्कृतवाङ्मय-मवलम्ब्य उपन्यास-लघुकथा-नाटकादिविविधविषयाणां लेखनकार्यम् इदानीं पर्यन्तं प्रचलितमस्ति। संस्कृतवाङ्मयेषु रामायण-महाभारत-पुराणकथाश्रिताविषयं संगृह्य बङ्गकवयः स्वाभिमतं प्रतिष्ठापनार्थं प्रयासं कृतवन्तः। यतो हि संस्कृत-साधनायां बङ्गमनीषा शनैः शनैः गौरवमजर्यति परमनिष्ठया। संस्कृतभाषायां निबद्धानां मूलग्रन्थानां सम्यक् ज्ञानं प्राप्त्यार्थं बङ्गकवीनामवदानमपि स्मरणीयम्। सुदीर्घकालादारभ्य इदानीं पर्यन्तं बङ्गप्रदेशस्थकवयः बङ्गभाषामाध्यमेन बहुनां ग्रन्थानां प्रणयनं कृत्वा प्राचीनभारतवर्षस्य गौरवैतिह्यं संरक्षन्ति परिपुष्टिं च साधयन्ति। बङ्गसाहित्ये महाभारत-कथाश्रितकाव्यकृतीनां प्रादुर्भावः अभवत् अनुवादसाहित्यमाध्यमेन। उत्तरकालीनबङ्गसाहित्ये महाभारतस्य विविधाः

[1] धर्मे च अर्थे च कामे च – 1.62.53 (https://groups.google.com/g/samskrita/c/P2aFY8eOMvg

कथाः चरित्राणि च आश्रित्य भिन्नाः भिन्नाः मौलिककाव्यग्रन्थाः रचितमस्ति। इतोऽपि विविधं विश्लेषणात्मकं समालोचकसाहित्यमपि विरचितमस्ति। बङ्गप्रदेशे महाकविव्यासदेवकृतमहाभारतस्य अनुवादस्य सूचना ईसवीय १५०० शतकस्य अन्तिमे भागे अभवत्। अस्य कालस्य पूर्वे संस्कृतभाषायां रचितं महाभारतं केवलं धर्मग्रन्थरूपेण पठित-मभवत्। मदनपालदेवस्य ताम्रशासने उल्लिखितमस्ति यन्मदनपालदेवस्य महिषी चित्रमतिकादेवी संस्कृतमहाभारतं श्रवणमकरोत्।[1]

वस्तुतस्तु मुस्लिमशासकानाम् इच्छानुसारेण एव बङ्गप्रदेशे आञ्चलिकभाषायां महाभारतरचनायाः सूचना अभवत्। महाभारतस्य कथां प्रति ते शासकाः अतीव आकृष्टाः आसन्, किन्तु तेषां संस्कृतज्ञानं नासीत्। संस्कृत-ज्ञानाभावकारणवशात् ते शासकाः महाभारतं पठितुं न शक्नुवन्तः। भाषावबोधने तेषां क्लिष्टता अपाकरणार्थम् अपिच महाभारतनिहितकथानां रसास्वादनार्थं ते शासकाः महाभारतस्य अनुवादकृते हिन्दुसम्प्रदायस्य भूस्वामीनां (क्षेत्रपतीनां) तथा च हिन्दुकवीनामुत्साहितवन्तः। तदनन्तरं बङ्गकवयः लेखकाः च तेषां साहित्यरचनायां यादृशप्रकारेण महाभारतम् अनुसरणं कृतवन्तः, इदानीं पर्यन्तं कुर्वन्ति च तद्दृष्ट्वा एवं वक्तुं शक्यते यत् महाभारतं प्रति न केवलं बङ्गीयलेखकाः अपितु वयं भारतीयाः अपि सर्वदा अधमर्णो भूत्वा जीवामः। बङ्गसाहित्ये पुराणेतिहासमनुसृत्य पौराणिकाख्यानां नूतना व्याख्या नूतनं विश्लेषणञ्च ऊनविंशशतब्द्याः अन्तिमे प्रायः प्रारब्धम्। तस्मात्कालादारभ्यः बङ्गसाहित्ये एका नूतना लेखनशैली अन्तः सलिला फल्गुधारा इव प्रवाहिता जाता, यया माध्यमेन प्राचीनपुरावृत्तान्तं धार्मिकीपरिमण्डलं परित्यज्य साधारणमनुष्याणां जीवनवृत्तान्तरूपेण नवकलेवरे वर्तमानसमाजस्य द्वारे द्वारे समुपस्थितं भवति। मूलतया पौराणिकी-कथायां निहितां पापपुण्यादिभीतिं मनसः दूरीकृत्य प्राचीनविषयवस्तूनां नवमूल्यायनमेव आधुनिकबङ्गीयलेखका-नामभीप्सा।

इमां धारामनुसृत्य विद्वद्प्रवरईश्वरचन्द्रविद्यासागरः, माइकेलमधुसूदनदत्तः, रवीन्द्रनाथठाकुरः, सुधीन्द्र-नाथदत्तः, बुद्धदेवबसुः, बिष्णुदे, प्रमथनाथबिशी, बारीणदासः, गजेन्द्रमित्रः, समरेशवसुः, शाँ ओलीमित्रः, बाणीबसुः च इत्यादयः कवयः उपन्यास-लघुकथा-कविता-नाटकादिविविधसाहित्यकृतयः विरचितवन्तः। किन्तु पौराणिकसाहित्यस्य पुनर्निर्माण-शैलीधारा धाराप्रवाहरूपेण सुसम्पन्नता न प्राप्नोति इति समालोचकाः आमनन्ति उद्घोषयन्ति च कथाप्रसङ्गेन। तदनन्तरं बङ्गसाहित्ये आधुनिकपर्यवेक्षणदृष्ट्या पौराणिकसाहित्यस्य पुनर्निमाणस्य नूतनमार्गमेकं सूचितवान् डॉ. दीपकचन्द्रमहाभागः। बङ्गसाहित्यस्य विशिष्टः औपन्यासिकोऽयं धाराप्रवाहरूपेण पौराणिकवाङ्मयस्य नवमूल्यायनं कृतमासीत्। बङ्गसाहित्यस्य विद्यार्थी भूत्वा अपि गीर्वाणवाणीं तथा प्राच्यवैभवं प्रति परमश्रद्धावशात् पुराणेतिहासस्य क्रमं प्रस्तौति श्रीदीपकचन्द्रः। डॉ. दीपकचन्द्रस्य साहित्यकृतेः उत्पत्तिस्थलः पुराणेतिहासः। पुराणेतिहासकथामाश्रित्य कथा – उपन्यासरचनायाः एतादृशं वैशिष्ट्यं साफल्यं च प्रादर्शयत् यत् तेन निर्मिते साहित्यसाम्राज्ये स सम्राट् इव एक एव अद्वितीयः तथा अप्रतिद्वन्द्वी आसीत्।

---

[1] . पृथा प्रथम पार्थ ओ पाञ्चाली – पृ. १३

भारतीयपुराणकथानां महारण्ये अटित्वा तासां लुक्कायित-अव्यक्त-अवगुण्ठिततथ्यानामनुसन्धानं कृतवान् डॉ. चन्द्रः। तस्य कथा उपन्यासे मूलकथावस्तुः अपरिवर्तितमस्ति। वैविध्यता अत्र सुचारुतया परिलक्षिता भवति यत् महाकवीनाम् अकथित अस्पष्टानि वचनानि मूलकथया सह यथास्थाने स्थापयित्वा कथानां या अपुर्णता आसीत् तां दूरीकरणस्य प्रयासं कृतमासीत् डॉ. चन्द्रः। वस्तुतः डॉ. दीपकचन्द्रस्य आधुनिकचेतः अन्वेषणं करोति पौराणिककथायां निहितं जीवनस्य वास्तविकरूपम्। प्रचलितविश्वासं परित्यज्य नवाङ्गिके नवानुशीलनेन नूतनतथ्यानुसन्धानेन पौराणिकाख्यानानि युक्तिपूर्वकम् उपस्थापनमेवासीत् डॉ. चन्द्रस्य उद्देश्यम्। इतोऽपि पौराणिककथाभिः सह वैज्ञानिकचिन्तनमपि युक्तिपूर्वकं प्रयुज्य आधुनिकतायाः चित्रमेकम् अङ्कनं कृतवान् कथाकारोऽयम्। नवमुल्यायनं न तु लेखकस्य अलौकिककल्पना, अस्याः अङ्कुरः पौराणिककथायां निहितः अस्ति। **नवमूल्यायनम्** इति विषये डॉ. चन्द्रस्य अभिमतमेवमस्ति। महाकाव्ये पुराणे वा यत् अस्ति तत् विहाय यत् नास्ति, किंवा यद्भवितुमर्हति, अथवा कथायां यस्य उल्लेखः नास्ति किन्तु सङ्केतः अस्ति इति अव्यक्त-अनुच्चारितविषयान् अन्वेषणं कृत्वा पुराणकथावस्तूनां नवनिर्माणमेव भवति नवमूल्यायनम्।[1] यदा कालप्रवाहः जीवनप्रवाहेन सह मिलित्वा नूतनतथ्यस्य स्वरूपोद्घाटने सहायको भवति तदेव आधुनिकीकरणं तथा '**नवमूल्यायनम्**' एतत् अङ्गीकरोति डॉ. चन्द्रः। दीपकचन्द्रस्य नवोन्मेषचिन्तनशैल्याः साहाय्येन वयम् आधुनिकीचिन्तनशैल्यानुसारेण घटमानव्यवस्थायाः अपिच तस्य सामाजिकी-अवस्थानमपि सुष्ठुतया अवगन्तुं शक्नुमः।

एकोनविंशतिशताब्दीपर्यन्तं समग्रे विश्वेऽस्मिन् धर्मसाहित्यरूपेण पुराणसाहित्यस्य ख्यातिः वर्तते। पुराणकथायां वर्णितानि चरित्राणि प्रति मानवानामपारा श्रद्धा परिलक्ष्यते, परन्तु डॉ.चन्द्रेण सम्पूर्णे वास्तविके आङ्गिके औचित्यानौचित्यनिरपेक्षरूपेण पौराणिकचरित्राणामाकलनं कृतम्। अस्य लेखकस्य साहित्यस्थितं प्रधानं चरित्रम् अस्माकं मानसपटे यादृशम् आगच्छति, तादृशमप्रधानं चरित्रमपि अनायासेन तस्य लेखनीस्पर्शेन सम्मानपुरःसरं मनुष्यहृदये स्थानं प्राप्नोति। यथा – श्रीकृष्ण-कुन्ती-माद्री-अश्वत्थामा-इत्यादीनि चरित्राणि तात्कालिके परिमण्डले सम्यक् स्थापयित्वा सार्वकालिकेन जीवनमूल्येन सह निगूढसम्पर्कनिर्माणार्थं प्रयासं कृतवान् डॉ. दीपकचन्द्रमहोदयः। अज्ञात-सम्भाव्य-अनुद्घाटितसत्यस्य आविष्कारेण पौराणिककथाः प्रति पाठकानां चित्ताकर्षणस्य नूतनं प्रयासमेकं कृतमासीत् डॉ. चन्द्रेण। वस्तुतः चरित्रविशेषमवलम्ब्य स्वीय हार्दमुद्गिरताम् उपन्यासलेखनशैलीनां परम्परा प्रमुखतः दीपकचन्द्रमहोदयस्य कथायाम् उपन्यासे च विशेषतया दरीदृश्यते।

पौराणिककथानां नवनिर्माणेन एव अलौकिकपौराणिकचरित्राणि वर्तमानकालोचितमानवानां प्रतिनिधिरूपेण अस्माकं युगद्वारे उपनीतं भूत्वा साधारणपाठकानां हृदयं स्पृशन्ति। पौराणिकचरित्राणां मनसः गहनारण्ये प्रविश्य तेषां तासां वा सुखदुःखादिजीवनानुभूतिं मनस्तात्त्विकदृष्ट्या उद्घाटितवान् डॉ. दीपकचन्द्रः। पौराणिकीकथायाः नवमूल्यायनकरणावसरे लेखकोऽयं पुराकालीनचरित्राणां दृष्टिकोण-व्यवहार-वाचनशैल्यां काचिद्वैविध्यतापि आनीतवान्। चरित्रसृजनं न अतीव सरलकार्यम्। यतो हि एकस्य सृष्टिकर्तुः यथार्थं कृतित्वं प्रकाश्यते केवलं तेन सृष्टचरित्रमाध्यमेन। चरित्रसृजनसमये कोऽपि लेखकः तस्य पारिपार्श्विकपरिवेश-परिस्थिति-समाज-संस्कृति-राजनीति-धार्मिकानुभूति–

[1] .पुराणदर्पणे दीपक – पृ. ३१८

समसामयिकीमानसिकप्रवृत्त्यादिविषयोपरि श्येनदृष्टिं स्थापयेत्। इतोऽपि कस्यापि चरित्राङ्कने लेखकस्य व्यक्तिगतदर्शनम् अत्यावश्यकम्। सः यस्मिन् समाजे निवसति, यस्मिन् धर्मे तस्य दृढविश्वासः अस्ति, केवलं तत्तत् समाजधार्मिकानुभूतिः, पारिवारिकसामाजिकपरिवेशः, विश्वासः, संस्कृतिः, समसामयिकीतिवृत्तं, अपिच सर्वोपरि लेखकस्य कल्पनाशक्तिः चेत्यादीनाम् उपादानानां संमिश्रणे एकैकं चरित्रं निर्मितं भवति। चरित्रचित्रणे लेखकहृदयस्य गभीरानुभूतिः प्रकाशितः भवति। कदापि वा लेखकस्याभिलाषः प्रतिभासति। क्षेत्रेऽस्मिन् लेखकः स्वैरवृत्तिमनुसृत्य चरित्रसृजनं करोति। अर्थात् एवं वक्तुं शक्यते यत्क्षेत्रेऽस्मिन् लेखकः आत्मनः अभिलाषानुसारेण परिकल्पनानुसारेण चैव चरित्रसृजनं कर्तुं शक्नोति। चरित्रनिर्माणसमये चरित्रेषु कदाचित् लेखकजीवनस्य सम्पूर्णचित्रं, कदाचित् वा लेखकजीवनस्य विशिष्टाङ्गिकं विकसितं भवति। संस्कृतसाहित्ये अथवा बङ्गसाहित्ये, यस्मिन् कस्मिनपि साहित्ये कवयः लेखकाः वा एवंप्रकारेण तेषां साहित्यकृतिषु चरित्रनिर्माणस्य प्रयासं कृतवन्तः, इदानीं पर्यन्तं अस्य प्रयासं सुचारुतया दरीदृश्यते। रामायणे महाभारते अथवा परवर्तीसाहित्यकृतिषु सर्वत्रैव नायकः प्रतिनायकः, नायिका प्रतिनायिका च चरित्राणि केवलं काव्यस्य कथावस्तोः प्रयोजनानुसारेण एव निर्मितानि सन्ति। डॉ. दीपकचन्द्रोऽपि तस्य उपन्यासस्य कथावस्तोः प्रयोजनानुसारेण एव महाभारतस्य चरित्राणां नवमूल्यायनं कृतवान्। अतः केन प्रकारेण डॉ. दीपकचन्द्रेण माद्रीचरित्रस्य नवमूल्यायनं कृतमासीत् तदुद्धर्तुं प्रयासं क्रियतेऽत्र अधोलिखिततया महाभारतस्य अपरमेकं विशिष्टं नारीचरित्रं भवति माद्री। महाभारतस्य विशालपरिसरे यस्याः उपस्थापनं क्षणमात्रम् आसीत्। सा महाभारते एका उपेक्षितचरित्ररूपेण विराजमानास्ति। महाभारतस्य गौणमिदं चरित्रं नीत्वा डॉ. दीपकचन्द्रः **माद्रीर कण्ठस्वर** इति उपन्यासः प्रणीतवान्।

दीपकचन्द्रस्य दृष्ट्यौ महाभारते माद्र्याः उपस्थितिः रहस्यावृतः। महाकविः व्यासदेवः कमपि विशेषमुद्देश्यं नीत्वा चरित्रमिदं निर्मितवान् एवं मन्यते लेखकेन दीपकचन्द्रेण। किन्तु महाकवेः तदुद्देश्यमपि रहस्यावृतमासीत्। अयम् औपन्यासिकः डॉ. दीपकचन्द्रः व्यासदेवस्य दृष्ट्यानुसारेण एव माद्रीचरित्रस्य पुनर्निर्माणं कृतवान्, परन्तु महाभारतकथायाः किञ्चित् भिन्नाङ्गिके। अस्य मूलकारणं, मूलतया स्वीयपर्यवेक्षणदृष्ट्यौ बोधबुद्ध्यालोके च महाभारते निहितं रहस्यावृतं सत्यं नवाङ्गिके उद्घाषितकरणार्थमेव लेखकोऽयं तस्य माद्रीचरित्रं किञ्चित् पृथक् रूपेण उपस्थापनार्थं प्रयासं कृतवान्। एतद् नवानुसन्धानमेवासीत् तस्य उपन्यासस्य उपजीव्यविषयः।

माद्र्याः दुःखः - पीड़ा अहरह डॉ. दीपकचन्द्रस्य अन्तःकरणं स्पृशति। एतद्कारणवशात् सः माद्र्याः चेतनासमुद्रे निमज्जितो भूत्वा तस्याः नारीचित्तम् अनुभूय माद्रीचरित्रस्य आकलनं किञ्चित् भिन्नदृष्ट्याम् कृतवान्। समयः परिवर्तमानः। अतः समयेन सह मनुष्याणां प्राचीनचिन्ता अपि परिवर्तिता भवति। रक्षणशीलतया कुसंस्कारेण वा महाकालस्य रथचक्रं कदापि कोऽपि स्थगयितुं न शक्नोति। **माद्रीर कण्ठस्वर** इति उपन्यासे चिरन्तनसत्यमिदं प्रकाशितं भवति। उपन्यासमिदं केवलं समयेन सह मनुष्याणां मानसिकचिन्तनशैलीं परिवर्तयितुमेकं लघुरूपं गृहीतम्। डॉ. चन्द्रस्य उपन्यासे माद्र्याः परिचयम् एवमस्ति - अस्माकमिव माद्री अपि रुधिरचर्मेण निर्मिता एका समान्या नारी। समग्रजीवनसत्तां नीत्वा सा मनुष्याणां नागरिकन्यायालये उपस्थिता।

१. रूपवती माद्री - डॉ. दीपकचन्द्रस्य इयं माद्री अपि असामान्या रूपवती। महाभारते सा यथैव असामान्यरूपस्य अधिकारिणी आसीत्,[1] दीपकचन्द्रस्य उपन्यासेऽपि तथैव रूपवती अस्ति। तस्याः रूपस्य संवादं श्रुत्वा एव पितामहः भीष्मः केवलं तां दर्शनार्थं मद्रराज्यम् आगतवान्। यद्यपि भीष्मस्य आगमनस्य प्रधानमुद्देश्यम् आसीत् मद्रराज्येन सह एकं राजनैतिकसम्पर्कं प्रतिष्ठापनम्। यतोहि उत्तरपश्चिमाञ्चलस्य राज्यानि परस्परं गोष्ठीर्द्वन्द्वे लिप्तो भूत्वा क्रमेण क्षुद्रे क्षुद्रे राज्ये विभक्तानि सन्ति। अवसरेऽस्मिन् मद्रराजः अर्त्यायनः स्वीयपराक्रमेण तानि राज्यानि आत्मनः मद्रराज्यस्य अधीने आनीतवान्। एवंरूपेण मद्रराज्यम् उत्तरपश्चिमाञ्चलस्य एकं शक्तिशालीराज्यरूपेण आत्मप्रकाशम् अकरोत्। अतः मद्रराज्येन सह हस्तिनापुरस्य एकं राजनैतिकसम्पर्कः स्थाप्यते चेत् तर्हि हस्तिनापुरस्य प्रभावं प्रतिपत्तिं च वर्धयिष्यते इति चिन्तयित्वा एव भीष्मः मद्रराज्यम् आगतवान्।[2] किन्तु मद्रराज्यम् आगत्य माद्र्याः असामान्यरूपं दृष्ट्वा स भीष्मः सर्वं राजनैतिकचिन्तनं परित्यज्य केवलं तया सह भ्रातुष्पुत्रपाण्डोः वैवाहिकसम्पर्कमेकं स्थापयितुम् आकाङ्क्षां प्रकटितवान्। यद्यपि स एतादृशां विवाहोपयोग्यां कन्याम् अन्वेषणं कुर्वन् आसीत् या कन्या पाण्डोः प्रथमामहिषीं कुन्तीं प्रतिद्वन्द्वी भवेत्। अतः माद्री एव सा कन्या या स्वरूपेण बुद्धिमतीकुन्तीं पराजेतुं शक्नोति इति चिन्तयित्वा एव भीष्मः पाण्डोः द्वितीयामहिषीरूपेण माद्रीं चीतवान् – **माद्रीर रूपेर एकटा आलादा आकर्षण आछे। सेइ आकर्षणेर टाने पृथा (कुन्ती वा) क्रमेइ एका हये यावे।**[3]

माद्र्याः मनसि अपि आत्मरूपस्य कृते एका भीतिः आसीत्। तस्याः रूपस्य द्युतिः तस्याः मृत्युकारणं भवितुमर्हति, माद्र्याः एतादृशं चिन्तनं प्रमाणयति यत् सा सत्यमेव असामान्या रूपवती आसीत् – **रूप तो नय रूपेर आगुन। ताइ माद्रीर बड भय। ए आगुने यदि से पुडे मरे तार संसार छाइ हये याग्र सेजन्य सब समय एक अदृश्य देवतार काछे तार निरन्तर प्रार्थना।**[4] दीपकचन्द्रस्य इयं माद्री न केवलं रूपवती अपितु अतीव नम्र-कोमल-शान्तस्वभावसम्पन्ना, प्रत्युतपन्नमतिविशिष्टा एका सामान्या नारी आसीत्।

२. कूटराजनीत्याः क्रीडनकस्वरूपा - डॉ. दीपकचन्द्रस्य दृष्टौ माद्री भीष्म-व्यासदेवस्य अन्तर्द्वन्द्वे केवलम् एका क्रीडायन्त्री इव व्यवहृता आसीत्। न केवलं भीष्मस्य व्यासदेवस्य च, अपितु कुन्त्याः विदुरस्य च परिकल्पितनृशंस-राजनीत्याः बलिरूपेण अपि माद्रीम् उपस्थापितवान् अयं लेखकः। वस्तुतः स्वस्वकार्यसिद्धये तथा आत्मनोऽभिप्राय-पूर्तये भीष्मः कुन्ती च केवलं माद्रीं व्यवहृयते। पितामहः भीष्मः स्वीयराजनैतिकमुद्देश्यं साधयितुं मद्रदेशेन सह वैवाहिकसम्पर्कं स्थापयितुं सचेष्टः आसीत्। अतः अनेन कारणेन स माद्र्या सह पाण्डोः विवाहं कारितवान्। माद्र्याः विवाहे भीष्मस्य न केवलं राजनैतिकमुद्देश्यमासीत्, अपितु तस्य आत्मगौरवमासीत् अपरमेकं कारणम्। यतोहि

---

[1] श्रूयते यादवी कन्या स्वनुरूपा कुलस्य नः। सुबलस्यात्मजा चैव तथा मद्रेश्वरस् च॥

कुलीनाः रूपत्यश्च ताः कन्याः पुत्र सर्वशः।उचिताश्चैव सम्बन्धे तेऽस्माकं क्षत्रियर्षभाः॥ महाभारत मे नारी पृ. ८७-८८

[2] माद्रीर कण्ठस्वर पृ.- ११

[3] माद्रीर कण्ठस्वर – पृ. १३

[4] तदेव – पृ. १८

हस्तिनापुरे भीष्मेण एका नूतना विवाहपद्धतिः प्रवर्तितासीत्। समाजे प्रचलितविवाहपद्धतेः नियमानुसारेण वरः कन्यागृहं गत्वा विधिपूर्वकं तस्याः कन्यायाः पाणिग्रहणं करोति। अर्थात् वरः वधूम् आनयनार्थं वधूगृहं प्रति गच्छति। किन्तु भीष्मप्रवर्तितविवाहपद्धतिः भिन्ना आसीत्। अस्यां पद्धत्यौ वधूः पतिं ग्रहीतुं पतिगृहं गमिष्यति। नियममिदं न उपेक्षणीयम्। किन्तु व्यासदेवः पाण्डुमुपरि आत्मनः पितृत्वं प्रतिष्ठापयितुं भीष्मनिर्देशितविवाहपद्धतिम् उपेक्ष्य कुन्त्याः स्वयंवरसभायां पाण्डुं प्रार्थीरूपेण प्रेषयित्वा कुन्त्या सह पाण्डोः विवाहं कारितवान्। अनेन प्रकारेण हस्तिनापुरस्य नियमोल्लङ्घनस्य कृते भीष्म-व्यासदेवयोः मध्ये अन्तर्द्वन्द्वः प्रचलित आसीत् – **पाण्डु ओ कुन्तीर बिय़े नीय़े द्वैपायन या करल ता छिल तार अनधिकारचर्चा। राज्येर मानमर्यादार दिके ना ताकिय़े, परिबारेर साथे आलोचना ना करे अनाहूतेर मतो कुन्तीर साजानो स्वयम्बर सभाय़ पाण्डुके प्रार्थी करे हस्तिनापुरेर भाबमूर्तिर गाय़े कालिमालेपन करल। पाण्डुर ओपर पितृत्वेर दाबि प्रतिष्ठा करते भीष्मके अग्राह्य करार साहस ओ स्पर्धा देखाल। पाण्डुर ओपर पितृत्वेर दाबि प्रतिष्ठा करते भीष्मके अग्राह्य करार साहस ओ स्पर्धा देखाल। पाण्डुर ओपर कौरबबंशेर निय़म नीतिके किंबा भीष्मेर अभिभाबकत्वके एबं निय़न्त्रणके से तोयाक्का करे ना। द्वैपायनेर एइ निःशब्द बिद्रोह भीष्मके भाबिय़े तुलल। शुरु हलो तादेर दुजनेर मध्ये एक नीरब आत्ममर्यादार लडाइ।**[1]

अतः स्वीय आत्मगौरवं तथा आत्ममर्यादा प्रतिष्ठापयितुम् अर्थात् हस्तिनापुरे पुनः स्वप्रवर्तितविवाहपद्धति-मुपरि आधिपत्यविस्तारयितुं माद्र्या सह पाण्डोः द्वितीयवारं विवाहं कारितवान्। वरपक्षस्य समीपे कन्यापक्षस्य एतादृशं दीनम् आत्मसमर्पणम् अभिनवकौशलमेकम्। एवंरूपेण माद्रीं लक्षीकृत्य भीष्मस्य व्यासदेवस्य च विवादस्य सूचना अभवत्। न केवलं भीष्मः अपितु कुन्ती अपि स्वीयाभिप्रायपूर्तये माद्रीं व्यवह्रियते। केवलं कुन्त्याः कौशलेन चातुर्येन च वशका माद्री पत्या सह आत्महननस्य मार्गं चितवती – **कुन्तीर तिरस्कारे ओ अबज्ञाय़ एक गभीर अपराधबोधे परिबर्तित हय़े ताके क्लिष्ट करेछिल। निजेर प्रति बितृष्णा जन्माल। बेँचे थाकार इच्छेटा मरे गेल। कुन्ती ये ताके बेँचे थाकते देबे ना एटा बारंबार तार मृत्युर कामनाय़ स्पष्ट हय़े गेल। ताछाड़ा पाण्डुर अबर्तमाने निजेर काछे निजे बेँचे थाकाटा माद्रीर अर्थहीन हय़े गेल।**[2]

३. मातृत्वसुखात् वञ्चिता - "माद्रीर कण्ठस्वर" इति उपन्यासस्य विशेषता इयमस्ति यत् दीपकचन्द्रस्य इयं माद्री सन्तानहीना आसीत्। मातृत्वं नारीजीवनस्य सुखात्मकानुभूतिः भवति। किन्तु दीपकचन्द्रस्य इयं माद्री मातृत्वसुखात् वञ्चिता आसीत्। नकुलः सहदेवश्च तस्याः पुत्रौ न, तौ केवलं कुन्त्याः सन्तानौ स्तः। यतोहि कुन्ती आत्मनः उच्चाकाङ्क्षायै तथा हस्तिनापुरस्य राजसिंहासनमुपरि पुनः पाण्डोः आधिपत्यं स्थापयितुं वंशवृद्धेः यः उपायः चिन्तितवती तमुपायमवलम्ब्य माद्री सन्तानोत्पादनं कर्तुं न अभिलषितवती। कुन्त्याः शताधिकप्रार्थनायामपि माद्री स्वसिद्धान्तमुपरि अविचलिता आसीत्। पतिं विना सा कस्यापि अन्यस्य पुरुषस्य औरसे गर्भधारणं कर्तुं न इष्टवती –

[1] तदेव – पृ. १२

[2] माद्रीर कण्ठस्वर – पृ. १०६

"कुन्तीर सङ्गे तार एकटा नीरब लड़ाइ लेगे रइल। कुन्तीर शत अनुनय़ेओ माद्री तार अवस्थान थेके एकटुओ नड़ल ना। स्वामी छारा अन्य पुरुषेर औरसे गर्भ धारण करते राजि नय माद्री।[1]

किन्तु माद्र्याः इच्छायाः मूल्यं केनापि कदापि न दीयते। पाण्डुरपि तस्याः इच्छायाः सम्मानं न कृतवान्। अतः नूतनपरिवेशे कुन्त्याः अभिप्रायानुसारेण माद्री नकुलः सहदेवश्च जननीरूपेण परिचितिं प्राप्तवती। कुन्त्याः अस्मिन् कार्ये पाण्डोः समर्थनमपि आसीत्। किन्तु पत्युः एतादृशे समर्थने माद्री अतीव आश्चर्यचकिता अभवत् – **अबशेषे, हंसकूट पाहाड़े नकुल सहदेव नामे यमज पुत्ररा जन्मग्रहण करल। कुन्तीर गर्भज सन्तान हलेओ तारा माद्रीर सन्तान बले परिचित हलो। हंसकूटे थाकले पाछे माद्री आत्मपक्ष समर्थनेर सुयोग पाय सेजन्य शतश्रृङ्ग पर्बते इन्द्रद्युम्न सरोबरेर सन्निकटे तादेर नतुन बासस्थान निर्माण करल। नतुन परिबेशे माद्रीके नकुल सहदेबेर जननी हये थाकते हलो। पाण्डुइ ताके बोझाल की आर करबे बलो। सम्पर्के तुमि तो तादेर छोट मा। गर्भे धारण करलेइ येमन मा हय़ ना, तेमनि गर्भ धारण ना करेओ एकजन सत्यिकारेर मा हय़े याय़। तुमि ना हय़ कुन्तीर इच्छेर समर्थने तोमार सम्मति जानाले। ताते तोमार चरित्र अशुद्ध हय़े याबे ना। निर्बिरोधी स्वामीर अद्भुत युक्ति शुने माद्री आश्चर्य हलो।**[2]

यद्यपि माद्री ज्ञातवती यत् नकुलः सहदेवश्च कुन्त्याः विदुरस्य च सन्तानौ स्तः। न केवलं नकुलः सहदेवश्च, अपितु कुन्त्याः सर्वेषां पुत्राणां पिता केवलं विदुरः, न कोऽपि देवः। पाण्डोः प्रजननक्षमता नासीत्। अनेन कारणेन कुन्ती देवान् न आहूय विदुरम् आह्वयति स्म। विदुरस्य भ्रूणमेव रेवती – अश्विनीकुमारमिव द्वाभ्यां धन्वन्तरीभ्यां माध्यमेन माद्र्याः जठरे संस्थापयितुं कुन्ती प्रयासं कृतवती। अतः विदुरस्य पुत्राः हस्तिनापुरस्य राजसिंहासनस्य उत्तराधिकारिणः भविष्यन्ति एतद् आसीत् कुन्त्याः अभिप्रायः।[3]अनेन कारणेन एव मात्रा सह सन्तानस्य यः अन्तःसम्बन्धः विद्यते, तादृशः सुसम्पर्कः केवलं कुन्त्या सहैव परिलक्ष्यते न तु माद्र्या सह। अतः माद्र्या सह नकुलः सहदेवश्च कोऽपि सुसम्पर्कः नासीत्। कुन्त्याः अभिप्रायपूर्तये यदा माद्री आत्महननस्य मार्गं सुनिश्चितवती, तस्मिन् समये नकुलसहदेवस्य नेत्रे एका वारिधारा अपि नासीत्। तयोः समीपे जननीरूपेण न तु माद्री, केवलं कुन्ती मातारूपेण परिचितिं प्राप्तवती। एतद्कारणवशात् माद्र्याः मनसि अपि नकुलसहदेवस्य कृते तादृशः स्नेहः नासीत्।

४. कुरुक्षेत्रमहायुद्धस्य सम्भाव्यबीजस्वरूपा - कुरुपाण्डवयुद्धे माद्र्याः कापि भूमिका नासीत्। तथापि डॉ.चन्द्रः माद्रीं कुरुक्षेत्रयुद्धस्य सम्भाव्यबीजरूपेण निर्दिष्टवान्। माद्रीमुद्दिश्य भीष्मव्यासदेवयोः मध्ये विवादः समुत्पन्नः अभवत्। किन्तु अनेन विवादकारणेन एव कुरुक्षेत्र इव महाविध्वंसीमहायुद्धस्य प्रारम्भोऽभवत्। सत्यमिदम् अनुभूय ज्ञात्वा चैव डॉ.चन्द्रः महाभारतस्य गौणचरित्रमिदं स्वीयउपन्यासस्य 'नायिकां' कृतवान्। यद्यपि कुरुक्षेत्रयुद्धस्य पूर्वमेव माद्र्याः प्रवेशः प्रस्थानश्च अभवत्। किन्तु अस्मिन् समयाभ्यन्तरे एव कुरुक्षेत्रयुद्धस्य बीजवपनम् अभवत्। अस्य बीजस्य अङ्कुरणम् माद्र्या आत्मस्वातन्त्र्यबोधेन कुन्त्याः समीपे आत्मनः अस्तित्वरक्षणार्थं प्रयासेन अभवत्। मूलतः

---

[1] तदेव. – पृ. ९६

[2] तदेव. – पृ. ९७

[3] माद्रीर कण्ठस्वर – पृ. ९८-९९

आत्मस्वातन्त्र्यबोधोऽयमेवासीत् तस्याः मृत्योः कारणम्। अर्थात् एवं वक्तुं शक्यते यत् आत्मस्वातन्त्र्यबोधनिमित्तं सपत्न्या कुन्त्या सह माद्र्याः तादृशः सुसम्पर्कः नासीत् इति कारणवशात् सा पत्या सह आत्महननस्य मार्गं चितवती। शतशृङ्गपर्वते कुन्त्याः गुप्तषड़यन्त्रस्य सर्वस्य कृतकर्मणः च साक्षी आसीत् केवलं माद्री पाण्डुश्च। अतः तेषां जीवितावस्थायां कुन्ती कदापि हस्तिनापुरस्य राजसिंहासनमुपरि अधिकारं स्थापयितुं न शक्नोति। अपिच कुन्ती केन साहाय्येन जननी अभवत् अर्थात् कुन्त्याः पञ्चसन्ततीनां जनकः विदुरः, अस्य विषयस्य अपि साक्षी आसीत् माद्री पाण्डुश्च। अतः हस्तिनापुरस्य राजसिंहासनप्राप्तये तथा हस्तिनापुरे एकां नूतनां वंशधारां प्रतिष्ठापयितुं एतावद्पर्यन्तं यं प्रयासं कुन्ती कृतवती, तस्मिन् प्रयासे माद्री पाण्डुश्च कामपि समस्यां सर्जयितुं शक्यते इति चिन्तयित्वा कुन्ती माद्रीं पाण्डुं च उभयमेव मृत्योः कृते प्रेरणां दत्तवती। पाण्डोः पञ्चत्वप्राप्तेः अनन्तरम् आत्मनः निर्दोषतां प्रमाणयितुं माद्रीमपि आत्महननमार्गचयने बाध्यं कृतवती। माद्र्याः पाण्डोः च उभयोः मृत्युरेव कुन्त्याः हस्तिनापुरं प्रत्यावर्त्तनस्य मार्गं प्रशस्तं कृतमासीत्। तेषां शवमाश्रित्य यदि कुन्ती हस्तिनापुरं प्रविशति तर्हि कोऽपि सन्देहं न करिष्यति, कमपि प्रश्नमपि कर्तुं न शक्नोति। अनेन प्रकारेण कुन्ती तेषां शवदेहमाश्रित्य केवलं हस्तिनापुरे आत्मनः पुत्राणाम् अधिकारं स्थिरीकर्तुं प्रयासं कृतवती - **पाण्डु ओ माद्रीके निय़े हस्तिनापुरे प्रत्यावर्तनेर आर कोनो समस्या नेइ। तारा थाकल ना, किन्तु तादेर प्राणेर स्थूल प्रकाश देह तो रइल। ओरा आज तार सन्तानदेर उत्तराधिकारी हओयार साक्षी। अथच, ओदेर काछ थेके विपदेर कोनो आशङ्का नेइ। शवाधार थेके ओदेर तुले एने धृतराष्ट्र, शकुनि किंबा कौरब प्रधान भीष्म जेरा करार कोनो सुयोग पाबे ना।**[1]

अपि च, माद्री भीष्मस्य मनोनीता पात्री आसीत्। अतः अनेन कारणेन माद्र्याः पुत्रसन्तानरूपेण नकुलः सहदेवश्च पाण्डोः उत्तराधिकारी भवितुं शक्नोति इति चिन्तयित्वा एव सा कुन्ती हस्तिनापुरं गमनात् प्रागेव माद्रीवधस्य परिकल्पनां कृतवती। पाण्डोः माद्र्याः च शवदेहमाश्रित्य कुन्ती या राजनीतिः कृतवती, तेन सा न केवलम् आत्मनः पञ्चपुत्रान् पाण्डोः पुत्ररूपेण परिचितिं दत्तवती, अपितु कौरवपरिवारस्य अभ्यन्तरे राजसिंहासनस्य उत्तराधिकारं प्रति कौरव-पाण्डवयोः विवादस्य सूचनां कृतवती। कुन्ती सा नारी या प्रथमं आत्माभिप्रायपूर्तये शवदेहं साक्षीरूपेण व्यवहृत्य हस्तिनापुरे सर्वेषां मनसि तस्याः कृते आवेगम् उत्पादयितुं समर्था अभवत्।[2] दीपकचन्द्रस्य इयं माद्री भारतीयसमाजे परिवारे च एका सामान्या नारीरूपेण विराजमानास्ति। एका धर्मपरायणा स्त्री सर्वदा पत्युः दीर्घायुकामना, हितकामनां च करोति। पत्युः जीवने सपत्नीरूपेण अपि कस्याः नार्याः उपस्थितिमपि न अङ्गीकरोति। माद्री अपि तत् कृतवती। एका सामान्या विवाहिता नारी इव प्रजनेन असमर्थं पतिं पाण्डुं दूषितवती तिरस्कृतवती च। परन्तु शनैः शनैः पत्युः मनोवेदनाम् अनुभूय तं सान्त्वनामपि दत्तवती। पतिपरायणा माद्री पतिं विना अन्यस्य पुरुषस्य औरसे सन्तानोत्पादनं कर्तुमपि न इच्छति। अपिच, कुन्त्याः कौशलेन अभिप्रायानुसारेण च पत्युः मृत्युकारणम् भूत्वा पत्या सहैव पञ्चत्वं प्राप्तवती। एका नारी सर्वेषां सुखाय यत् कर्तुं शक्नोति आत्मबलिदानेन एव माद्री तत् प्रमाणयितुं सर्वदा प्रयासरता

[1] तदेव. – पृ. १०८

[2] माद्रीर कण्ठस्वर. – पृ. ११२

आसीत्। बङ्गसाहित्ये आधुनिकदृष्ट्या महाकाव्यस्य निगूढरूपेण परिज्ञानार्थं डॉ. दीपकचन्द्रस्य वैदुष्यवन्दनम् अवश्यमेव कुर्युः सर्वादौ। यतो हि महाभारतस्य महारण्ये प्रवेशः यादृशः क्लिष्टकरः तादृशः दुःसाध्य एव इति जनप्रवादोऽस्ति। अतः डॉ. चन्द्रस्य एतया लेखनीप्रसूतकृत्या वयं न केवलं महाभारतेन सह परिचिता भवामः, अपि च महाभारतस्य पौराणिकाख्यानां नवानुशीलनेन अनुधावनयोग्यकर्तुं सक्षमा भविष्यामः। पौराणिकवाङ्मयस्य अन्तर्निहितगूढार्थस्य नवाङ्गिके नवानुशीलनेन भाविकालस्य अनुसन्धित्सु पाठकानां समीपे ग्रहणयोग्यता सम्पादयितुं यथेष्टं प्रयासं कृतवान् डॉ.चन्द्रः, येन वर्तमानकालिकपाठकाः पौराणिकवाङ्मयमवलम्ब्य रचितां डॉ. चन्द्रस्य साहित्यकृतिं न केवलं विनोदनार्थं पठिष्यन्ति, अपि तु वास्तविके आङ्गिके भारतराष्ट्रस्य तथा प्राचीनार्यावर्ताणां जनानां जीवनशैलीं जीवनेतिहासं च परिज्ञातुं पठिष्यन्ति इति वक्तुं शक्यते। इतोऽपि आधुनिकबङ्गसाहित्यस्य अध्येतार: तस्य ऋणं सश्रद्धं स्मरेयुः। सम्पूर्णे वास्तविके आङ्गिके नूतनतथ्यानुसन्धानमाध्यमेन भाविकालिकपाठकानां सम्मुखे नवचेतनायाः द्वारम् उन्मोचितं भवतु इत्यासीत् डॉ. चन्द्रस्य ऐकान्तिककामना, एवं मन्ये। वर्तमानकाले यस्यां सभ्यतायां वयं निवसामः, तस्याः वास्तवता-मनस्तत्त्वनैतिकतायाः तथा जीवनादर्शस्य दृष्ट्यौ पौराणिकचरित्राणि अनुभाव्य आधुनिकयुगमानवरूपेण आकलनं कृत्वा बङ्गसाहित्ये नूतनं दृष्टान्तमेकं स्थापितवान् डॉ. दीपकचन्द्रः। एवं रूपेण तस्य स्वकीयसृजनशैली सर्वेषां पाठकानां सम्मुखे प्रकाशतामगात्। अतः अत्रैव वर्तते तस्य कृतिवैशिष्ट्यस्य साफल्यम्। अतः अस्मिन् नवीनसहस्राब्दे अस्य बङ्गोपन्यासिकस्य स्वप्रतिभया निपुणरचनाशैल्या च बङ्गसाहित्य इव संस्कृतसाहित्यक्षेत्रेऽपि नूतनगवेषकानां कृते सम्भावनानां नवद्वारमपावृणुयादित्याशास्महे।

<u>सहायकग्रन्थसूची</u>

1. चन्द्र, डॉ. दीपक. (२००५), माद्रीर कण्ठस्वर .कलिकाता, देज पावलिशिं. (१म. प्रकाश)।
2. दाहालः, आचार्य लोकमणि. (चतुर्थसंस्करण, सन् २०११), संस्कृतसाहित्येतिहासः, वाराणसी, चौखम्बा कृष्णदास एकादेमी।
3. मिश्र, आचार्य रामचन्द्र. (२०१० ई), संस्कृतसाहित्येतिहासः, वाराणसी चौखम्बा विद्याभवन।
4. पाण्डे, डॉ. कृष्णनन्द, (२००५), महाभारत मे नारी, दिल्ली, नाग पब्लिशर्स।
5. श्रोत्रिय, प्रभाकर, (२०१६), भारत मे महाभारत, नई दिल्ली, भारतीय ज्ञानपीठ, (तृतीय संस्करण)।
6. वन्धोपाध्याय, श्रीकुमार, (१९९२), बङ्गसाहित्ये उपन्यासेर धारा, कलकाता, मर्डान् बुक एजेन्सी प्राइभेट् लिमिटेड्, (नवसंस्करण)।
7. भट्टाचार्य, श्रीसुखमय, (१४१६), महाभारतेर चरितावली, कलकाता, आनन्द पाबलिशार्स, (५म. मुद्रन)।
8. घोष, श्रीमयी, (अनुसन्धात्री), (२०१४), पृथा, प्रथम पार्थ ओ पाञ्चालीः 'महाभारत' थेके 'मृत्युञ्जयः', यादवपुर विश्वविद्यालय।

<u>Author's Details</u>

Address: State Aided College Teacher (SACT)
Vivekananda Pally (College Road)
Behind Canara Bank, Chanchal, Malada
West Bengal, 732123
Email: paulamiroychal@gmail.com

****

योगशास्त्रस्य विद्यार्थिजीवने क्रियान्वयस्य अनुप्रयोगात्मकम् अध्ययनम्

डॉ. दवे नेहल नरेन्द्रकुमार

शोधसारः

योगशास्त्रस्य श्रवणे सति बहुधा आसनानां, ध्यानस्य च चित्रं मनसि उद्भवति। अधिकाधिकं प्राणायामस्य स्मरणं भवति। परन्तु अष्टाङ्गयोगः इति तु कश्चन विशालः विषयः वर्तते, यः मनुष्याणां सर्वासां समस्यानां समाधानं कर्तुं शक्नोति। मनुष्याणाम् अधिकतमाः समस्याः आधिदैविक्यः न सन्ति, ताः तु आध्यात्मिक्यः, आधिभौतिक्यः च। वास्तव्येन अद्यतनस्य भौतिकजगतः निर्माता स्वयं मनुष्य एव वर्तते, परन्तु सः स्वस्य मूलाधारं, मूलस्वरूपं चैव विस्मृतवान्। परिणामतः व्याधयः, आततिः, भारः, विविक्ततता, सामाजिकसमस्या, वियोगभयः, दुःखम्, आक्रामकता, अव्यवस्थितं जीवनं, स्वास्थ्यसमस्या, भावनात्मक-अनाधारः, घृणा, आतङ्कवादः इत्येताः समस्याः मनुष्येण एव उत्पादिताः सन्ति। उक्ताः सर्वाः समस्याः एव मनुष्येषु अन्तःकलहं जनयन्ति। वर्तमाना सन्ततिः अग्रिमायै सन्तत्यै एताः सर्वाः समस्याः उत्पादितुम् एव ज्ञात्वा, अज्ञात्वा वा प्रशिक्षणं प्रयच्छति। अर्थात् विद्यार्थिकालावधौ एव सर्वासां समस्यानां मूलं दृश्यते, तदेव मूलम् अग्रे वृक्षस्य स्वरूपं धरते इति स्वीकर्तव्यम्। उक्तञ्च – **अशक्तिरापदस्तृष्णा मूकता मूढबुद्धिता। गृध्नुता लोलता दैन्यं सर्वं बाल्ये प्रवर्तते॥**[1]

लीलासु दुर्विलासेषु दुरीहासु दुराशये। परमं मोहमाधत्ते बालो बलवदापतन्॥

विकल्पकल्पितारम्भं दुर्विलारसं दुरास्पदम्। शैशवं शासनायैव पुरुषस्य न शान्तये॥

ये दोषा ये दुराचारा दुष्क्रमा ये दुराधयः। ते सर्वे संस्थिता बाल्ये दुर्गर्ते इव कौशिकाः॥[2]

अतः एताः समस्याः मूलतः एव ज्ञातव्याः, तासाम् उन्मूलनं च आवश्यकं भवति। विद्यार्थिरूपेण बालः यदि पारम्परिकसमस्यानाम् उन्मूलनाय प्रशिक्षितः भवति, तर्हि पूर्वसन्तत्या अनुवर्तितानां समस्यानां लोपः उत ह्रासः भवेत्। कालान्तरे स्वस्थमानसिकतायुक्ता सन्ततिः उत्तरोत्तरं वर्धते। प्रतिदिनस्य जीवने योगस्य विविधानां सिद्धान्तानां पालनेन विद्यार्थिनः शारीरिकक्षमतायां, मानसिकक्षमतायाम्, आध्यात्मिक-क्षमतायां च वृद्धिः भवति। कश्चन विद्यार्थी यदि परिस्थित्यनुसारं केनचित् मनोविकारेण ग्रसितः अस्ति, तर्हि योगशास्त्रे वर्णितानां लक्षणानाम् आधारेण सः आत्ममूल्याङ्कनं कर्तुं शक्नोति, ततश्च योगशास्त्रस्य उपयोगस्य अनुसारं निदानम् अपि प्राप्नोति। न केवलं विषयं प्रति परन्तु सम्पूर्ण-अध्ययनपद्धतिं प्रति तस्य दृष्टकोणः यौगिकदृष्टिकोणः भवति चेत्, तस्य सम्पूर्णं शैक्षणिकप्रदर्शनम् उत्कर्षितं भवति। वर्तमानयुगे योगस्य महत्त्वम् अतीव स्पष्टतया द्रष्टुं शक्यते, अतः न केवलम् अध्ययने अपि तु जीवने अपि विविधस्तरे योगस्य सिद्धान्तानाम् उपयोगः आगम्य-मानानां समस्यानां समाधानाय अतीव आवश्यकः भवति। अतः एतस्मिन् शोधपत्रे योगशास्त्रस्य विविधाः सिद्धान्ताः अपि कथं जीवने क्रियान्विताः करणीयाः इति उपस्थाप्यते। विद्यार्थिनः सर्वाङ्गिणं विकासं साधयितुं योगशास्त्रं योग्यं मार्गदर्शनं तु करोति, परन्तु योग्यस्य नागरिकस्य रचनायाम् अपि आमूलचूलं सहयोगं प्रयच्छति। आवर्षम् अनावश्यक-अध्ययन-दृष्टकोणस्य अनुसरणत्वात् विशेषतया परीक्षाकाले विद्यार्थिनः व्यवहारः अतीव भिन्नः भवति। परीक्षाकाले विद्यार्थिनि निम्नलक्षणानि सामान्यतया दृश्यन्ते। १) अज्ञातं प्रति चिन्ता, २) मनसि भयस्य, अस्थिरतायाः च भावना, ३) अनियन्त्रिताः, आसक्ताः च विचाराः, ४) दुस्स्वप्नानि, ५) अनिद्रा, ६) हृदयस्य गतौ वर्धनम्। परन्तु अध्ययनक्षेत्रस्य, समाजस्य च उक्तानां सर्वासां समस्यानाम् उन्मूलनस्य उपायः योगशास्त्रे निश्चयेन प्राप्यते, अतः अनुप्रयोगात्मकं शोधपत्रमिदम् उपस्थाप्यते।

कूटशब्दाः – योगशास्त्रस्य विद्यार्थिनां जीवने क्रियान्वयनम्, योग का विद्यार्थीओं पर क्रियान्वय, विद्यार्थीओं के लिये योग, विद्यार्थीओं की मनोवैज्ञानिक समस्याएँ, योग अनुसार दिनचर्या।

****

---

[1] योगवाशिष्ठः, वैराग्यप्रकरणम्, सर्गः – १९, v. २

[2] तत्रैव, vv. ८-१०.

"**यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि**[1] इत्यनेन सूत्रेण योगस्य अष्टाङ्गानि उक्तानि। तेषां योगाङ्गानाम् उद्देश्यं किमितिप्रश्ने जाते सति "**योगाङ्गाऽनुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः**॥[2] इति सूत्रं ज्ञातव्यम्। अर्थात् अष्टाङ्गयोगस्य अनुष्ठानमात्रेण क्लेशरूपा अशुद्धिः दूरे भवति, तत्त्वज्ञानञ्च प्राप्यते इति। अविद्यानाशस्य, कैवल्यप्राप्तेः च उपायत्वेन भगवान् पतञ्जलिः अविप्लवायाः विवेकख्यातेः निरूपणम् अकरोत्।[3] अतः स्पष्टम् अस्ति यत्, अष्टाङ्गयोगः क्लेशरूपाज्ञानस्य निवृत्त्यै, हानस्य[4] प्राप्त्यै च आवश्यकः इति। यौगिकक्षेत्रात् बहिः अर्थात् व्यावहारिके जीवनेऽपि याः क्लेशरूपाः अविद्याः सन्ति, ताभ्यः उत्पन्नानां दुःखानां निवृत्तिः अष्टाङ्गयोगस्य अभ्यासेन भवितुम् अर्हति। एतस्याः पृष्ठभूमेः आलोके एव विद्यार्थिनः जीवने उत्पन्नस्य अज्ञानस्य निवृत्तिः कथं भवति, हानस्य प्राप्तिः कथं भवति च इति ज्ञातव्यं भवति। अष्टाङ्गयोगस्य दैनिकजीवने क्रियान्वयनाय विद्यार्थी अष्टाङ्गयोगस्य आचरणं कुर्यात्। अतः सर्वप्रथमं सः सन्ध्याकाले प्राणायामानां नियमिततया अभ्यासं कुर्यात्। उक्तञ्च –

प्रातर्मध्यन्दिने सायमर्धरात्रे च कुम्भकान्।
शनैरशीतिपर्यन्तं चतुर्वारं समभ्यसेत्॥[5]

सूर्योदयकाले – ५:४० तः ६:२० पर्यन्तं, मध्याह्नकाले – ११:४० तः १२:२० पर्यन्तं, सायङ्काले – ५:४० तः ६:२० पर्यन्तं, मध्यरात्रौ – ११:४० तः १२:४० पर्यन्तं कुम्भकानाम् अभ्यासं विद्यार्थी कुर्यात्। प्राणायामस्य अभ्यासेन मनसः, शरीराभ्यान्तरस्य च मलानाम् उन्मूलनं भवति।[6] प्राणायामेन सात्त्विकतायाः सञ्चारः भवति, यः दैनिकक्रियासु अतीव महत्त्वपूर्णां भूमिकां भजते। परन्तु प्राणायामस्य अभ्यासाय शौचस्य, तपसः च आवश्यकता भवति, ये पञ्चनियमेषु[7] अन्तर्भवतः।[8] त्रिप्रकारकशौचेषु बौद्धिकशौचेन सः कुविचाराणां त्यागं कृत्वा स्वबुद्धिं प्राणायामाय प्रेरयितुं शक्नोति। अत्र कुविचाराः इत्युक्ते प्रातः शीघ्रजागरणेन कः लाभः? ह्यः रात्रौ अतीव विलम्बः जातोऽतः अधिकं शयनं करोमि, १० निमेषान् यावत् अधिकं शयनं कृत्वा जागरणं करोमि, अहम् अलसः अस्म्यतः अद्य जागरणं करोमि चेदपि प्रतिदिनं तु कर्तुं न शक्नोमि इति। त्रिप्रकारक-तपस्सु बौद्धिकतपसा सः निद्रायाः त्यागं कर्तुं शक्नोति। यतः अलसरूपायाः मानसः दुर्वृत्तेः निग्रहणं सः सद्विचारैः कर्तुं शक्नोति। यथा – आदिनम् अहं यत्किमपि करोमि, तस्य आरम्भः

---

[1] पातञ्जलयोगसूत्रम्, २ – साधनपादः, सूत्रम् – २९.

[2] तत्रैव, सूत्रम् – २८.

[3] विवेकख्यातिरविप्लवा हानोपायः॥ तत्रैव, सूत्रम् – २६.

[4] तस्यादर्शनस्याभावादबुद्धिपुरुषसंयोगाभाव आत्यन्तिको बन्धनोपरम इत्यर्थः। एतद्धानम्। तद्दृशेः कैवल्यं पुरुषस्यामिश्रीभावः पुनरसंयोगो गुणैरित्यर्थः। - व्यासभाष्यम्, सूत्रं – २५. Also तस्या अविद्यायाः स्वरूपविरुद्धेन सम्यग्ज्ञानेनोन्मूलिताया योऽयमभावस्तस्मिन्सति तत्कार्यस्य संयोगस्याप्यभावस्तद्धान-मित्युच्यते। - भोजवृत्तिः, सूत्रं – २५.

[5] हठप्रदीपिका, द्वितीयः उपदेशः, v. ११.

[6] प्राणायामैरेव सर्वे प्रशुष्यन्ति मला इति। हठप्रदीपिका, द्वितीयः उपदेशः, v. ३८.

[7] अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहा यमाः॥ पातञ्जलयोगसूत्रम्, २ – साधनपादः, सूत्रं – ३०.

[8] शौच-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानानि नियमाः॥ तत्रैव, सूत्रम् – ३२.

पर्यङ्कत्यागेन भवति, अतः पर्यङ्कत्यागरूपः दिनस्य प्रथमः निर्णयः स्वजीवनोत्कर्षं प्रति मम दृढसङ्कल्पस्य परिचायकः अस्ति, अतः मया कुविचाराणां त्यागेन नित्यक्रिया आरम्भणीया एव इति। बौद्धिक-शौच-तपसी प्रातः उत आदिनं सात्त्विकवृत्तीनां सञ्चाराय साहाय्यं कुरुतः। अनेन ईश्वरप्रणिधानस्य, स्वाध्यायस्य च आचरणे साहाय्यं भवति।

यदा विद्यार्थी प्रातः उत्थाय प्राणायामादीनाम् अनन्तरम् आदिनम् ईश्वरप्रणिधानस्य नियमम् अनुसर्तुं सङ्कल्पं करोति, तदा सः सर्वकार्येषु उत्साहितः भवति। उत्साहस्तु योगसाधकतत्त्वेषु अन्तर्भवति।[1] अत्र एव सः ध्यानं कृत्वा स्वमनः सुस्थिरं कुर्यात्। ईश्वरप्रणिधानस्य समनन्तरं सः आसनादीनाम्[2] अभ्यासेन स्वशरीरस्य क्लान्तिम् अपहृत्य शारीरिकीं, मानसिकीं च स्थिरतां सुनिश्चयेत्।[3] ततः बाह्यशौचस्य अनुपालनोत्तरं स्वाध्यायाय मनः सज्जीभवति। योगिनां कृते ॐकारस्य, विविधमन्त्राणां च मननं स्वाध्यायः भवति। परन्तु विद्यार्थिनः जीवने अध्ययनविषयाणां मननम् एव स्वाध्यायः। अतः सः मनोनिग्रहपूर्वकं स्वाध्यायस्य आचरणं कुर्यात्। प्रातः स्वाध्यायोत्तरं विद्यार्थी बहुधा पठनाय विद्यालयादिकं शैक्षणिकं परिसरं गच्छति। सद्यः विद्यार्थी कक्ष्यायां ध्यानं दातुं न शक्नोति। यतः सः गृहात् दूरे बस-द्विचक्रिकासंस्थायानैः परिसरं प्राप्नोति। गृहात् शालां यावत् तस्य सम्मुखम् अनेके विषयाः समुपस्थिताः भवन्ति, ततोऽधिकं गमनागमने तस्य अनावश्यकः श्रमः अपि भवति, यः तस्य शारीरिकीं, मानसिकीं च क्षमतां हरति। यानारूढः सः अध्ययनं विहाय सर्वत्र ध्यानं ददाति, येन अध्ययनकाले कक्षायां सः एकाग्रः न भवति उत तस्य एकाग्रतायां न्यूनता दरीदृश्यते। उक्तञ्च –

अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः। जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति॥[4]

वर्जयेद्दुर्जनप्रान्तं वह्निस्त्रीपथिसेवनम्। प्रातःस्नानोपवासादि कायक्लेशविधिं तथा॥[5]

अतः विद्यार्थी अकरणीयानि सर्वाणि कार्याणि त्यक्त्वा दृढमनः कक्षायाम् उपस्थितः स्यात्। एतस्य कृते सः प्रत्याहारस्य[6] अपि अभ्यासं कुर्यात्। यतः इन्द्रियाणां स्वविषयेभ्यः विच्छेदे सति चित्तस्य स्वरूपानुकरणं प्रत्याहारः उच्यते। उक्तञ्च – **पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात्पराङ्पश्यति नान्तरात्मन्।**

कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्॥[7]

गृहात् शैक्षणिकपरिसरे दूरे सत्यपि विद्यार्थी यथाशक्तिः योगबाधकतत्त्वेभ्यः दौर्यं स्थापयेत्। मार्गे अध्ययनचिन्तनं, नामजपः, पुनरावर्तनं, मानसिकशौचं च कुर्वन् स्वबुद्धिं स्थिराम् एव स्थापयेत्। रूप-रस-गन्ध-शब्द-स्पर्शाः इन्द्रियाणां भोजनं भवन्ति, अतः इन्द्रियेभ्यः भोजनम् अदत्त्वा मार्गे सः सततं प्रत्याहारस्य आचरणं कुर्यात्।

---

[1] उत्साहात् साहातसात् धैर्यात् तत्त्वज्ञानाच्च निश्चयात्। जनसङ्गपरित्यागात् षड्भिर्योगः प्रसिद्ध्यति॥ हठप्रदीपिका, प्रथमः उपदेशः, v. १६.

[2] स्वस्तिक-गोमुख-वीराः, कूर्म-कुक्कुट-उत्तान-धनुंषि। मत्स्येन्द्र-पश्चिमतानौ, मयूर-शव-सिद्ध-पद्म-भद्राः॥ - बालबोधाय स्वनिर्मितः श्लोकः।

[3] कुर्यात्तदासनं स्थैर्यमारोग्यं चाङ्गलाघवम्॥ स्वात्मारामविरचिता हठप्रदीपिका, प्रथमः उपदेशः, v. १७.

[4] हठप्रदीपिका, प्रथमः उपदेशः, v. १५.

[5] Ibid, v. ६२.

[6] पातञ्जलयोगसूत्रम्, २, साधनपादः, सूत्रं – ५४, स्वविषयसम्प्रयोगे चित्तस्वरुपानुकार इवेन्द्रियाणां प्रत्याहारः॥

[7] कठोपनिषद्, २:१.१.

परिणामतः कक्षायां तस्य एकाग्रता, उत्साहः, धैर्यञ्च वर्धते। एकवारं कक्षायां विद्यार्थी स्थिरो भवति, ततः गृहकार्ये अपि तस्य गतिः आवश्यकी भवति। यतः गृहकार्यादीनाम् अभ्यासेन विद्यार्थी अध्ययनविषये विस्तारेण चिन्तनं कर्तुं, क्रियान्वयनं च कर्तुं शक्नोति। गृहकार्ये धारणायाः[1] अभ्यासः साहाय्यं करोति। कस्मिन्नपि विषये चित्तस्य स्थिरीकरणं धारणा भवति। योगाभ्यासः यथा आवश्यकः, तथैव अध्ययने अभ्यासः अपि आवश्यकः भवति।[2] सद्यः गृहकार्यम् इत्युक्ते किमपि लिखित्वा उत स्मृत्वा गन्तव्यम्। परन्तु वास्तव्येन गृहकार्यं तु काक्षायां पठितस्य विषयस्य अधिकगभीरतया आलोडनं (stirring) भवति। महाविद्यालयोत्तरं विद्यार्थी युवावस्थायां चञ्चलायते। अतः तस्य अध्ययनभिन्नाः प्रजल्पाः अत्यधिकाः भवन्ति। एवं कक्षायां, गृहकार्ये, समनुदेशिते (assignment), कार्यशालायां च तस्य प्रगतिः अवरुद्धा भवति। तस्य प्रभावः अध्ययनविषयस्य आलोडने भवति। अन्ते सः मनोविकाराणां बीजानि जनयति। परन्तु अष्टाङ्गयोगस्य अभ्यासेन विद्यार्थी स्वविनाशं नाशयति। उक्तञ्च –

महानरकबीजेन सन्ततभ्रमदायिना। यौवनेन न ये नष्टा नष्टा नान्येन ते जनाः॥[3]

मनोविकाराः विद्यार्थिनं पूर्णतया नाशयितुं शक्नुवन्ति। पश्चात् तस्य पार्श्वे "I quit" इति वचनम् एव अवशिष्टं भवति उत सर्वदा अवसादग्रस्तः अटति। तस्य अवसादस्य अवस्थायां सः अधिकाधिकम् अकरणीयानि कार्याणि करोति। अन्ते स्वस्य, परिवारस्य, समाजस्य च कृते सः दुःखकारणं भवति। परीक्षावसरे तस्य विकाराः आकाशचुम्बिताः भवन्ति। ते विकाराः प्रत्यक्षाः एव भवन्ति। यथा उक्तं पातञ्जलयोगप्रदीपे – **व्याधि-स्त्यान-संशय-प्रमाद-आलस्य-अविरति-भ्रान्तिदर्शन-अलब्धभूमिकत्व-अनवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः॥**

दुःख-दौर्मनस्य-अङ्गमेजयत्व-श्वास-प्रश्वासा विक्षेपसहभुवः॥[4]

दृश्यतां स्वं परितः हसन् क्रीडन् गच्छन् विद्यार्थी अपि एकान्ते आत्मानम् उच्चैः मनोविकारैः ग्रस्तम् अनुभवति। ते विकाराः तस्य अध्ययनकार्ये विघ्नान् जयन्ति। अतः सः कदाऽपि वास्तविकाध्ययनं कर्तुं न प्रभवति।[5] अन्ते सः प्रतिकृतिं (copy and paste), चौर्यं, कार्यलोपं च करोति। प्राथमिकशिक्षणाद् आरभ्य विद्यावारिधिं (Ph.D.) यावत् एषा श्रृङ्खला गच्छति, कथञ्चित् आजीविका प्राप्यते, परन्तु तत्राऽपि मनोविकारग्रस्तत्वात् प्रतिकृति-आदियुक्तम् एव जीवनं भवति। यदा जनः स्वमनसा किमपि न रचयति, तदा सः क्लान्तः, जामितः, अविविकी च भवति। धनं तस्मै सुखं ददाति, परन्तु एकान्ते तु सः उच्चैः मनोविकारैः ग्रस्तः सन् आत्मग्लानिम् अनुभवति। शनैः शनैः सः परिवारात्, समाजाच्च अपि दूरे भवति। क्रीडायां, कलायां, रचनात्मकतायां च तस्य रुचिः न भवति। अन्ते मानसिकपरितापात् रक्षणाय मनोरञ्जनत्वेन सः व्यर्थस्थानेषु (Youtube, FB, Twitter, Netflix, TV) समयं नाशयति, यतः वास्तविकं

---

[1] पातञ्जलयोगसूत्रम्, ३ – विभूतिपादः, सूत्रं – १ देशबन्धश्चित्तस्य धारणा॥

[2] क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथं भवेत्। न शास्त्रपाठमात्रेण योगसिद्धिः प्रजायते। - हठप्रदीपिका, प्रथमः उपदेशः, v. ६५.

[3] योगवासिष्ठः, वैराग्यप्रकरणम्, सर्गः – २०, v. ६.

[4] पातञ्जलयोगसूत्रम्, १ समाधिपादः, सूत्रं – ३०, ३१.

[5] Sailer HR, Stress: causes, consequences, and coping strategies. Schlacter J, Edwards MR Personnel. 1982 Jul-Aug; 59 (4): 35-48.

मनोरञ्जनं किम् इति तस्य ज्ञानं न भवति। एवं विद्यार्थि-अवस्थायां जातं दोषं सः आजीवनम् उद्वहति। परिणामतः चौर्य-वञ्चनालुण्ठनादिकम् (प्रत्यक्षपरोक्षतया) आचरति।[1]

विद्यार्थी जन्मतः योगदर्शनस्य, आयुर्वेदस्य, वेदान्तस्य च ज्ञाता न भवति, ततोऽधिकं सः बहुधा आजीवनम् एतेषां विषयाणाम् अध्ययनं न प्राप्नोति। गृहस्थाश्रमे सः स्वस्य एव जीवनं स्वापत्याय प्रयच्छति, एवम् एषा शृङ्खला न कदाऽपि भग्ना भवति। परन्तु शिक्षकः, अभिभावकाः च मिलित्वा विद्यार्थिनः जीवने वास्तविकजीवनशैलीं, पठनशैलीं, विचारशैलीं च स्थापयितुं शक्नुवन्ति, येन स्वजीवने अनुभूताः मनोविकाराः अग्रिमसन्तत्याः जीवने स्थानान्तरिताः न भवेयुः। एतावत् पठित्वा पाठकः (अभिभावकः, शिक्षकः वा) चिन्तयेत् यत्, अहं मम अपत्याय/विद्यार्थिने योगयुक्तं जीवनं दातुं प्रयत्नं करिष्यामि इति। परन्तु अत्र समस्या अस्ति, प्रप्रथमं भवता ज्ञातव्यं भवति यत्, स्वास्थ्यकरी दिनचर्या, जीवनचर्या च कीदृशी भवति इति। अनेके शिक्षकाः सन्ति, ये सज्जतां विना एव कक्षां गच्छन्ति, ततः ते अनर्गलं पाठयित्वा कक्षां समापयन्ति। अनेके अभिभावकाः सन्ति, ये स्वयं तु T.V., दूरभाषे च व्यस्ताः भवन्ति, परन्तु तस्मिन्नेव प्रकोष्ठे स्थितिं बालं पठितुम् आग्रहं कुर्वन्ति।[2] उभयत्रापि विद्यार्थिनः अध्ययनानुकूलता न भवति। अतः विद्यार्थिनः जीवने योगयुक्तस्य जीवनस्य विकसनात् प्राक् शिक्षक-अभिभावकाः स्वजीवने योगयुक्तां जीवनशैलीम् आत्मसात् कुर्युः। योगशास्त्रे सुष्ठु भोजनस्य अतीव महत्त्वं प्रदर्शितम् अस्ति। अतः स्वयं दिनचर्यायाः आरभ्य भोजनस्य, विचारस्य, आचरणस्य च विषये जागरूकाः भवेयुः। प्लास्टिक-पेकेट-पूरितं, मेंदा-युक्तं, बहिरात् आनीतं च भोजनं न कारणीयम्। उक्तञ्च – **भोजनमहितं विद्यात् पुनरप्युष्णीकृतं रूक्षम्। अतिलवणमम्लयुक्तं कदशनशाकोत्कटं वर्ज्यम्॥**[3]

प्रातः ऊष्णजलपानं, योगाभ्यासः, सद्विचाराय सत्पुस्तकानां पठनं च विद्यार्थिनः जीवनशैल्यां स्थापनीयं भवति। तस्मै योग्यवातावरणं प्रदातुं योग्यजनानां सम्पर्कः करणीयः भवति, येन विद्यार्थी यमनियमादीनां योग्यतया पालनं कर्तुं वातावरणं प्राप्नुयात्। विद्यार्थिने रुचिकरं सत्पुस्तकम् आकाशात् न पतति, तस्य कृते बालभोग्यपुस्तकानाम् आलोडनं स्वयं करणीयं भवति। अभिभावकैः मासत्रये एकवारं गौणशैक्षणिकप्रवासस्य आयोजनं करणीयं, यत्र विद्यार्थी प्रकृतिना, स्वनगरेण, स्वराज्येन, स्वदेशेन च सह तादात्म्यं स्थापयितुं शक्नुयात्। एतादृशी योगयुक्ता दिनचर्या, जीवनशैली च निश्चयेन विद्यार्थिनः अध्ययने साहाय्यं करोति।

शोधोद्देश्यम् –

- एतस्य संशोधनस्य उद्देश्यं ज्ञानविकासस्य वर्तते।
- विविधयोग-प्रकाराणां विद्यार्थिजीवने क्रियान्वयनात् लाभः भवेत्।
- विद्यार्थिनां शैक्षणिक-गतिविधौ एकाग्रतायाः अभावस्य समाधानप्राप्तिः भवेत्।

---

[1] Cohen Taya R., Panter A. T. and Turan Nazli, Article - Guilt Proneness and Moral Character, journal - Current Directions in Psychological Science, October 2012, Vol. - 21, Issue - 5, pp. 355–359

[2] Impact of background radio and television on High school students' Homework Performance, Authors - Cohen Taya R., Panter A. T. and Turan Nazli, https://research.vu.nl/ws/portalfiles/portal/1897320/157704.pdf

[3] हठप्रदीपिका, प्रथमः उपदेशः, v. ६०.

- विद्यार्थिनां मनोविकाराणां विषये योगशास्त्रात् अन्वेषणं भवेत्।
- योगे विद्यमानानां विचाराणाम् आधारेण मनोविकारस्य निदानं भवेत्।
- अध्ययन-गतिविधौ यौगिक-दृष्टिकोणप्रदानं भवेत्।
- योगस्य विविधानां सिद्धान्तानां विद्यार्थि-अवस्थायां क्रियान्वयनं भवेत्।
- विद्यार्थिनां यौगिक-दैनन्दिन्याः विकसनं भवेत्।

शोधप्रकारः – एतत् अनुप्रयोगात्मकम् अनुसन्धाम् अस्ति, यतः एतस्मात् शोधपत्रात् उत्पन्नपरिणामानां प्रयोगात्मकतया उत व्यवहारात्मकतया उपयोगः शक्यते। एतस्मिन् शोधपत्रे बालेभ्यः कीदृशः योगः सङ्गतः भवति, बालेषु मनोविकारसम्बद्धानां समस्यानां किं समाधानं भवेत्, बालानां जीवने योगः किं परिवर्तनम् आनेतुं शक्नोति इत्यादीनां विषयाणाम् अनुप्रयोगात्मकप्रकारस्य अध्ययनं क्रियते।

शोधपरिणामः –

- मन्त्रयोगस्य, हठयोगस्य, लययोगस्य, रोजयोगस्य, ज्ञानयोगस्य, कर्मयोगस्य च प्रतिदिनस्य अभ्यासेन विद्यार्थिनः शारीरिक-मानसिक-आध्यात्मिकतया च स्वोत्कर्षाय प्रयत्नं कुर्वन्ति, तेन तेषाम् **अध्ययनक्षमतायां वृद्धिः भवति**।
- मन्त्रजपः, ध्यानम्, आसनं च एकत्र दीर्घसमयं यावद्बालानां चित्तं केन्द्रितं करोति। तेन **शैक्षणिकगतिवधौ तेषां प्रदर्शनं वर्धते**।
- आधुनिकसमाजस्य विकासेन सह दूषणानां विकासः अपि जातः, येन विद्यार्थिनः अध्ययने रुचिः न भवति उत इच्छायां सत्याम् अपि (Youtube, FB, Twitter, Netflix कारणेन) गतिः न भवति। परन्तु स्वयं शिक्षकः उत विद्यार्थी मनोविकाराणां लक्षणानि न पश्यति। **योगशास्त्रे प्रतिपादितानां मनोविकाराणां (निराशा, चिन्ता, प्रमादः) लक्षणानि ज्ञायते**।
- योगे विर्णितस्य मानसिक-अभ्यासस्य, जीवनपद्धतेः अभ्यासस्य च कारणेन विद्यार्थी लक्षणानुगुणं **मनोविकारस्य निदानं प्राप्नोति**।
- यौगिकदृष्टिकोणेन अध्ययनं प्रति कश्चन विशिष्टः दृष्टिकोणः विकसति, येन विपरीतपरिस्थित्याम् अपि **विद्यार्थी अध्ययने अविरतश्रमं करोति**।
- यौगिकदिनचर्यायाः अनुपालनेन विद्यार्थी समयायोजनप्राथमिकतानिर्णयकार्यपद्धतीनां नियोजनं कृत्वा अधिकाधिकव्यवस्थिततया अध्यापनेन, क्रीडया, परिवारेण च सह **तादात्म्यं स्थापयितुं सफलो भवति**।

उपसंहारः - एवं विविधानां योगानां जीवने पालनेन विद्यार्थी स्वोत्कर्षं सहजतया कर्तुं शक्नोति, अन्ते तस्य परिणामेन एव ज्ञायते यत्, तस्य अध्ययनक्षमतायां वृद्धिः भवति इति। मन्त्रजाप-नादयोग-ध्यानादिकं विद्यार्थिनः मानसिकदृढतां वर्धयति। यतः विद्यार्थिनं परितः सर्वदा दुःसङ्गाः, लोभयुक्तपदार्थाः च भवन्ति, अतः प्रतिपलं तस्य सम्मुखम् आकर्षकविकल्पः समुपस्थितः भवति, परन्तु मन्त्रजापादिकं तस्य निर्णयशक्तिं सुदृढां कर्तुं साहाय्यं करोति।[1]

[1] Mindfulness meditation may improve decision-making, new study suggests –

एवं तस्य शैक्षणिकगतिविधेः प्रदर्शनम् अपि योग्यतरं भवति। मनोरञ्जनं, क्रीडा, संवादः इत्यादिकं सर्वम् अपि मनोभारं न्यूनीकर्तुं भवति, परन्तु मनोरञ्जनत्वेन कार्टूनदर्शनं तु मूर्खतायाः प्रदर्शनम् एव। विद्यार्थिनः रचनात्मकता, नियमानाम् उपयोगस्य, मिश्रणस्य च क्षमता, क्षिप्रम् उत्तरदानम् इत्यादिकं सर्वम् अपि मनोरञ्जनेन अधिकाधिकं विकसति। अतः मनोरञ्जनादिके अपि शिक्षक-अभिभावकैः योजना करणीया भवति, येन विद्यार्थिनः सम्पूर्णविकासः भवितुम् अर्हेत्। कालान्तरे अयोग्यमञ्चानाम् (Youtube, FB, Twitter, Netflix) अपि सकारात्मकम् उपयोगं कर्तुं विद्यार्थी स्वतः अवगच्छति। यदि वास्तविकतया विद्यार्थी मनोरञ्जनं कर्तुं जनाति, तर्हि कस्याऽपि अपमाननं, कलहं, मतभेदम्, अन्तरङ्गगतिविधिं च दृष्ट्वा विद्यार्थिनः मनोरञ्जनं न भवति। वास्तविकं मनोरञ्जनं प्राप्य तस्य मनसि निराशा, चिन्ता, प्रमादः, विकारः च न उद्भवति। यतः विद्यार्थिना अध्ययनं सम्यक् कृतं, तस्य मनोरञ्जनस्य साधनम् अपि सकारात्मकम् अस्ति, यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यानानाम् अभ्यासः अस्ति, अतः निराशा, प्रमादः, उदासीनता, चिन्ता इत्यादयः मनोविकाराः न समुद्भवन्ति। शुद्धभोजनेन शारीरिकरोगाः दूरे तिष्ठन्ति, योगाभ्यासेन च यथाकालं बाह्यः, आन्तरिकः च शौचः भवति।[1] बहुधा भोजनस्य दुष्प्रभावत्वात् विद्यार्थी कक्षायां योग्यतया ध्यानं दातुं न शक्नोति, ततः ज्ञातव्यविषयस्य पुनः अवगमनावसरस्य अभावात् सः मानसिकभारम् अनुभवति, ततः तस्य जीवने मनोविकाराणां प्रवेशः भवति। मनोविकाराणां, शरीरे प्रविष्टस्य दुष्प्रभावस्य च निवारणाय तस्य जीवनशैली योगानुकूला न भवति चेत्, सः आजीवनं स्वस्य भारम् एव वहन् अन्ते सुखस्य इच्छायां शरीरं त्यजति। परन्तु लघुविषयाद् आरभ्य स्पर्धा-परीक्षा-मित्रता-मनोरञ्जन-ब्रह्मचर्यादीनां विषये तस्य यौगिक-दृष्टिकोणः भवति चेत्, अध्ययनेन, परिवारेण, समाजेन च सह तस्य तादात्म्यम् अतीव योग्यं भवति। भारं विना विद्यार्थी अध्ययने अविरतश्रमं कर्तुं प्रभवति, यतः तस्य मनोरञ्जनादिकं सर्वम् अपि तस्य मनोभारं वास्तव्येन दूरीकरोति, केवलं समयं न यापयति। यस्मिन् दिने मनोरञ्जने समये यापिते सति भवतः मनसि स्वदुःखानां स्मरणं न भवति, कार्यभारस्य स्मरणं न भवति, आत्मविश्लेषणस्य इच्छा भवति, तस्मिन् दिने भवता कृतं मनोरञ्जनं सफलं चिन्तयतु। दूरदर्शने, समाचारे च उत्सवानां, रियालिटि-कार्यक्रमाणां च दर्शने वास्तविकं सुखं नास्ति, उत्सवानां, क्रीडा-नृत्य-सङ्गीत-कलादीनां च माध्यमेन भवतः विचाराणां प्रदर्शने एव वास्तविकं सुखं भवति (तेषु किमपि स्वयं करोति इति अर्थः)। एतत् सर्वं योग एव कथयति। यतः योगः सर्वदा अनुभवात् उत्पन्ने ज्ञाने, सुखे च विश्वासं कर्तुं कथयति।

उक्तेषु सर्वेषु विषयेषु चिन्तनं कृत्वा यदि कश्चन नैदानिकः (clinical) अभ्यासः क्रियते, तर्हि बहिरङ्गयोगस्य अपेक्षया अन्तरङ्गयोगस्य परिणामाः अधिकं प्रभावं जनयितुं शक्नुवन्ति इति ज्ञायते। परन्तु आधुनिकक्षेत्रे यमादीनाम् अभ्यासे सति प्राप्तपरिणामानां परीक्षणस्य कानि अपि साधनानि न सन्ति। यतः वास्तव्येन सः अन्तरङ्गविषयः वर्तते। तथाऽपि बहिरङ्गयोगस्य परिणामाः अन्तरङ्गयोगं विना अपूर्णाः स्वीकर्तव्याः भवन्ति। एतस्याः चर्चायाः पृष्ठे समाधेः उपस्थापनस्य उद्देश्यम् अस्ति। यतो हि समाधिः तु केवलं योगस्य विषयः इति अस्माकं धारणा अस्ति। परन्तु

---

https://www.sciencedaily.com/releases/2014/02/140212112745.htm,

[1] धौतिर्बस्तिस्तथा नेतिस्त्राटकं नौलिकं तथा।कपालभातिश्चैतानि षट्कर्माणि प्रचक्षते॥ स्वात्मारामविरचिता हठप्रदीपिका, द्वितीयः उपदेशः, v. २२

शास्त्रीयाः विषयाः व्यवाहारिके जीवने अपि स्पष्टतया घटिताः भवन्ति। यथा – कर्मण्येवाधिकारस्ते इत्यस्य श्लोकस्य आधारेण एव लौकिके जगति "**कर्म कीए जा फल की इच्छा मत कर**" इति आध्यात्मिक-सिद्धान्तः प्रचलति। परन्तु अत्र कर्मणः या चर्चा अस्ति, सा एतस्मात् सन्देशात् अपि गहना, गूढा च अस्ति। तथाऽपि गीतायाः श्लोकः लौकिके जीवने सर्वत्र कार्यं करोति। तथैव समाधेः लौकिकजगतः अनुकूलः अर्थः स्वीकर्तव्यः भवति। यथा भोजव्याख्यायां प्राप्यते - "**सम्यगाधीयत एकाग्री क्रियते विक्षेपान्परिहृत्य मनो यत्र स समाधिः**" अर्थात्, यत्र मनविक्षेपान् अपाकृत्य मनः एकाग्रं क्रियते, स एव समाधिः इति।

महाभक्तस्य श्रीगौराबकुम्भकारस्य कथा तु सर्वे जानन्ति,[1] यत्र सः ईश्वरभजनगायने एतावान् तल्लीनः भवति यत्, स्वबालकं मारयति। योगिनः गुहायां कुत्रचित् समाधेः अनुभवं कुर्वन्ति इति जनपरिकल्पनायां गौराबकुम्भकारः कदाचित् समाधिं न अनुभूतवान्। परन्तु लौकिकतया पश्यामः चेत् सः ईश्वरस्मरणे मनसः सर्वान् अपि विक्षेपान् दूरीकृत्य तल्लीनः जातः। सः स्वस्य ज्ञानेन्द्रियेभ्यः, कर्मेन्द्रियेभ्यः च विच्छन्नः जातः। एवमेव स्वकार्ये विद्यार्थी तावान् तल्लीनः भवति चेत्, लौकिकतया तु तस्य समाधिः एव कथ्यते। यतः अध्ययनावसरे तस्य मनसि केऽपि विक्षेपाः न समुद्भवन्ति, येन सः मनः एकाग्रं कर्तुं शक्नोति। एवं योगानुकूलजीवनशैल्या कदाचित् सः समाधिः निश्चयेन स्वतः अनुभूयते। अतः सम्पूर्णस्य अष्टाङ्गयोगस्य स्वजीवने क्रियान्वयनं विद्यार्थिनः अध्ययनम् उत्कर्षयति। अत्र ज्ञातव्यं यत्, सर्वाणि आसनानि १६ वर्षेभ्यः अल्पवयस्कस्य विद्यार्थिनः कृते उपयोगीनि न भवन्ति, अतः योगाचार्यस्य परामर्शानुसारम् एव तेषाम् आसनानाम् अभ्यासः भवेत्। बालिकाभ्यः विशेषतया अवधानं दातव्यम्। परन्तु यमनियमानदीनां तु बौद्धिकस्तरे बाल्यकालात् क्रियान्वयनं बालकस्य सम्पूर्णविकासे साहाय्यं करोति। अंहिसा-सत्यम्-अस्तेयं तु सर्वदा पाठनस्य अङ्गं भवेत्। योगः विषयः नास्ति, योगः जीवनशैली अस्ति। इति शम्।

सहायकग्रन्थसूची

1. जावजी पाण्डुरङ्ग। (१९३७) श्रीमद्वाल्मिकिमहर्षिप्रणीतः वाल्मिकीयोगवाशिष्ठः.
2. (२०१३) पातञ्जलयोगसूत्रम्, गीताप्रेस.
3. स्वामी दिगम्बरजी, झा, डॉ. पीतम्बर . (१९९८) हठयोगप्रदीपिका, कैवल्यधाम.
4. स्वामी महेशानन्दादयः. (२ ० ० ४) हठप्रदीपिका ज्योत्स्ना, , कैवल्यधाम.
5. Sailer HR, Schlacter J, Edwards MR Personnel. (Jul-Aug, 1982) Stress: causes, consequences and coping strategies
6. Cohen Taya R., Panter A. T. and Turan Nazli. (October 2012) Guilt Proneness and Moral Character, Current Directions in Psychological Science, Vol. 21, Iss. – 5.
7. Marina M. Pool etc. (2003) Impact of background radio and television on high school students' homework performance, International communication association.
8. Websites - https://prajapatimanthan.com/, sa.wikipiedia.org, sa.wiktionary.org, archive.org

Author's Detail

Address: Lakulish Yoga University, Gandhinagar, Ahamadabad, Gujarat 380060

Email: nehaldca08@gmail.com

****

[1] Sant Gora Kumbhar - prajapatimanthan.com/sant-gora-kumbhar/

रघुवंशमहाकाव्ये नीतिविद्या नैतिकमूल्यानि च

हरेकृष्णदासः

शोधसारः

नीयन्ते संलभ्यन्ते उपायादय ऐहिकामुष्मिकार्था वास्यामनया नीतिः इति कथ्यते। नीतेः अर्थः नियमः। नयस्य विनयो मूलं विनयः शास्त्रनिश्चयः। इन्द्रियजयस्तद्युक्तशास्त्रमिच्छति। इन्द्रियादि संयमपूर्वकमुचितानुचितयोः भेदज्ञानं एवं सन्मार्गस्य अन्वेषणेन सह विनयमार्गे गमनं नीतिः इति उच्यते। नीतेः ज्ञानसम्पादनार्थं सहायकशास्त्रं नीतिशास्त्रमिति कथ्यते। नियमस्य परिपालनेन मानवलक्ष्यपरिपूर्तये सरलतां याति इति नास्ति संशयः। संस्कृतसाहित्यस्य परमविद्वान् दीपशिखामहाकविकालिदासः स्वस्य रघुवंशमहाकाव्ये समाजोचितानां नियमानां चर्चां कृतवान् काव्यचातुरीच्छलेन। काव्यपठनेन न तु केवलं काव्यरसिकसहृदयानां चित्तविनोदनं भवति अपितु सामाजिकनीतिनियमानां परिपालनाय यथोचितं मार्गदर्शनञ्च प्राप्नुवन्ति।

कूटशब्दाः - नीतिः, नियमः, शिक्षा, मानवः, संवेगः, मूल्यम्, ज्ञानम्, विकासः, गुरुः, आश्रमः, विद्या, शिष्यः, छात्रः, काव्यम्, समाजः, मनः, चित्तः, बुद्धिः, लक्ष्यम्, आदर्शः, अध्यापकः, सज्जनः, व्यवहारः, चरित्रम्, शिक्षकः, विद्यालयः, गुणः, जीवनम्, संस्कृतिः, पाठ्यक्रमः।

****

सुखदुःख-जयाजय-हर्षद्वेष-मानाभिमान-हिंसाहिंसादि भावनासु जडिताः मानवाः सर्वदा जर्जरिताः निष्पेषिताः भवन्तीति कथनं नोचितम्। सम्यक् चलतीति संसारः। संसारे मानवाः निवसन्ति। मानवः सुखस्यान्वेषणवेलायां दुःखं प्राप्नोतीति मतमपि न युक्तिसङ्गतम्। कारणं तु तत्रास्ति न सर्वेऽपि जनाः आवश्यकतापेक्षया अधिकं वाञ्छन्ति। लोभ-मोह-माया-काम-असूया-क्रोध-स्नेह-श्रद्धा-आत्मीयतादिभावनायाः यदा आधिक्यता वा न्यूनता परिदृश्यते तदा अस्माभिः मनुष्यस्य मानवतायाः उपरि प्रश्नं क्रियते। मानवः सर्वेषु जीवेषु श्रेष्ठः स्वस्य ज्ञानं एवं बुद्धिवलेन। अतः कदा कस्मै कथं व्यवहारः प्रदर्शनीयः इति तस्य ज्ञानपरिधेः परिसरभुक्तः भवति। अतः सामाजिकोत्तरदायित्वम् एवं स्वकर्तव्यस्योपरि यदा मानवः दृढविश्वासं संस्थापयति तदा दुःसाध्यकार्यमपि सरलेन सहजतया च कर्तुं न कस्यापि सहायम् इच्छति। सप्रासङ्गिकमुक्तं यथा श्रीमद्भगवद्गीतायाम्-

तस्माद्यस्य महाबाहो, निगृहीतानि सर्वशः।
इन्द्रयाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥[1]
नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते, न प्रसिद्ध्येदकर्मणः॥[2]

विधिः - महाकविकालिदासः रघुवंशमहाकाव्ये सामाजिकनीतिनियमानाम् उदाहरणं समुपस्थाप्य मानवान् सदैव सन्मार्गं प्रदर्शयितुं नितरां प्रयासं कृतवान्। शिक्षायाः आभिमुख्यं न तु केवलं व्यावहारिकगुणानां विकासः अपितु

[1] श्रीमद्भगवद्गीता २:६८

[2] Ibid. ३:८

सामाजिकोत्तरदायित्वानां निर्वहणम् येन असामाजिकव्यक्तिः सामाजिककौशलं सम्प्राप्य मुख्यस्रोतेषु स्वस्योपस्थितिं सुदृढां कर्तुं शक्नोति। मानवः शिक्षां न तु केवलं विद्यालयेषु प्राप्नोति अपितु समाजस्य विविधकार्येषु संलग्नः सन् स्वयमेव परिस्थित्यनुगुणं शिक्षां प्राप्नोति। शिक्षायाः नामान्तरमस्ति विद्या। विद्यायाः संग्रहणेन मानवः स्वकर्तव्यविषये समुचितं ज्ञानं प्राप्नोति। स्थान-काल-पात्रानुसारेण जीवनरथस्य सञ्चालनाय कौशलं सम्प्राप्तुमवसरं प्रकल्पयति।

परिणामः - रघुवंशमहाकाव्ये नैतिकमूल्यानि - मानवानां समूहः समाजः पशूनां समूहः समजः इति कथ्यते। व्यक्तेः परस्परं सहयोगः एवं सम्बन्धः मानवस्य प्रगतेः चिह्नं वर्तते। मानवस्य बुद्धिः विवेक एव सर्वेषु प्राणिषु भिन्नत्वं द्योतयति। भिन्नत्वे एकता मानवस्य मानवतायाः परिचयः। सामाजिकजीवने यत्र परस्पर सहयोगः, धैर्यं, निर्भयता, मित्रता, सत्सङ्गतिः, सत्यनिष्ठता, अहिंसा, सदाचारः, नम्रता, लोभपरित्यागः, कुसङ्गतित्यागः, शिष्टाचारः, वीरता, सन्तोषः, क्षमा, निरभिमानः, गुणवत्ता, स्वामिभक्तिः, मातृपितृगुरुसमादरः, दक्षता, विवेकः, कर्त्तव्याकर्त्तव्यविचारः, शीलतादयः गुणाः विद्यन्ते तत्र सामाजिकमूल्यस्याभिवृद्धिः भवति। मानवः खलु सामाजिकः प्राणी वर्त्तते। अनेन विना तस्य मानवस्य स्थितेः कल्पनापि दुःसाध्या अस्ति। मानवस्य जीवने समाजस्य स्थितिः विशिष्टा एव भवति। देशस्य सर्वेषामपि जनानां सुखं सौविध्यञ्च प्रति ध्यानं प्रदीयते। समाजस्य हितसम्पादनम्, समाजस्य अधिकारसंरक्षणम्, तदवाप्तये च यथायथं कार्यकरणम्। न तत्र कोऽपि मनुष्यः कस्यापि मनुष्यस्य शोषणं कर्तुमर्हति।

नीति नाम नियमः। यः नियमेन सन् मानवकल्याणाय कार्यं करोति सैव नैतिकमूल्यस्य प्रचारकः इति ज्ञायते। नैतिकमूल्यानां विषये विभिन्नेषु संस्कृतकाव्येषु सुभाषितेषु च सङ्केतः समुपलभ्यते। येन च मानवाः सद्गुणानां ज्ञानं सम्प्राप्य स्वव्यावहिरिकजीवने विकासं सम्पादयति, अन्यान् च तत् कर्तुं प्रेरयन्ति। रघुवंशमहाकाव्ये एतस्य उदाहरणं सप्रङ्गं सप्रमाणञ्च द्रष्टुं शक्यते। **वागार्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥[1]

महाकविकालिदासेन शब्दार्थस्वरूपेण पित्रोः यथोचितं सम्मानं प्रदर्शितं यस्य च उदाहरणम् उपर्युक्तश्लोके स्पष्टं ज्ञायते। अनेन मानवाः प्रेरितः सन् स्वपितरौ भक्तिं प्रदर्शयन्ति। भक्तिभावना मानवस्य अन्तःकरणशुद्धिं करोति येन सः कस्यापि हानिं न सम्पादयतीति दृढनिश्चयः।

क्व सूर्यप्रभवो वंशः कः चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥[2]

अहङ्कारेण मानवः अन्धः भूत्वा कुकर्म कर्तुं वा अन्यस्य अनिष्टं कर्तुं सर्वदा प्रयतते। यदि एतस्य नाशः भवति तर्हि स्वस्य कल्याणेन सह मानवसमाजस्य कल्याणं निश्चयेन सम्भवतीति नास्ति द्विमतम्। दीपशिखाकालिदासेन रघुवंशस्य चरितवर्णनसमये स्वस्य गौरवापेक्षया काव्ये वर्णिते चरित्रविषये तस्य दृष्टिरेव एतस्य प्रमाणम्।

---

[1] रघुवंशम् १:१

[2] Ibid. १:२

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।

यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥[1]

समुचितकार्यं दृष्ट्वा वा श्रुत्वा व्यक्तिः अन्यस्य प्रशंसां करोति। परं कः प्रशंसायाः पात्रम् इति तस्य निर्णयः न तु सरलम्। यथा कोऽपि कस्मै अपि दानं दातुमिच्छति चेत् सर्वदा सत्पात्रे दानं दातव्यमिति नियमः वर्तते। तथैव राजा सर्वदा स्वप्रजानां हिताय चिन्तयेत् न तु अन्येषां राज्यानां आत्मसात्करणाय। उक्तञ्च एवं कालिदासेन रघुवंशमहाकाव्ये। मानवजीवने एतस्य नीतिवाक्यस्य महती आवश्यकता अस्तीति नास्ति द्विमतम्।

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥[2]

कदा का अवस्था? अवस्थायां च कानि कार्याणि कर्तव्यानि कानि च अकर्तव्यानि तानि सर्वाणि परिज्ञाय समाजोचितं व्यवहारं प्रदर्शयति सुसंस्कारितः मानवः। अत्र अवस्था नाम बाल्यावस्थायां गुरुकुले विद्याभ्यासः, यौवने राजोचितविषयाणां ज्ञानम् एवञ्च वार्धक्ये वानप्रस्थजीवनस्य धारणं मानवस्य श्रृङ्खलिताचरणस्योदाहरणं द्योतयति। यच्च कविकुलगुरुकालिदासेन उपरोक्तश्लोके प्रतिपादितम्।

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा॥[3]

गुणिजनः केवलं सदसदयोः उचितानुचितयोः भेदं ज्ञातुं जानाति किमर्थमिति चेत् सः तस्य मूल्यमवगच्छति। यथा सुवर्णस्य शुद्धता यदा अग्नौ दग्धीभूतं क्रियते तदा एव ज्ञायते। अतः संस्कारिता व्यक्तिः सर्वदा नीतिनियमस्य परिधौ एव भवति न तस्य बहिर्भवतीति।

विवेचना - मानसिकस्वास्थ्येन सह शारीरिकस्वास्थ्यस्य महनीयता क्षणे क्षणे भवत्येव। शरीरावयवस्य क्रिया बाह्यक्रिया, मनोजनितक्रिया अन्तःक्रिया इति कथ्यते। द्वयोः मेलनं शिक्षार्थीनां तथा काव्यरसिकानां हृदये सञ्जीवनम् इव सञ्चरति। अतः सर्वत्र सर्वथा प्रयास कर्तव्यः कस्यापि नूतनविषयस्य सम्प्राप्त्यर्थम्। अथः विद्वद्भिः उच्यते-

विद्या समुन्नतिपथे विशदीकरोति, बुद्धिं विचारविषये प्रखरं करोति।

विद्या सदासुखकारी धियमादधाति विद्यापरसम्बन्धुरथेह लोके॥

अत्र च ध्यातव्य विषयः अस्ति यत् के के शिक्षायाम् उद्येश्यभूता विषयाः इति यश्च मानवजीवने जीवनाधारितमूल्येन सह संश्लिष्टाः भवन्ति॥

---

[1] Ibid १:७

[2] Ibid १:८

[3] Ibid १:१०

सहायकग्रन्थसूची

1. शास्त्री सनाढ्. देवर्षि, (प्र. वि. सं २०१३) नैषधीयचरितम्, चौखम्बा कृष्णदास अकादमी, वारणासी
2. आप्टे वामन शिवराम, २०२१, संस्कृतहिन्दीशब्दकोश, मोतिलाल वनारसीदास पब्लिशर्स, दिल्ली
3. साहु सोमनाथ, २०१७, शिक्षायाः दारशनिकधारा, जगदीशसंस्कृत पुस्तकालय, जयपुर
4. झा उदयशङ्कर, २०१३, संस्कृतशिक्षणम्, चौखम्बा सुरभारती प्रकाशन, वारणासी
5. मिश्र डॉ जगदीशचन्द्र, २०१८, वैदिकवाङ्मयस्येतिहासः, चौखम्बा सुरभारती प्रकाशन, वारणासी
6. मिश्र लोकमान्य, २००४, पुरातनी शिक्षा, मृगाक्षी प्रकाशन, लखनऊ
7. मिश्र करुणाशङ्कर, २०११, पाण्डे रामशकल, मूल्यशिक्षा, श्री विनोद पुस्तकमन्दिर, आग्रा - २
8. मित्तल डॉ सन्तोष, २००६, संस्कृतशिक्षणम्, नवचेतना पब्लिकेशन, जयपुरम्
9. पाण्डे रामशकल, भारतीय शिक्षा दर्शन, श्री विनोद पुस्तकमन्दिर, आग्रा - २
10. शर्मा प्रो. च.ल.न, सिंह फतेह, १९९६, संस्कृतशिक्षणम् नवीन प्रविधयश्च, आदित्य प्रकाशनम्, जयपुरम्
11. पद्ममित्रश्रीनिवासः डा. बुलुसु, २०१२, शिक्षायाः मनोवैज्ञानिकाधाराः, जगदीश संस्कृत पुस्तकालय, जयपुरम्

Author's Detail

Address: Research Scholar,
SCSVMV Kanchipuram,
Tamilnadu, 631561

Email: mrdasharekrushna@rediffmail.com

****

शौनकशिक्षायां संस्कृतवर्णविचारः

बलभद्रः कर्णः

शोधसारः

वेदभाष्यकारः सायणाचार्यः शिक्षाशास्त्रस्य व्याख्यां कृत्वा कथयति - स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा।[1] अर्थात्, यत्र अकारककारादिवर्णानां, उदात्तादिस्वराणां, ह्रस्वदीर्घादिमात्राणां, स्थानप्रयत्नादिवलानां, माधुर्यादिगुणानां, गीत्यादिदोषाणां, वर्णागमलोपादिसन्तानानाञ्च वर्णना विद्यते, शिक्षा इति कथ्यते। मुख्यतः शिक्षाशास्त्रे वेदमन्त्राणां स्वरवर्णादीना-मुच्चारणविधिः शिक्ष्यते। प्रतिसंहितं शिक्षाग्रन्थोऽपेक्ष्यते। किन्तु सम्प्रति त्रिंशत्संख्याकाः शिक्षाग्रन्थाः लभ्यन्ते। तेषु शिक्षाग्रन्थेषु पाणिनीयशिक्षा, याज्ञवल्क्यशिक्षा, वाशिष्ठीशिक्षा, कात्यायनीशिक्षा, पाराशरीशिक्षा, माण्डव्यशिक्षा, माध्यन्दिनीशिक्षा, वर्णरत्नप्रदीपिकाशिक्षा, केशवीशिक्षा, नारदीयशिक्षा, माण्डुकीशिक्षा, मल्लशर्मशिक्षा, स्वराङ्कुशिक्षा, षोडशश्लोकीशिक्षा, अवसाननिर्णयशिक्षा, स्वरभक्तिलक्षणशिक्षा, पारतिशाख्यप्रदीपशिक्षा, क्रमसन्धानशिक्षा, गलदृग्शिक्षा, मनःस्वारशिक्षा प्रभुतयः प्रमुखाः भवन्ति। एतेषु सर्वेषु शिक्षाग्रन्थेषु शौनकशिक्षा एकं विशिष्टस्थानमधिकरोति।

शौनकशिक्षायाः रचयिता भवति शौनकः। शौनकशिक्षायां सप्तषष्टिः (६७) कारिकाः सन्ति। संस्कृतवर्णाः कतिसंख्यकाः इत्यस्मिन् विषये आचार्यशौनकेन शौनकशिक्षायां स्पष्टभावेन नोल्लिखितम्। अतः सम्पूर्णतया शौनकशिक्षाग्रन्थाध्ययनादनन्तरं संस्कृतवर्णाः षड्-विंशत्यधिकद्विशत-संख्याकाः (२२६) सन्तीति ज्ञायते। तथा हि- स्वरवर्णाः चतुरशीत्यधिकमैकशतसंख्याकाः (१८४) + स्पर्शवर्णाः पञ्चविंशतिः (२५) + यमवर्णाः चत्वारः (४) + अन्तःस्थवर्णाः चत्वारः (४) + उष्मवर्णाः चत्वारः (४) + जिह्वामूलीय कः एकः (१) + उपध्मानीयः पः एकः (१) + दुःस्पृष्टः ळकारः एकः (१) + अनुस्वारः एकः (१) + विसर्गः एकः (१) च सम्मिल्य समष्टिरूपेण शौनकशिक्षानुसारं संस्कृतवर्णाः षड्-विंशत्यधिकद्विशतसंख्याकाः (२२६) भवन्ति।

कूटशब्दाः - शौनकशिक्षा, स्वरवर्णः, स्पर्शवर्णः, अन्तःस्थवर्णः, ऊष्मवर्णः, अनुस्वारः, विसर्गः। शोधपत्रेऽस्मिन् शौनकशिक्षादृष्ट्या संस्कृतवर्णानां पूर्णपरिचयः प्रदीयते।

****

उपक्रमः - वेदः यदि एकः पुरुषः भवेत् तर्हि तस्य वेदपुरुषस्य पादद्वयं भवति छन्दशास्त्रम्, हस्तद्वयं भवति कल्पशास्त्रम् नेत्रद्वयं भवति ज्यतिषशास्त्रम्, कर्णद्वयं भवति निरुक्तशास्त्रम्, नासिका भवतिशिक्षाशास्त्रम्, मुखश्च भवति व्याकरणशास्त्रम्। यः षडङ्गसहितस्य वेदस्याध्ययनं करिष्यति, सः ब्रह्लोकं प्राप्नोति। तथा हि-

> **छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
> **ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥**
> **शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
> **तस्मात्साङ्गमधित्यैव ब्रह्मलोके महीयते॥** [2]

यथा वयं नासिकया निःश्वास-प्रश्वासप्रक्रियामाध्यमेन अम्लजानं गृहीत्वा जीवनधारणं कुर्मः, तथैव शिक्षाग्रन्थमाध्यमेन वेदः जीवनधारणं करोति। यतो हि शिक्षाग्रन्थाः वेदमन्त्रस्य सम्यगुच्चारणं कारयित्वा वेदे जीवनं

---

[1] द्र. ऋग्वेदभाष्यभूमिका, पाण्डेयः, रामअवधः, मोतिलाल p. 98.

[2] द्र. पाणिनीयशिक्षा, कौण्डिन्नायनः शिवराजः आचार्यः, vv. 41-42, p. 143.

सञ्चारयन्ति। शौनकशिक्षाग्रन्थः ऋग्वेदीयशिक्षाग्रन्थोऽस्ति। शौनकशिक्षाग्रन्थस्याध्ययनेन ग्रन्थोऽयं ऋग्वेदीयमन्त्राणां सम्यगुच्चारणविधिं शिक्षयित्वा मन्त्रार्थबोधने सहायकः भवति।

शौनकीयशिक्षायां वर्णविभाजनम् - शौनकशिक्षानुसारं वर्णः द्विविधः। १) स्वरवर्णः- अकारादयः स्वरवर्णाः भवन्ति। २) व्यञ्जनवर्णः- कादयः व्यञ्जनवर्णाः भवन्ति। तथा हि-

द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च।

अकारादि स्वरो ज्ञेयः कादि व्यञ्जनमुच्यते॥[1]

शौनकशिक्षायां स्वरवर्णानां विवेचनम् - अ ऋ इ उ ऌ इति पञ्च स्वरवर्णाः ह्रस्व-दीर्घ-प्लुतभेदेन पञ्चदशविधः भवति, ए ओ ऐ औ चत्वारः सन्ध्यक्षरस्वरवर्णाः दीर्घ-प्लुतभेदेन अष्टविधः। एते वर्णाः सम्मिल्य त्रयोस्त्रिशत्संख्यकाः भवन्ति। ततःएते त्रयोस्त्रिशत्संख्यकाःस्वरवर्णाः नासिक्य-सानुनासिकभेदेन षट्-चत्वारिंशत्संख्याकाः भवन्ति। तदनन्तरं एते षट्-चत्वारिंश-त्संख्याकाः स्वरवर्णाः उदात्त-अनुदात्त-स्वरित-प्रचयभेदेन चतुरशीत्यधिकमैकशत-संख्याकाः (१८४) भवन्ति। तथा हि -

ह्रस्वो दीर्घः प्लुत इति स्वराः कालेन संज्ञिताः।

सन्ध्यक्षराणां कालश्च दीर्घप्लुतौ न मात्रिकः॥[2]

द्विविधश्च स्वरो ज्ञेयो नासिक्यस्सानुनासिकः।

उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा॥[3]

शौनकशिक्षायां व्यञ्जनवर्णानां विवेचनम् - क" कारात् आरभ्य "म" कारं यावत् पञ्चविंशतिः कादयवर्णाः स्पर्शसंज्ञकाः भवन्ति। ते स्पर्शवर्णाः पञ्चवर्गैः विभक्ताः। तथा हि-कवर्गः- क ख ग घ ङ, चवर्गः-च छ ज झ ञ, टवर्गः- ट ठ ड ढ ण, तवर्गः-त थ द ध न, पवर्गः-प फ ब भ म। तथा हि-

कादीनां पञ्चवर्गाश्च स्पर्शा इति हि संज्ञिताः।

दुस्पृष्टश्चेति विज्ञेयो डढयोस्स्वरमध्ययोः॥[4]

"द्वयोः स्वरवर्णयोः मध्ये स्थितः डवर्णः ढवर्णः दुःस्पृष्टसंज्ञकः भवति।

वर्गाणां प्रथमा वर्णा द्वितीया ऊष्मसंज्ञिताः।

हकारवर्ज्याश्चाघोषाः शिष्टं घोषवदुच्यते॥[5]

अर्थात्, पञ्चवर्गाणां प्रथमद्वितीयवर्णाः क च ट त प ख छ ठ थ फ वर्णाः तथा श स ष वर्णाः अघोषसंज्ञकाः भवन्ति, अवशिष्टवर्णाः ग ज ड द ब घ झ ढ ध भ ङ ञ ण न म ह घोषवर्णाः सन्ति।

---

[1] शौनकशिक्षा, का.-२

[2] तत्रैव, का.-१०

[3] तत्रैव, का.-०४

[4] तत्रैव, का.-०५

[5] तत्रैव, का.-०६

नासिक्याः पञ्चमा वर्णा अनुस्वारस्तथैव च।

चत्वारश्च यमाः प्रोक्ता अव्यक्तास्सानुनासिकाः॥[1]

अर्थात्, प्रत्येकवर्गस्य पञ्चमवर्णाः ङ ञ ण न म अनुस्वारश्च नासिक्यवर्णाः भवन्ति। यमवर्णाः अव्यक्ताः सानुनासिकाश्च भवन्ति। **चतस्रो याद्योऽन्तःस्था नासिक्या अप्यरेफिका।**

ऊष्माणश्शाद्यश्चैव चत्वारश्चेति कीर्तिताः॥[2]

अर्थात्, य र ल व वर्णाः अन्तःस्थाः भवन्ति। य ल व वर्णाः नासिक्यवर्णाः अपि भवन्ति। श ष स ह ऊष्मवर्णाः भवन्ति। **जिह्वामूलीय इत्युक्तः उपध्मानीय एव च।**

कपाश्रितौ चोष्मजातौ विसर्गस्य च सम्भवौ॥[3]

अर्थात्, विसर्गस्य स्थाने सकार-षकारोत्पन्नौ जिह्वामूलीय कः उपध्मानीयः पश्च विहितौ भवतः। एवंरूपेण स्वरवर्णाः चतुरशीत्यधिकमैकशतसंख्याकाः (१८४)+ स्पर्शवर्णाः पञ्चविंशतिः (२५) + यमवर्णाः चत्वारः (४) + अन्तःस्थवर्णाः चत्वारः (४) + उष्मवर्णाः चत्वारः (४) + जिह्वामूलीय कः एकः (१) + उपध्मानीयः पः एकः (१) + दुःस्पृष्टः ळकारः एकः (१) + अनुस्वारः एकः (१) + विसर्गः एकः (१) च सम्मिल्य समष्टिरूपेण शौनकशिक्षानुसारं संस्कृतवर्णाः षड्-विंशत्यधिकद्विशतसंख्याकाः (२२६) भवन्ति।

उपसंहारः - अनुष्टुप्छन्दसा रचिता इयं शौनकशिक्षा अतीव सरला सुबोध्या चास्ति। शौनकशिक्षायाम् स्पष्टरूपेण संस्कृतवर्णानां संख्या नोल्लिखिता। समग्रशौनककारिकाणामध्ययनादनन्तरं ऋक्प्रातिशाख्यस्य साहाय्येन च शौनकशिक्षोक्तसंस्कृतवर्णानां संख्यानिर्द्धारिता अस्ति। तदनुसारं शौनकशिक्षायां संस्कृतवर्णाः विंशत्यधिकद्विशत-संख्याकाः (२२६) भवन्तीति उपदिश्यते।

सहायकग्रन्थसूची

1. उदयाचार्यः. (Ed.). (2016). शिक्षाशास्त्रम्, रामलाल कपुरट्रष्ट रेवली, सोनीपत-(हरियाणा).
2. मीमांसकः युधिष्ठिरः. (Ed.). (2014). शिक्षासूत्राणि, रामलाल कपूरट्रष्ट रेवली, सोनीपत् (हरियाणा).
3. रामअवधः पाण्डेयः. (Ed.). (2011).ऋग्वेद-भाष्य-भूमिका (हिन्दिभाषया अनुदितः). मोतिलाल-रशीदास, दिल्ली.
4. विरेन्द्र कुमारः वर्मा. (Ed.). (1986). ऋग्वेदप्रातिशाख्यम् (2nd). चौखम्वासंस्कृतप्रतिष्ठानम्, जवाहारनगरम्, बङ्ग्लो रोड, दिल्ली.
5. शिवराजः आचार्यः कौण्डिन्न्यायनः. (Ed.). (2012). पाणिनीयशिक्षा, चौखम्बाविद्याभवनम्.
6. हरिनारायणः तिवारी. (Ed.). (2020). शिक्षासंग्रहः, चौखम्वा संस्कृत-सीरीज-अफिस, चौखम्वा प्रेस, वाराणसी.

Author's Detail

Address: Ph. D. Scholar
School of Sanskrit, Gangadhar Meher University
Amrut Vihar, Sambalpur, Odisha 768004

Email: balabhadrakarna@gmail.com

[1] तत्रैव, का.-०७

[2] तत्रैव का.-०८

[3] तत्रैव का.-०९

कारणस्वरूपविमर्शः

डा. निताइपाल्

शोधसारः

कारणस्य स्वरूपं कारणस्वरूपमिति। तत्पुरुषसमासेन कारणस्वरूपमिति निष्पन्नम्। कारणस्वरूपस्य विमर्श इति तत्पुरुष-समासेनापि कारणस्वरूपविमर्शः इति निष्पन्नम्। वि-पूर्वकं मृश्-धातुना घञ्-प्रत्ययेन विमर्शः इति पदं भवति। वि-शब्देन विशिष्टं मृश्-धातुना ज्ञानं बोध्यते। तेन कारणस्वरूपस्य विशिष्टज्ञानं बोध्यते। तस्मात् विमर्श इति पदं विशिष्टज्ञानार्थकं भवति। ज्ञानं सदैव सविषयकं भवति। कारणस्य स्वरूपमत्र विषयः। अतः कारणस्वरूपविमर्शशब्दस्यार्थ कारणस्वरूपविषयकं विशिष्टज्ञानम्। अनया व्युत्पत्त्या ज्ञानमेव सूच्यते, न तु ग्रन्थः। अत्रानेन पदेन लक्षणया सजनकत्वसम्बन्धेन ग्रन्थस्यापि बोधो भवति। "विमर्शः" इति पदं घञ्-प्रत्ययेन करणवाच्ये अपि निष्पादयितुं शक्यते। तदा कारणस्वरूपविमर्शशब्देन कारणस्वरूपविषयकज्ञानसाधनमिति बोध्यते। अनया व्युत्पत्त्या तु कारणस्वरूपविमर्शपदेन अस्या पत्रिकायाः बोधो भवति। भारतीयदर्शनशास्त्रे कार्यकारणवादः अन्यतमः सिद्धान्तः। प्रत्येकं दार्शनिकः प्रायशः कार्यकारणवादं स्वीकरोति। प्रमाकरणं प्रमाणमिति लक्षणविचारात् असाधारणं कारणं करणमिति करणस्य लक्षणं गदितम्। करणलक्षणनिरूपणात्पूर्वं कारणस्य स्वरूपं विचारणीयम्। कारणस्वरूपविषये जयन्तभट्टस्य मतं दर्शनशास्त्रे भिन्नसिद्धान्तमुपस्थापितम्।

कूटशब्दाः – कारणस्वरूप, अधिकरण, कार्यकारणयोः सम्बन्धः।

****

कारणस्य लक्षणं गदितम् – "कार्यनियतपूर्ववृत्ति कारणम्" इति।[1] अन्यत्रापि दृश्यते अनन्यथासिद्धनियतपूर्व-वृत्तित्वं कारणत्वम्। अर्थात् यस्य उपस्थितिः कार्यात् पूर्वं नियतरूपेण वर्तते इति कारणस्य स्वरूपम्। अन्यथासिद्धि-शून्यत्वं कारणस्य अन्यतमं वैशिष्टम्। अतः प्रथमतया पूर्ववृत्ति इति शब्दव्यवहारस्य तात्पर्यमुपस्थापनीयम्। पूर्ववृत्ति-शब्दः सापेक्षः। पूर्ववृत्तिशब्दव्यवहारेण प्रश्नः जायते कस्मात्पूर्ववृत्तिः इति जाते प्रश्ने उच्यते कार्यात्पूर्वमिति। अनेन कार्योत्पत्तेः अव्यवहितपूर्वमिति बोधः जायते। कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणे कार्योत्पत्त्यव्यवहित-प्राक्क्षावच्छेदे वृत्तित्वं पूर्ववृत्तित्वम्। अत्र कार्यतावच्छेदकसम्बन्धेन कार्यस्याधिकरणं निरूपितम्। येन सम्बन्धेन कार्यस्योत्पत्तिः भवति, स एव कार्यातावच्छेदकसम्बन्धः। यथा तन्तुपदार्थे पटः समवायेन उत्पद्यते अतः अत्र कार्यता-वच्छेदकसम्बन्धः समवायः भवति। यस्मिन् क्षणे पटः भवति, तस्याव्यवहितपूर्वक्षणमेव पूर्वक्षणमिति व्यवहारः दृयते। अव्यवहितपूर्वक्षणं सामग्रीक्षणनाम्नापि अभिधीयते। सामग्री इति शब्दस्यार्थः भवति प्रतिबन्धकाभावसहितकारणसा-कल्यम्। आचार्यजयन्तभट्टेण न्यायमञ्जरी इति ग्रन्थे सविशदं पर्यालोचितम्। कार्यनियतपूर्ववृत्ति कारणमिति न्याय-वैशेषिकानां मतम्। मतमिदमारम्भवादनाम्नापि अभिधीयते। सत्कार्यवादः सांख्यदार्शनिकैः स्वीकृतः। कारणं विना कार्यं न सम्भवति। कारणं त्रिविधं यथा समवायिकारणम्, असमवायिकारणम्, निमित्तकारणञ्चेति। यत् समवेतं कार्यमुत्पाद्यते तत् समवायिकारणम्, यथा तन्तवः पटस्य। इत्यत्र कार्यकारणयोः समानाधिकरण्यं भवति। यस्मिन् अधिकरणे समवायेन कार्यस्योत्पत्तिः भवति तदेव समवायिकारणम्। तन्तवः पटकार्यस्य समवायिकारणम्। समानमेव प्रकारेण

[1] तर्कसंग्रहः, नारायणचन्द्रगोस्वामी, संस्कृत पुस्तक भाण्डार, कोलकाता। पृ. - २९४

असमवायिकारणस्य निमित्तकारणस्य च लक्षणं सोदाहरणं व्याख्यातं नैयातिकैः। नैयायिकः जयन्तभट्टः कारणस्य स्वरूपं पर्यालोचनायां सामग्रीकारणतावादः स्वीकरोति। कारणविषये मतमिदं भिन्नम्।

शब्दसङ्केतः - कार्यकारणसम्बन्धविषये दार्शनिकानां सिद्धान्तः, जयन्तभट्टदिशा कारणस्वरूपम्। नास्तिक-दर्शनेषु चार्वाकदर्शनस्य नये कार्यकारणयोः सव्यभिचारी सम्बन्धः अस्ति। तेषां नये कार्यकारणयोः अविच्छेद्यसम्बन्धः नास्ति। कार्यकारणनियमेन जगतः वैचित्रं न व्याख्यातम्। जगतः वैचित्रं यदि स्वीक्रियते तर्हि कार्यकारणयोः सव्याभिचारी सम्बन्धः स्वीकरणीयः। एकस्य कार्यस्य यथैव कारणवैभिन्नमस्ति, तथैव एकस्मात् कारणात् भिन्नकार्यं सम्भवति इति स्वीकरणीयम्। कार्यकारणवादिनां नये कारणस्य धर्मं कार्ये वर्तते। किन्तु चार्वाकनये कारणस्य धर्मं सदैव कार्ये न तिष्ठति। यथा पटकार्यं प्रति कारणरूपेण तन्तुः, माकुः, तन्तुवायः च दृश्यन्ते। अत्र तन्तवः देशव्याप्यगुणं यद्यपि पटे वर्तते तथापि तन्तुवायः तत्र नास्ति। अतः क्षेत्रविशेषे कारणभावात् अपि कार्यस्योत्पत्तिः जायते। तेषां नये कुत्रापि आकस्मिकरूपेण कुत्रापि वा वस्तुस्वभावतया कार्यस्योत्पत्तिः भवति। अतः चार्वाकेन स्वभाववादः स्वीकृतः। स्वभावात् जगतः उत्पत्तिः भवति। कार्यं प्रति कारणं सदैव न वर्तते। स्वभावनियमेन सर्वं परिचालितं यथा वह्नेः उष्णता, सलिलस्य शीतलता च। अन्यत्र बौद्धदार्शनिकानां नये असतः सत् जायते। अत्र असत् इति पदेन अभावः बोध्यते। अभावात् भावस्योत्पत्तिः भवति। सांख्यतत्त्वकौमुद्यां दृश्यते "**असतः सज्जायते**"[1] वेदान्तदार्शनिकानां नये ब्रह्म एव सद्रूपेण वर्तते। जगत् ब्रह्मणः विवर्तरूपेण दृश्यते इति विवर्तवादः।

न्यायनये चत्वारि प्रमाणानि स्वीकृतानि यथा प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्चेति। प्रमाणस्य स्वरूप-विषये चर्चायां दृश्यते - "**अव्यभिचारिणीमसन्दिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम्**"[2] इति। वस्तुनः या भ्रमभिन्ना संशयभिन्नानुभूतिः, तस्याः यद्यपि साधका तथापि ज्ञानेन ज्ञानभिन्नपदार्थेन संघटिता समष्टिः, सैव प्रमाणम्। अत्र बोधाबोधस्वभावः हि प्रमाणस्य स्वरूपम्। अनेन प्रतिपद्यते यथा ज्ञानं न प्रमाणस्य स्वरूपम्, तथैव ज्ञानभिन्नमपि न प्रमाणस्य स्वरूपमिति। वस्तुद्वयेन एव प्रमाणशब्दस्य सार्थकता समुपलभ्यते। अतः सामग्री एव प्रमाणम्। अन्यत्र अव्यभिचारादिविशेषणार्थोपलब्धिसाधनत्वं प्रमाणस्य लक्षणं सूचितम्। प्र-उपसर्गेण मा-धातोः करणवाच्ये ल्युट्-प्रत्ययेन प्रमाणशब्दः निष्पद्यते। तेन प्रमाणशब्देन बोध्यते येन प्रमाज्ञानं जायते तदेव प्रमाणम्। अतः प्रमाज्ञानस्य कारणमेव प्रमाणम् इति उपपद्यते। व्याकरणशास्त्रे साधकतमं करणमिति पाणिनीयसूत्रं समुपलभ्यते। अत्र तमप्-प्रत्ययस्य अतिशयार्थे व्यवहारः दृश्यते। अतिशय आपेक्षिकः। अर्थात् प्रमासम्पादने यस्य पदार्थस्य उत्कर्षता वर्तते तत्पदार्थः साधकतमनाम्ना अभिधीयते। किन्तु अत्र सामग्री प्रमाणमिति गद्यते। सामग्री एका अनेका वेति प्रश्नः समुदेति। तत्रापि अनेकत्वस्वीकारे सामग्री कस्माद् उत्कृष्टता इति प्रश्नः जायते। यतः सर्वे पदार्थाः सामग्र्याः अन्तर्भूक्ताः। अतः सामग्र्या उत्कर्षता न सम्भवति। अन्यत्र यदि सामग्री प्रमाणं भवति तर्हि प्रमेयशब्देन कस्य पदार्थस्य बोधः सम्भवति। पूर्वपक्षस्य जाते संशये प्रत्युत्तरं जयन्तभट्टेन सिद्धान्तितम् - **यत एव साधकतमं करणं करणसाधनश्च**

---

[1] सा. कौ., नारायणचन्द्रगोस्वामी, संस्कृत पुस्तक भाण्डार, कोलकाता। पृ. ८४

[2] अमितभट्टाचार्यसम्पादिते, जयन्तभट्टकृतन्यायमञ्जरी इति ग्रन्थे, पृ. ७१.

प्रमाणशब्दः, तत एव सामग्र्याः प्रमाणत्वं युक्तम्[1] तद्व्यतिरेकेण कारकान्तरे तमवर्थसंस्पर्शः न जायते। कारणमत्र बहूनां कारकाणां सन्निधानतः कार्यस्य उत्पत्तिः जायते। एतेषु कारकेषु अन्यतमस्य कारकस्याभावे कार्यस्य उत्पत्तिः न जायते। किन्तु एतेषु कारकेषु ननु कस्मिन् कारके अतिशयत्वमन्वितम् एतस्मिन् विषये स्थिते संशये अपि कार्यसम्पादने एकस्य कारकस्य उपयोगिता न बोध्यते। कारणं तत्र सर्वाणि कारणानि एकस्मिन् कार्ये नियुक्तानि। चेदुच्यते कर्मणा सह यस्य प्रत्यक्षतया सम्बन्धः वर्तते तस्य उत्कर्षः अत्र बोध्यते वक्तव्यमिदं न समर्थनीयम्। यतः कर्मणः सह यस्य प्रत्यक्षतया सम्बन्धः नास्ति, तेषां कारकाणामपि कारकत्वं स्वीक्रियते। ज्ञानरूपकार्येण सह सर्वे पदार्थाः प्रत्यक्षरूपेण अन्विताः। प्रत्यक्षज्ञाने इन्द्रियादयः मिथो सम्बन्धेन प्रत्यक्षज्ञानमुत्पादयन्ति। यदि सहसा कार्यसम्पादनमेव उत्कर्षपदवाच्यं तर्हि अतिशयोऽयं कार्यविशेषे यथा करणस्य भवति तथैव कर्मणः अपि भवति इत्येवमुच्यते। तथाहि जयन्तभट्टेन उच्यते - **सन्निपत्यजनकत्वमतिशय इति चेन्न, आरादुपकारकाणामपि कारकत्वानपायात्। ज्ञाने च जन्ये किमसन्निपत्य जनकम्? सर्वेषामिन्द्रियमनोऽर्थादीनामितरसंसर्गे सति ज्ञाननिष्पत्तेः।**[2] तथाहि जयन्तभट्टेन न्यायमञ्जरी इति ग्रन्थे अस्योदाहरणमावेदितम् - **अविरलजलधाराप्रबन्धबद्धान्धकारनिवहे बहुलनिशीथे सहसैव स्फुरता विद्युल्लतालोकेन कामिनीज्ञानमादधानेन तज्जन्मनि सातिशयत्वमवाप्यते।**[3] इति। कृष्णपक्षस्य मध्यरात्रिः अतिनिबिडान्धकारेण यदावृणोति तदा देदीप्यमानेन विद्युदालोकेन अन्धकारप्रभावेन रुद्धदृष्टिपथिकस्य नयनेन कस्यापि रमण्याः दर्शनं यदि भवेत्, तर्हि विद्युता रमण्याः ज्ञानं भवति तदा विद्युदेव अस्य ज्ञानस्य उत्पादका या उत्कर्षपदवाच्या। इतरकारकाणां सन्निधाने अपि यदि तत्र रमणी न तिष्ठति तदा तस्याः दर्शनमेव न जायते। वस्तुतः रमण्या उपस्थित्या दर्शनक्रिया अनुष्ठीयते। इत्थं तत्र अतिशययोगतः दर्शनक्रियायाः कर्म (रमणी) करणत्वेन भासते। अर्थात् कर्मणि करणस्यारोप प्रतिपद्यते। अर्थात् यस्य उपस्थितौ फलोत्पत्तिः अनिवार्यरूपेण सम्भवति, स एवातिशयः। सः अतिशयः सामग्र्यन्तर्गतस्य कस्यचिदेकस्य कारकस्य भवति इत्येवं निर्दिष्टरूपेण कथयितुं न शक्यते। किन्तु यदि सामग्री करणरूपेण गृह्यते तर्हि सामग्र्याः अतिशयत्वं सङ्गतमिति। सामग्र्याः उपस्थितौ कार्योत्पत्तिः अवश्यमेव सम्भवति। सामग्री एव साधकतममिति स्वीकरणीयम्। जयन्तभट्टेन नायमञ्जरीति ग्रन्थे अगादि – **एवमितरकारककदम्बसन्निधाने सत्यपि सीमन्तिनीमन्तरेण तद्दर्शनं न सम्पद्यते। आगतमात्रायामेव तस्यां भवति इति तदपि कर्मकारकमतिशययोगित्वात् करणं स्यात्, तस्मात् फलोत्पादाविनाभाविस्वभावत्वमवश्यतया कार्यजनकत्वमतिशयः। स च सामग्र्यन्तर्गतस्य न कस्यचिदेकस्य कारकस्य कथयितुं पार्यते। सामग्र्याः तु सोऽतिशयः सुवचः। सन्निहिता चेत् सामग्री, सम्पन्नमेव फलमिति सैवातिशयवती।** इति।[4] ननु मुख्ययोः प्रमातृप्रमेययोः प्रमितिरूपकार्योत्पत्तिं प्रति अविनाभावसम्बन्धरूपातिशयो विद्यमानः प्रमितिसम्बन्धं विना प्रमातृत्वं प्रमेयत्वञ्च न उपपद्येते। प्रमाता प्रमितेः आश्रयः भवति। प्रमेयः प्रमितेः विषयो भवति। प्रमिणोतीति प्रमाता

---

[1] तत्रैव, पृ. ७७.

[2] तदेव.

[3] तदेव, पृ. ७८.

[4] तदेव.

भवति, प्रमीयते इति च प्रमेयम्। केवलं कर्तुः कर्मणश्च उपस्थितौ प्रमाज्ञानं न सञ्जायते। कर्ता, कर्म, करणञ्च प्रमाज्ञानस्य कारणम्। एतेषां कारणानामुपस्थितौ प्रमाज्ञानं सम्भवति। उक्तकार्यसम्पादनात् अनन्तरं प्रमातृप्रमेययोः मुख्यार्थे प्रयोगः सम्पद्यते। तेषां कारणानां साकल्यापाये प्रमित्यभावाद्गौणे प्रमातृप्रमेये सम्पद्येते। अनेन साकल्यमन्तरेण प्रमितितमवर्थायोगात् तदेव करणम्।

ननु किमपेक्षायां सामग्र्याः करणत्वमिति संशयसमाधानकल्पे उच्यते तदन्तर्गकारकापेक्षमिति। सामग्री तदन्तर्गतकारकाणां स्वरूपं न विनश्यति। यतो हि यस्य कारकस्य यः धर्मो विद्यते किञ्च साकल्यदशायामपि तस्य प्रत्यभिज्ञानं भवति। ननु कारकसमुदयात् सामग्री भिन्ना न वा इति जिज्ञासायां चेदुच्यते भिन्नतापक्षे कथं सामग्री पृथक्तया नोपलभ्यते? किन्तु यदि अभिन्नमुच्यते सर्वाणि कारकाणि करणीभवन्ति एव इति कर्तृकर्मव्यवहारोच्छेदप्रसङ्गवाच्यम्। तत्रोत्तररूपेणोच्यते एवं न भवति, यतः सामग्रीसन्निधानाख्यधर्मस्य प्रत्यक्षं सम्भवति। अर्थात् कर्तृकर्मादीनि कारकाणि एकस्यां क्रियायां वर्तन्ते इति समुपलभ्यते। पृथगवस्थितेषु स्थालीजलज्वलनतण्डुलादिषु समग्रताप्रत्ययः न जातः। कार्योत्पत्तेः पूर्वं कार्योत्पत्तिसम्बन्धितकारणानामुपस्थितिः प्रयोजनीया। एतानि कारणानि विना कार्योत्पत्तिः न सम्भवति। सामग्री तस्याः अन्तर्गतकारणसमुदयात् कारणतां लभते। अतः कस्मिन् कर्मणि सामग्री करणमिति न परिचोदनीयम्। समुदायिनां कारकाणां सामग्र्यवस्थायामपि स्वरूपानपायात् समुदायिविशेषे कर्मणि सामग्री करणम्। तेन प्रमितेर्निरालम्बनत्वमुपपादितम्।

समग्र्याः करणत्वविषये उपस्थिते संशये उच्यते सामग्री यदि करणं भवति तर्हि सामग्रीशब्दस्य करणत्व-बोधकस्य तृतीयाविभक्तेः निर्देशः अवश्यमेव करणीयः। किन्तु सामग्रीशब्दे तृतीयाविभक्तिः न निर्दिष्टा। समग्र्याः करण-कारकविभक्तिनिर्देशः न प्रतीयते। अतः सामग्री न करणमिति उच्यते। एतस्य उत्तरं दृश्यते सामग्री हि संहतिः। सा सामग्री हि संहन्यमानव्यतिरेकेण न व्यवहारपदवीमवतरति। अर्थात् सामग्री प्रत्येकानां कारकाणां स्वरूपमिति। तेन समग्र्या पश्यामि इति न व्यपदेशम्। अतः सामग्री यतः प्रत्येकानां स्वरूपम् अतः प्रत्येकेन सह तृतीयाविभक्तेः अन्वयः न भवति चेत्सामग्री इत्यस्मिन् अपि तृतीयाविभक्तिः न भवति। दीपेन पश्यामः इत्यादौ तृतीयाविभक्तेः निर्देशः जायते। अत्र दीपादौ सामग्र्याः समारोपः कारणनिबन्धः। यस्मिन् यो धर्मः नास्ति तत्र तद्धर्मस्य आशय आरोपः कथ्यते इति आरोपस्य सामान्यस्वरूपम्। नियतफलोत्पादकत्वं सामग्र्याः स्वरूपम्। न केवलं इन्द्रियादौ अन्यत्रापि सामग्र्याः आरोपतः “स्थाली पचति” इत्येवं व्यवहारः समुपलभ्यते। जयन्तभट्टेनापि न्यायमञ्जरी इति ग्रन्थे गद्यते - “**यस्तु दीपेन्द्रियाणां तृतीयानिर्देशः स फलोपजननाविनाभाविस्वभावत्वाख्यसामग्रीस्वरूपसमारोपणनिबन्धनः**।” इति।[1]

---

[1] तदेव, पृ. ८२.

सहायकग्रन्थसूची

1. Bhattacharyay. A. (2011). *Bharatiya Darshaner Ruparekha* (3rd Ed.). Kolkata: Sanskrit Book Dipo.
2. Bhattacharyay. A. (2011). *Nyayamanjuri*. Kolkata: Sanskrit Book Dipo.
3. Chakroborty, S. (2007). *Sarvadarshanasangraha* (3rd Ed., Vol. 1st). Kolkata: Sahityashri.
4. Chakroborty, S. (2007). *Sarvadarshanasangraha* (3rd Ed., Vol. 2nd). Kolkata: Sahityashri.
5. Goswami, N. (2009). *Tarkasangraha (*3rd Ed.) Kolkata: Sanskrit Book Dipo.
6. Goswami, N. (2009). *Sankhyadarshana (*3rd Ed.) Kolkata: Sanskrit Book Dipo.
7. Tarkabagish, F. (2011). *Nyāyadarshanam* (Vol. 1st). Kolkata: Pachimbanga rajyapustak parsat.
8. Tripathi, D. (2009). *Tatwachintamani*. Kolkata: Sanskrit book dipo.
9. Tarkabagish, F. (2011). *Nyāyadarshanam* (Vol. 2nd). Kolkata: Pachimbanga rajyapustak parsat.

Author's Detail

Address: Dept. of Sanskrit (Nyāya)
Nabadwip Vidyasagar College,
Nadia, West Bengal, 741302
Email: nitaipalrkmv5@gmail.com

****

संस्कृतवाङ्मये गणितविज्ञानस्य प्रभावः

निहारीका प्रधान

शोधसारः

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भूवा।
आदौ वेदमयी दिव्या यतः सर्वा प्रवृत्तमः॥[1]

भारते वैदिकज्ञानविज्ञान-धर्माणाञ्च उत्पत्तिः वेदतः भवति। अतोच्यते - वेदोऽखिलो धर्ममूलम् (मनु-2/6)। सम्पूर्णे जगति ज्ञानविज्ञानस्य परम्परा अत्यन्तं प्राचीनं गम्भीरं च।अस्य कोऽपि निर्दिष्टं क्षेत्रं नास्ति।प्राचीन परम्परायाः अध्ययनं अध्यापनं क्रमविच्छेदं हेतु नूतनं जिज्ञासुनां कृते तत् अववोधनाय क्लिष्टं भवति।परन्तु सम्प्रति अपि वहुषु जिज्ञासु जनाः भारतीय वैदिकपरम्परायां यत् मूलभूत तत्वं वर्तते तस्य ज्ञानार्थनाय व्याकुलं भवति।अतः एतादृशं विषये साम्प्रतिक समाजस्य सुलभतां आवस्यकतां च मुपलक्ष्य गंभिरचिन्तनं अध्ययनं नितान्तं आवस्यकं वर्तते। वैदिककालात् आरम्भ कृत्वा इदानीं यावत् गणितशास्त्रस्य अवदानं महत्वपूर्णं अस्ति। कथ्यते यत् गणितशास्त्रं विना यत्किञ्चिद् अपि ज्ञातुम् न शक्यते। गणितशब्दस्य परिभाषा - **"गण्यते संख्ययते तद्गणितम् तत्प्रतिपादकत्वेन तत्संज्ञा शास्त्रम् उच्यते।"** विश्ववाङ्मये प्राचीनतमः निधि वेदः। मानवधर्मम् तथा सर्व विद्यायाः आदिम स्त्रोतः वेदः। साहित्यिक शास्त्रेषु वेदस्य प्राधन्यतावर्तते। संस्कृत वैदिकवाङमये गणितशास्त्रस्य उत्पत्तिः वेदतः भवति। वैदिककाले महर्षिनारदः ऋक्-यजुः-साम-अथर्व चतुः वेदः इतिहासः, पुराणं, व्याकरणम् आदि शास्त्रं अपि च पितृविद्याः ऱाशिविद्याः (Mathematics) देवविद्याः, निधिविद्याः (Mining, Engeering), तर्कशास्त्रं (Logic), ब्रह्मविद्यां (Spiritual Science) भुतविद्यां, क्षत्रविद्यां (Military Science) नक्षत्र विद्यां (Astrology) सर्पविद्यां देवजनविद्यां च ज्ञातवान्। वैदिकवाङ्मये चत्वारः वेदाः, षड् वेदाङ्गनि, चत्वारः उपवेदाः च प्राप्यन्ते। तत एव गणितविज्ञानस्य उत्पत्तिः विकासश्च अभवत्। **विदन्ति जानन्ति विद्यन्ते भवति विन्दन्ति विचारयन्ति सर्वे मनुष्याः सत्यविद्यां यैः येषु वा तथा विद्वांसश्च भवन्ति ते वेदाः।**[2]

कुटशब्दः - चर्तुवेदाः, वैदिकसाहित्यः, शूल्वसूत्र, भारतीयगणितज्ञपरम्पराः।

****

काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् इति कश्चन आभणकं सुप्रसिद्धःमस्ति। कणाद् महर्षिणा रचितं तर्कशास्त्रं काणादम् इति उच्यते। एवमेव महर्षि पाणिनिना रचितं व्याकरणशास्त्रं पाणिनीयम् इति प्रसिद्धम्। एवम् इयं सूक्तिः शास्त्रस्य व्याकरणशास्त्रस्य च प्रामुख्यं प्रकटयति, वस्तुतः एते द्वे शास्त्रे अन्येषां सर्वेषाम् अपि शास्त्रणां आधारभूतः सर्वशास्त्राधारभूतयोः अनयोः तर्क व्याकरणयोः मध्ये अपि भूरिशः गणिततत्वानां प्रयोगः दृश्यते। अतः गणितं तु अतीव मुख्यभुतं शास्त्रम् एव अस्ति। गण्यते संङ्ख्यायते तद्गणितम्, तत्प्रादिकत्वेन तत्सङ्गं शास्त्रमुच्यते इति गणितशब्दस्य व्युत्पत्तिः कोशग्रन्थेषु दृश्यते। तत्र गणसंख्याने धातोः क्तः प्रत्ययः विहितः। सख्यान शास्त्रं गणितम् इति अस्य फलितार्थः। संख्या इति शब्दस्य समानः एव अर्थः अस्ति सम् उपसर्ग पूर्वकस्य ख्या प्रकथने धातोः निष्पन्नं अयं शब्दः। गणितशास्त्रम्, संख्याशास्त्रम्, कलनशास्त्रम् इति पर्यायवाचकाः शब्दाः विद्यते। अमरकोषानुसारं गणितशास्त्रस्य पर्यायवाची संख्यातं गणितस्य माहत्म्यं प्रतिपादयति अयं श्लोकः

[1] महाभारत शान्तिपर्व २३१.५६

[2] ऋगवेद् भाष्यभूमिका

यथा शिखा मयुराणां नागानां मणयोः यथा।
तद्वद् वेदाङ्गशास्त्रणां गणितं मूर्धति स्थितम्॥[1]

कश्चन समालो चकः मतानुसारं गणितं तु कस्यचित् समाजस्य बौद्धिकगतिविधनां स्तरस्य सङ्केत रुपेण स्वीक्रियते, अतः एतत् (गणित) सभ्यताः इतिहासस्य सङ्कलने गणितस्य इतिहास महत्वपूर्णः घटकः विद्यते। भारतीय-गणितस्य इतिहासः अतिप्राचीनः अतिविशिष्टः च अस्ति। सहस्त्रशः बर्षेभ्यः पुर्वम् आरब्धाः एषा गणितीया परम्पराः अद्याबधि अविच्छन्नतया प्रचलति वैदिककालाद् आरभ्य गणितशास्त्रस्य विकाशः जातः। लोकिकेषु कर्मसु, वैदिकासू क्रियासु विविधेषु धार्मिक प्रसङ्गेषु च ये क्रियाकलापाः प्रचलन्ति, तत्र सर्वत्र अपि कलनाविधिः अवश्यं प्रयुक्ता भवति।

यथा - **लोकिके वैदिके वापि तथा समायिकेऽपि यः।**
व्यापारस्तत्र सर्वत्र संख्यानमुपयुज्यते॥

गणितस्य सर्वक्षेत्रव्यापकत्वं निरूपयन् सः दीर्घम् आवलिम् एव दर्शयति। सः कामशास्त्राद् आरभ्य संहितां यावत् गणितं सर्व क्षेत्रेषु व्याप्तम् इति दर्शयितुं प्रयतते। छान्दोग्योपनिषत्सामवेदस्य अङ्गभूता अस्ति। वेदा तु अति प्राचीनाः तेषु वेदमन्त्रेषु एव अनेकेषु सन्दर्भेषु गणितशास्त्रस्य ज्योतिष शास्त्रस्य वा साक्षात् उल्लेखः दृश्यते। अनेन अस्य गणितशास्त्रस्य प्राचीनत्वेन सह महत्वम् अपि प्रतिपादितं भवति। अतः प्राचीनकालात् आरभ्य भारतीयाः गणितस्य समुचितं स्थानं कल्पितवन्तः तस्य नियमितम् अध्ययनं च कृतवन्तः इति ज्ञायन्ते। यथा - **अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तं होवाच यद्वेत्थ तेन मोपसीद ततस्त उर्ध्वं वक्ष्यामिति स होवाच। ऋग्वेदं भगवोऽध्ययेमि यजुर्वेदं सामवेदमाथर्वणं च चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवविद्यां वाकोवाकमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद् भगवोऽध्यामि।**

गणितप्रपञ्चे भारतीयानां गणितज्ञानम् अनितरसाधारणं योगदानम् आसीत् इति सुविदितम्। प्राचीनाः भारतीयगणितज्ञाः तपसा भूपरिश्रमेण च अनेकानि तत्वानि अवगत्य तानि ग्रन्थेषु निबद्धवन्तः आसन्। महावीराचार्यः स्वग्रन्थे गणितज्ञानां गुणान् एवं वर्णयति –

लघुकरणोहापोहानालस्यग्रहणधारेणोपायैः।
व्यक्तिकराङ्कविशिष्टैर्गणकोऽष्टाभिर्गुणैर्ज्ञेयः॥[2]

येषां गणकानाम् उपरि कथिताः अष्टौ गुणाः भवन्ति ते गणितस्य गहनाः समस्याः अपि सरलीरत्या शीघ्रं च परिहर्तुं शक्नुवन्ति। 1, 2, 3 इति शून्य पर्यन्तं वयं यद्गणयथ ताः संस्कृतसंख्या एव इति वस्तुतः १, २, ३, ४, ५, ६, ७, ८, ९ इत्यतानि अङ्कचिन्हानि अपि भारतस्य एव योगदानम्। अतः एव अधुना एषः चिन्ह समुहः Indian international Number system इति कथ्यते। संख्या प्रयुज्यत्वे भारतस्य एव योगदानम् इति स्वामी विवेकानन्दः कथयन्ति – You

[1] वेदाङ्गज्योतिषः

[2] गणितसारसङ्ग्रह १.६९

know how many sciences had their origin in India. Mathematics began there you are even today counting 1, 2, 3 etc to zero after Sanskrit figures.

कश्चन केरलीयः गणितज्ञः कथयति यत् संख्या **संख्या पुनः एकमारभ्य दशपर्यन्तं विद्यमानाः प्रकृतिभूताः इव वर्तेरन्। इमाः प्रत्येकं दशसंख्यागुणितशतपर्यन्तं विद्यमानाः संख्या विकृतय इव वर्तेरन्।** विश्वस्य अतिप्राचीनभूतेषु वेदमन्त्रेषु एषः संख्याक्रमः दृश्यते। यजुर्वेदस्य तैत्तिरीयसंहितायाः संख्याहोमः एकस्मिन् अनुवाके कथ्यमान एषः मन्त्रः – **एकस्मै स्वाहा द्वाभ्याँ स्वाहा त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहा पञ्चभ्यः स्वाहा षडभ्यः स्वाहा सप्तभ्यः स्वाहाऽष्टाभ्यः स्वाहा नवभ्यः स्वाहा दशभ्यः स्वाहैकादशभ्यः स्वाहा**...........................

वेदमन्त्राः तु कर्णपरम्परायाः आगताः अतएव मन्त्र समूहः श्रुतिः इत्युच्यते। वेदोक्तानाम् अङ्कानां लेखनस्य चिन्हानि भारतात् एव उद्गतानि इति। एते 1, 2, 3, ...9 इति भारतीयानाम् अङ्का, तेषा चिन्हानि च आरबीयैः अनुसृतन्ति ततः युरोपभूभागस्य अनेकेषु देशेषु प्रसारितानि च अभवन्। अस्माकं देशेषु प्रसारितानि च अभवन्। अस्माकं प्राचीन इतिहासे अपि प्रसङ्गेसु गणनासम्बन्द्धा अङ्कसम्बन्धा उल्लेखा भूरीशः दृश्यन्ते। यथा महाभारते वनपर्वणि अष्टावक्रस्य कथाभागे सङ्ख्यानां प्रसङ्गे उक्तं नवयोगे गणनामेति शाश्वत इति। प्राचीन गणितकाराः तेषां जीवनकालं गणितीयं योगदानं च अधः तालिकायां दीयते –

सं	गणितज्ञ	कालः	ग्रन्थः
१.	बोधायन	सा.पू. ८००पूर्वम्	शुल्वसूत्राणि
२.	आपस्तम्बः	सा.पू ६०० पूर्वम्	शुल्वसूत्राणि
३.	कात्यायनः		शुल्वसूत्राणि
४.	मनुः		शुल्वसूत्राणि
५.	पिङ्गलः	सा.पू.३०० पूर्वम्	छन्दःसूत्रम्
६.	(अज्ञातम्)	सा.यु.३०० पूर्वम्	वक्षाली पाण्डुलिपिः
७.	आर्यभट्टः(१)	४७६ सा.यु.	आर्यभट्टीयम्
८.	वराहमिहिरः	५०५ सा.यु.	पञ्चसिद्धान्तिका, वृहत्संहिता
९.	ब्रह्मगुप्तः	५९८ सा.यु.	ब्राह्मस्फुटसिद्धान्तः, खण्डखाद्यकम्
१०.	भास्कराचार्यः(१)	६२१ सा.यु.	महाभास्करीय, लघुभास्करीय, आर्यभटीयम्
११.	श्रीधराचार्यः	७५० सा.यु.	पाटीगणितम्, त्रिशतिका
१२.	महावीराचार्यः	८५० सा.यु.	गणितसारसंग्रह
१३.	शङ्करवर्मा	१८००सा.यु.	सद्रत्नमाला
१४.	कृष्णदैवज्ञः	१६-शताब्दम् सा.यु	बीजपल्लवम्

बृहत्संख्यानां प्रदर्शनम् - अनेकेषु सन्दर्भेषु वेदमन्त्राः वृहत्संख्याः कथयन्ति। तैत्तिरीयसंहितायाम् मन्त्रे विंशतिस्थान पर्यन्तम् 1019 संख्याः कथ्यन्ते। सृष्टिप्रकरणस्य कथनसन्दर्भे अस्माकं प्राचीनाः ग्रन्थाः बृहत्संङ्ख्यानां प्रयोगं कुर्वन्ति। कल्पयुग-चतुर्युग-महायुगादयःशब्दाःबृहत्कालपरिमाणस्य परिचायकाः भवन्ति। यथा कृत-त्रेता-द्वापर-

कलियुगानि प्रत्येकं लक्षशः मानववर्षपरिमितानि भवन्ति। परोक्षभूते सृष्टिविषये भारतीयाः ज्योतिषज्ञाः एतावत्सूक्ष्म-कलनानि कथयन्ति इति नूनं विस्मयास्पदम् एव। प्राचीनेषु ग्रन्थेषु बृहत्सङ्ख्यानाम् उल्लेखः वहुधा लभ्यते। अधः तालिकायां केषाञ्चन ग्रन्थानां सूची दत्ता अस्ति।

सं	ग्रन्थः	कालः	सन्दर्भः	संङ्ख्या
१.	ऋग्वेदः	आदिकालः	संख्याहोमः	$१०^{१२}$
२.	तैतिरीयसंहिता	आदिकालः	प्रजापतये हविषां प्रदानम्	$१०^{१९}$
३.	मैत्रायणीसंहिता	आदिकालः	संख्याहोमः	$१०^{१२}$
४.	रामायणम्	आदिकालः	किष्किन्धाकाण्डे गन्धमदनस्य सैन्यबलम्	$१०^{१२}$
५.	कात्यायनस्य पालीव्याकरणम्	६०० सा.पु.	संख्याविवरणविभागः	$१०^{१४०}$
६.	ललितविस्तरः	३०० सा.पु.	यशोधरायाः स्वयंवरः	$१०^{४२१}$
७.	लीलावती	११**१४** सा.यु.	संख्यास्थाननिर्देशः	$१०^{१७}$

संख्याः अधः तालिकायां प्रदर्श्यन्ते -

स.	संख्यापदम्	संख्या	स्थानम्
१	एकम्	१	$१०^{०}$
२	दश	१०	$१०^{१}$
३	शतम्	१००	$१०^{२}$
४	सहस्रम्	१०००	$१०^{३}$
५	अयुतम्	१००००	$१०^{४}$
६	नियुतम्	१०००००	$१०^{५}$
७	प्रयुतम्	१००००००	$१०^{६}$
८	अर्बुदम्	१०००००००	$१०^{७}$
९	न्यर्बुदम्	१००००००००	$१०^{८}$
१०	समुद्रः	१०००००००००	$१०^{९}$
११	मध्यम्	१००००००००००	$१०^{१०}$
१२	अन्तम्	१०००००००००००	$१०^{११}$
१३	परार्धम्	१००००००००००००	$१०^{१२}$
१४	उषस्	१०००००००००००००	$१०^{१३}$
१५	व्युष्टि	१००००००००००००००	$१०^{१४}$
१६	उदेष्यत्	१०००००००००००००००	$१०^{१५}$
१७	उद्यत्	१००००००००००००००००	$१०^{१६}$
१८	उदितम्	१०००००००००००००००००	$१०^{१७}$

१९	सुवर्गम्	१००००००००००००००००००	$१०^{१८}$
२०	लोकः	१०००००००००००००००००००००	$१०^{११}$

दशमान – पद्धतिः (दाशमानपद्धतिः) - विश्वास्मिन् नानादेशेषु प्रदेशेषु च विभिन्नप्रकारकाः संख्यापद्धतयः विकसिताः आसन्। भारतीयैः आविष्कृता दशमानपद्धतिः एतादृशी अस्ति यां विहाय काचिदपि अन्या पद्धतिः सर्वैः तथा आद्रियते यथा एषा। कारणम् इयं बहु उपयुक्ता अस्ति। आबहोः कालात् एषा संङ्ख्यापद्धतिः अधुना यावत् शिला-लिखितम् अक्षरम् इव कालचक्रवलयेन अबाधिता सती चिरं स्थिरा अवस्थिता अस्ति। भारतीयैः विकसिता एषा पद्धतिः एव विश्वस्तरे सर्वैः अनुपाल्यते। दश सङ्ख्यायाः आधारेण प्रचलिता एषा रीतिः दशमानपद्धतिः (दशाङ्कविधानम्) इति उच्यते। भारते उद्भुता एषा पद्धतिः आदौ अरब-देशेषु प्रसुता ततः युरोपभुभागस्य देशेषु व्याप्ता। इटाली-देशीय प्रसिद्धः गणितज्ञः फेबोनाच्ची, फ्राँस्-देशीयः च विख्यातः वैज्ञानिकः लाप्लेस्-इत्यादयः मुक्तकण्ठेन एतां पद्धतिं प्रशंसन्ति स्म। भारतीयसंख्यापद्धतेः किं तत् वैशिष्ट्यं यत् विश्वे सर्वैरपि अनुमोदितं अनुपालितं च? एतस्य अनेकानि कारणानि सन्ति।

- स्थानानुगुणम् अङ्कनां स्थापनं सुव्यवस्थितं वर्तते।
- सङ्ख्यानां कथने, पठने लेखने च सारल्यम् अनुभूयते।
- बृहत्तमाः संङ्ख्याः अपि क्लेशं विना लिख्यन्ते।
- सङ्कलनादीनि गणितीयपरिकर्मणि सरलसाध्यानि भवन्ति।
- मानसिककलनं निर्बाधं कर्तुं शक्यते।
- आशुकलनं (वेगेन गणनकार्यम्) क्लेशं विना सिद्ध्यति।
- सख्यानां विविधाः विन्यासाः सरलतया बुध्यन्ते।
- पुराणे सृष्टि-स्थिति-लय-सम्बद्धः कश्चन प्रसङ्गः प्राप्यते।

स्थानात्स्थानं दशगुणमेकस्माद्गुण्यते द्विज।

ततोऽष्टादशमे भागे परार्द्धमभिधीयते॥[1]

न केवलं पुराणोतिहास – ग्रन्थेषु अपितु भाष्यग्रन्थेषु दशमानपद्धतेः उल्लेखः दृश्यते। पतञ्जलेः योगसूत्रणां व्यासभाष्यं किञ्चन प्रसिद्धं भाष्यम् अस्ति। तत्र कञ्चन दार्शनिकविषयं स्पष्टीकर्तुं भाष्यकारः गणितीयं विषयम् उदाहरति। शङ्कराचार्यस्य ब्रह्मसूत्रभाष्ये अपि दशमान पद्धतिः उल्लिखिता अस्ति। अत्रापि गणितीयेन उदाहरणेन कश्चन दार्शनिकः विषयः अवबोध्यते। **यथा चैकापि रेखा सती स्थानान्यत्वेन निविशमाना एक-दश-शत-सहस्रादि-प्रत्ययभेदम् अनुभवति.....**॥[2] गणितीय-ग्रन्थेषु एतां पद्धतिम् अवलम्ब्य अनेकानि स्थानानि कथ्यन्ते। तानि क्रमशः अवलोकायामः। आदौ आर्यभटेन दशगुणस्थानस्य विषये किम् उक्तम् इति अवलोकयामः

---

[1] विष्णुपुराणम्, ६.३.४

[2] शङ्कराचार्यस्य ब्रह्मसूत्रभाष्यम्

एकं च दश च शतं च सहस्रं त्वयुतनियुते तथा प्रयुतम्।

कोट्यर्बुदं च बृन्दं स्थानात्स्थानं दशगुणं स्यात्॥

विश्वस्य इतिहासपटले भारतीयानाम् दशमानविधानम् अत्युत्कृष्टेषु योगदानेषु अन्यतमम् अस्ति। अतः एताम् अद्भुतां पद्धतिम् उद्दिश्य विश्वस्तरीयाः नानाविधाः स्वदेशीयाः विदेशीयाः च विद्वांसः मुक्तकण्ठं प्रशसन्ति। तेषां प्रशंसावचनं अधः उल्लिख्यान्ते। The marvelous decimal place-value system of numeration is Indian's foremost scientific gift to the world. Prof. R.C. Gupta (Contemporary Historian of Mathematics, b. 1935 CE)

शून्यम् अनन्तश्च - शून्यस्य आविष्कारः प्राचीनभारतीयानां मुख्यभूतेषु आविष्कारेषु अन्यतमः अस्ति। भारते शून्यस्य प्रयोगः सामान्ययुगमानात् वहुभ्यः शताब्देभ्यः पूर्वमेव दृश्यते। बिन्दुरुपेण लघुवृत्तरुपेण वा तस्य चिन्हं, दशमान पद्धत्या च तस्य प्रयोगः अतिप्राचीन कालात् एव भारते आसीत्। शून्यं भारतदेशात् आदौ मध्यपूर्वदेशेषु प्रसृतम् आसीत्। विदेशेषु शून्यस्य अपरैः अङ्कैः सह प्रयोगः वहुकालपर्यन्तं न आसीत् एव। ततः युरोपभूभागीयेषु देशेषु प्रसृतम् आसीत्। विदेशेषु शून्यस्य उपरैः अङ्कैः सह तुल्यरुपेण प्रयोगः बहुकालपर्यन्तं न आसीत् एव। ऋग्वेदे "शुन" शब्दः अनेकवारं प्रयुक्तः अस्ति। अथर्ववेदमन्त्रे शून्यशव्दस्य उल्लेखः "रिक्तम्" इत्यस्मिन् अर्थे दृश्यते, अर्थववेदे 'क्षुद्रम्' 'ऋचम्' 'अनृचम्' इत्येते शब्दाः शून्य-धन-ऋण-संख्या-द्योतकाः भवन्ति इति केषाञ्चन विदुषां मतम्।

उतिष्ठेतः किमिच्छन्तीदमागा अहं त्वेडे अभिभुः स्वाद्गृहात्।

शून्यैषी निऋते याजगन्थोत्तिष्ठाराते प्र पत मेह रंस्था॥

आध्यात्मिके क्षेत्रे अपि शून्यशब्दस्य प्रयोगः क्रियते। बौद्धदर्शने तु शून्यवादः इति कश्चन प्रसिद्धः वादः अस्ति। तत्र शून्यशब्दः निर्वाणम् मोक्षः इत्यस्य पर्यायत्वेन प्रयुज्यते। बौद्धः दार्शनिकः नागार्जुनः शून्यस्य महत्वम् कथयति। प्राचीनैः गणितज्ञैः अनन्तराशेः विषये अपि कथितम् आसीत्। अनन्तराशेः कलना वेदमन्त्रेषु अपि लभ्यते। शुक्लयजुर्वेदस्य शान्तिपाठस्य प्रसिद्धः एक मन्त्रः –

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।


पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

महावीराचार्यः स्वग्रन्थे सङ्ख्यासंज्ञा इत्यस्मिन् शून्यस्य संज्ञा कथयति –आकाशम्, गगनम्, अम्बरम्, खम्, नभ, वियत्, अनन्तम्, अनन्तम्, बिष्णुपादम् दिवि इत्यते शब्दाः शून्यस्य वाचकाः भवन्ति। शून्यस्य आविष्कारः विश्वस्य अनेकेषां विदुषाम् अवधानकेन्द्रं जातम् आसीत्।

वक्षाली पाण्डुलिपिः - उपलभ्यमानेषु प्रचीन गणितीय ग्रन्थेषु बक्षाली पाण्डुलिपिः अन्यतमा अस्ति। न्युनाति-न्युनम् २,३०० संवत्सरेभ्यः पूर्वम् अस्याः पाण्डुलिपेः रचनाकालः स्यात्। एतस्यां पाण्डुलिप्यां शून्यस्य संख्यात्वेन प्रयोगः अस्ति। अधः अस्याः पाण्डुलिपेः कश्चन लघुभागः उद्धृत अस्ति। अत्र द्वयोः भिन्नयोः गुणनम् अपवर्तनम् इत्यादिकर्मसु शून्यस्य प्रयोगः दृश्यते।

अप्रमेयः संख्या - व्यासते विभज्यते अनेन वृतम् इति व्यासः एवं व्यास शब्दस्य निर्वचनं भवति। वि-उपसर्ग-पूर्वकः असु क्षेपणे धातोः घञ्-प्रत्ययस्य योजनेन अयं शब्दः निष्पन्नः भवति। अर्थात् वृत्तम् (द्विधाः) विभाजयति। इति हेतोः सः व्यास इति कथ्यते। महाभारतस्य रचयिता भगवान् वेदव्यासः अपि वेदानां विभागं कृतवान् इत्यतः सः व्यासः इति नाम्ना ख्यातः अभवत्। तस्य वास्तविकं नाम तु कृष्णः इत्येव आसीत्। एतमेव भावं कथयति महाभारतस्य अयं श्लोकः – **विव्यास वेदान् यस्मात् स तस्माद्व्यास इति स्मृतः।**

वृत्तक्षेत्रे व्यासः वृत्तस्य केन्द्रं स्पृशन् परीधेः एकस्मात् परिधिस्थात् बिन्दोः अपरम् अभिमुखं परिधिस्थं बिन्दुं गच्छति। व्यासस्य अपेक्षया परिधेः मानं तु अधिकं भवति इति स्पष्टं दृश्यते। वृत्तस्य परिधिः तस्य व्यासस्य मानेन सह केनापि प्रकारेण सम्बद्धः भवति। वस्तुतः वृत्तस्य परिधि-व्यासयोः कश्चन अनुपातः (Ratio) एषः अनुपातः सर्वेषाम् अपि वृत्तानां समानः एव भवति। एतस्मिन् विषये सहस्राधिकसंवत्सरेभ्यः पूर्वम् आर्यभटेन परिधिव्यासानुपादस्य मानम् ३.१४१६ इति कथितम्। श्लोक एवम् अस्ति।



चतुराधिकं शतमष्टगुणं द्वाषष्टिस्तथा सहस्राणाम्।
अयुतद्वयविष्कम्भस्यासन्नो वृत्तपरिणाहः॥

आर्यभटेन कथितस्य वृत्तस्य परिधि-व्यास-अनुपातं सकृत् अवलोकयामः –

विष्कम्भः (व्यास) = अयुतद्वयम् = २००००

वृत्तपरिणाहः (परिधिः) = ६२, ८३२

परिधि-व्यास-अनुपातः ≅ ६२८३२ = ३.१४१६ २००००

श्लोके 'आसन्न' इति शब्दः विशेषः – अवधानम् आवहति। आसन्नस्यः अर्थ तु प्रायः, निकटम् इति स्विक्रियते। अर्थात् यत् मानम् आसन्नम् इति कथ्यते तत्तु साक्षात् तुल्यं न भवति, अपि तु तत्समीपम् इत्यव भवति। गणितकाराः अद्यावधि वर्त्तुलस्य परिधि-व्यासयोः अनुपातं साक्षात्तुल्यमानम् इति कथयितुं न शक्तवन्तः यतः तथा न सम्भवत्यव। तन्नाम कस्यचित् वर्तुलस्य परिधि – व्यासानपातस्य मानम् इदमित्थम् इति कयापि भिन्न-अभिन्नया संख्या निर्देष्टुं न शक्यम् एव। केवलं तस्य समीपं समीपतरं समीपतमं वा मानं कथयितुं शक्यते। वृत्तस्य परिधिः-व्यास-अनुपातः गणितीये क्षेत्रे अतीव प्रमुख्यम् आवहति। शुल्वसूत्रेभ्यः आरभ्य तस्य विषये प्रायः सर्वैः प्राचीनैः भारतीयगणितकारैः प्रत्यक्षेण परोक्षेण वा कथितं दृश्यते। कालप्रमाणेन तस्य अनुपातस्य मानप्राप्तौ अपि कथं मान्यता वर्धिता इति अवलोकयितुं शक्यते।

क्षेत्र गणितम् - वयं जीवने विविधानि आकृतिविशिष्टानि वस्तुनि पश्यामः। प्रत्येकम् आकृतेः किञ्चन वैशिष्टम् अपि अस्ति। चक्रस्य आकृति वर्तुला इत्यतः तत् गतीशीलं भवति। कन्दुकस्य गोलाकृतिः, अतः तत् चञ्चलं सत् सदैव भ्रमति। वयं प्रमाण – समये यां यानपेटिका नयामः सा चतुरस्रकार इत्यतः अविचला स्थिरा च भवति। एवं विविधानाम् आकृतीनां विशिष्टानि लक्षणानि भवन्ति। भवन्तः कदाचित् प्राचीनं मन्दिरं गतवन्तः स्युः। तत्र प्रवेशद्वार महत् गोपुरं दृश्यते किल। आकृतीनां विषयकं शास्त्रम् एव क्षेत्रगणितम् इति। क्षेत्र गणितं गणितस्य प्रमुखं अङ्ग भवति। भारते

क्षेत्रगणितस्य इतिहासः अतिप्राचीनः अस्ति। शुल्वसुत्रेषु नानाप्रकाराः क्षेत्रगणितस्य विशेषाः अवलोकयितुं शक्यन्ते। वस्तुतः विश्वस्य आदिमः क्षेत्रगणितीय ग्रन्थः शुल्वसूत्राणि एव इतिहासकाराः कथयन्ति। शुल्वसूत्राणि अतिप्राचीनानि इत्यतः तेषां कालनिर्णयः अपि निश्चितीरीत्या आकलयितुं न शक्यते। इतिहासकाराः वदन्ति यत् तेषां कालनिर्णयः अपि निश्चितरीत्या आकलयितुं न शक्यन्ते। इतिहासकाराः वदन्ति यत् तेषां रचना तु निश्चयेन न्यूनति – न्युनम् २,८०० संवत्सरपूर्वं जाता स्यात् इति। यागयज्ञादीन् कर्तुं विविधानाम् आकृतीनां वेदयः निर्मीयन्ते। शुल्वसूत्रेषु त्र्यसम् (त्रिकोणः) चतुरस्रम्, समचतुरस्रम्, द्वि-समचतुरस्रम्, आयतः, वर्तुलम्, अर्धवर्तुलम्, चापः इत्यादीनाम् अनेकासम् आकृतीनाम् उल्लेखः प्राप्यते। एतासाम् आकृतीनां निर्माणम्, क्षेत्रफलादीनां गणनाविधिः इस्यादीनि विवरणानि अपि तत्र कथितानि सन्ति। निर्दिष्टानाम् आकृतीनां द्विगुणीकरणम्, लघुकरणम्, इत्यादयः अंशाः अपि तत्र उक्ताः सन्ति। क्षेत्रफलस्य परिवर्तनं विना आकृतेः परिवर्तनं कर्तुं सूत्राणि अपि शुल्वकारैः कथितानि आसन्। एतादृशेषु गणनाकार्येषु प्राचीनाः भारतीयः निष्णाताः आसन्।

त्रिभुज – चतुर्भुज – वृत्तक्षेत्रम् - अस्य निखिल प्रपञ्चस्य सृष्टि-स्थिति-संहार-कर्तारः ब्रह्मा-विष्णु-महेश्वराः त्रिमूर्त्तिः इति कथ्यते। संस्कृतसाहित्ये त्रि इति संख्यायाः वहुमहत्वम् अस्ति। वहुवचनस्य आरम्भः अपि त्रि इति सङ्ख्यातः एव भवति। गणितीये क्षेत्रे अपि त्रि संङ्ख्यायाः प्रामुख्यम् अस्ति। त्रयणां राशिनां समाहारः त्रैराशिकम् इति पाटीगणिते विशिष्टः कश्चन विषयः भवति। त्रिकोणम्, त्रिकम्, त्रैराशिकम्, त्रिज्या, त्रिपादः इत्यादयः अनेके त्रिसम्बद्धाः गणितीयाः शब्दाः सन्ति। भगवान् विष्णुः चतुर्भुज इति कीर्तितः। पराशरभट्टः भगवद्गुणदर्पणः इत्यस्मिन् ग्रन्थे भगवन्तं नारायणं चतुर्भुजः, उदारङ्गः, इत्यादिभिः विशेषणैः वर्णयति। धर्म-अर्थ-काम-मोक्षाः इति चतुर्णां पुरुषार्थानां दाता चतुर्भुजः विष्णुः एव अस्ति। भगवतः विष्णोः चतुर्षु करेषु विद्यमानानाम् आयुधानां विश्लेषण मेवं क्रियते।

शङ्खचक्रगदाधरी पद्महस्तो चतुर्भुजः।
आदित्रयं तु शिक्षार्थं चरमं पदवीमिति ॥

चतुर्भिः बाहुभिः आवृत्तं क्षेत्रम् एव चतुर्भुजं भवति। चतुरस्रम्, चतुरस्रिः, चतुर्बाहुः इति चतुर्भुजस्य पर्यायशब्दाः सन्ति। यत् क्षेत्रं स्वमध्यगतः विन्दु परितः एकया एव रेखया तुल्यान्तरेण आवृत्तं भवेत् तत् वृत्तम् इति कथ्यते। भारतस्य लोकसभायां ध्येयवाक्यरुपेण सभाध्यक्षस्य आसन्दस्य उपरि लिखितम् अस्ति धर्मचक्रप्रवर्तनाय इति। वृत्तिः, वर्तुलम्, मण्डलम् इति वृत्तस्य पर्यायशब्दाः सन्ति। समवृत्तम्, अर्धवृत्तम्, आयतवृत्तम् इत्यादिभिः प्रकारैः वृत्तं विद्यते।

उपसंहारः - ऋक्, यजुः, साम, अथर्वण इति चत्वारः वेदाः सन्ति। वेदमन्त्राणाम् आविष्कारः लक्षशः संवत्सरेभ्यः पूर्वं जातः आसीत्। वहुषु मन्त्रेषु गणितीयं ज्ञानम् अनेकेषु सन्दर्भेषु दृश्यते। विभिन्नानां गृह-वेदी-नगरदीनां निर्माणार्थं मन्त्रेषु नानाविधक्षेत्रगणितीयं ज्ञानम् प्रकटितं भवति। तत्र विविधाः क्षेत्रनिर्माण प्रक्रियाः च उच्यनते। रथस्य आसनानि, आसनानाम् आकृतिः, चक्राणि, चक्राणां प्रभागाः परिधिः (rim), नाभिः (hub), अराः (spokes) इत्यादयः अनेके सुक्ष्मविषयाः अपि तेषु उक्ताः सन्ति।

Bibliography

1. Agarwal, J., Matta, V. and Arya, D. (2013) Design and Implementation of FFT Processor Using Vedic Multiplier with High Throughput. International Journal of Emerging Technology and Advanced Engineering, 3, 207-211.
2. Aggrawal, S. (2013) Observations from Figuring. http://vedicmaths.org Bajaj, R. (2005) Vedic mathematics: The Problem Solver. Black Rose Publications. Bose, S. (2014) Vedic Mathematics. V and S Publishers, New Delhi, Edition 192।
3. Tirthaji, S.B.K. (1965) Vedic Mathematics. Motilal Banarasidass, New Delhi, The Concept of Vedic Maths (2015) https://www.walnutexcellence.com/the-concept-of-vedic-maths/
4. William, K. (n.d.) How to Unleash Your Natural Ability for Mental Math by Discovering the "Secret Mathematician" Hidden Deep within You! http://www.mathmonkeybrunei.com/vedic_math. php
5. Das, S. (n.d.) The History & Future of Vedic Maths. http://hinduism.about.com/od/vedicmaths_/a/vedicmath history_future.htm Vaidya, S.A. (2019) The Contribution of Vedic Mathematics in Advance Calculus. Doctoral Dissertation, Shri JagdishprasadJhabarmalTibrewala University, Rajasthan, India.

Author's Detail

Address: Research Scholar,
Pondicherry University

Email: neeharikapradhan@gmail.com

****

संस्कृत साहित्य में प्रतीक: आध्यात्मिक एवं सांस्कृतिक

रिगज़िन यंगडोल

शोधसार

प्रतीक धार्मिक, दार्शनिक एवं आध्यात्मिक भावों मान्यताओं का स्थूल रूप है। जिसका सम्बन्ध मानव स्वभाव से है। प्रतीक के द्वारा सूक्ष्म रूप से वस्तु विशेष का स्पष्टतया बोध हो जाता है। चित्र, साहित्य, मूर्ति, संगीत आदि सभी कलाओं में प्रतीक का प्रभाव रहा है। भारतीय परम्परा में अध्यात्म एवं सांस्कृतिक भावनाओं के आधार पर प्रतीक का आरम्भ हुआ। पद्म, स्वस्तिक, शंख, सूर्य, वृक्ष आदि माङ्गलिक प्रतीक भारतीय संस्कृति के गूढ रूप को प्रतिबिम्बित करते हैं। आदिकाल से प्रतीक भावाभिव्यक्ति का साधन रहा है। लोककथाओं, प्रतिमाओं, लोकचित्रों, रेखाङ्कनों एवं चित्रकारिता के माध्यम से संस्कृति एवं समाज की भावनाओं का निरूपण होता है। प्रतीक के माध्यम से प्रकृति के उपादानों की पूजा का विधान भी रहा है। वस्तुतः प्रतीक व्यञ्जनात्मक रूप या भावनात्मक रूप के माध्यम से विशिष्ट अर्थ को व्यक्त करता है।

कूटशब्द - अध्यात्म, संस्कृति, प्रतीक, कला, समाज, दर्शन।

****

किसी जड़ या चेतन पदार्थ के प्रति जागृत भावना प्रतीक कहलाता है। यथा आकाश से विशालता, सागर से गम्भीरता, पृथ्वी से सहनशीलता, हिमालय से अचलता आदि का भाव प्रतीक है। भारतीय साहित्य में सर्वप्रथम प्रतीक शब्द का प्रयोग ऋग्वेद में हुआ है। जिसका अर्थ अवयव या अङ्ग है।[1] अमरकोष में भी इसे अङ्ग या अवयव का वाचक कहा गया है।[2] शतपथ ब्राह्मण में प्रतीक की संक्षिप्त परिभाषा 'मुखं प्रतीकम्' की गई है।[3] प्रतीक शब्द की व्युत्पत्ति प्रति उपसर्गपूर्वक कन् प्रत्यय से हुई है, जिसका तात्पर्य केवल प्रकृष्ट अर्थ को प्रदान करने वाला तत्त्व है। प्रतीक का सम्बन्ध उस पारिभाषिकी विद्या से है जिसके अन्तर्गत नाम और रूप के पारस्पारिक भेद और वास्तविकता का विवेचन होता है। अर्थात् किसी वस्तु विशेष का बोध होने पर उसके रूप की कल्पना कर उसे नाम देना प्रतीक कहलाता है। आदिकाल में गुहा-निवासियों द्वारा किसी वस्तु का बोध होने पर रूप की कल्पना कर उसे दीवार या चट्टानों पर अङ्कित किया जाता था, जो प्रतीक का प्रारम्भ था। समयानुसार मानव के विकासशील विचारों के साथ साथ प्रतीक का स्वरूप भी बदलता रहा। यह समाज विशेष के जीवन दर्शन और संस्कारों से सम्बद्ध है। प्रतीक के माध्यम से समाज की अभिव्यक्ति सरल हो जाती है। आदिकाल से प्रतीक भावाभिव्यक्ति का साधन रहा है। लोककथाओं, प्रतिमाओं, लोकचित्रों, रेखाङ्कनों एवं चित्रकारिता के माध्यम से संस्कृति एवं समाज की भावनाओं का निरूपण होता है। प्रतीक के माध्यम से प्रकृति के उपादानों की पूजा का विधान भी रहा है। ये न केवल विचारों एवं भावों को ही अभिव्यक्त करते हैं अपितु माङ्गलिक भावों की सृष्टि भी करते हैं। वस्तुतः प्रतीक व्यञ्जनात्मक रूप या भावनात्मक रूप के माध्यम से विशिष्ट अर्थ को व्यक्त करता

---

[1] वि सानुना पृथिवी सस्र उर्व्वी पृथु प्रतीक मध्येधे अग्निः। तथाग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवम्॥ ऋग्वेद, ७:३६.१

[2] अमरकोष, द्वितीय काण्ड, ७

[3] शतपथब्राह्मण, १४:४.३.७

है। हिन्दी साहित्य कोश के अनुसार अमूर्त, अदृश्य, अश्रव्य और अप्रस्तुत विषय का प्रतिविधान मूर्त, दृश्य, श्रव्य और प्रस्तुत विषयों द्वारा प्रतीक माध्यम से होता है।[1] जनार्दन मिश्र के अनुसार भारतीय दार्शनिक सिद्धान्तों के आधार पर भारतीय प्रतीकों का निर्माण हुआ है।[2] प्रस्तुत पत्र में आध्यात्मिक एवं सांकृतिक स्वरूप में प्रतीक विधान का संक्षिप्त वर्णन किया गया है -

आध्यात्मिक प्रतीक - भारतीय दर्शन और तत्त्वज्ञान आदि के सिद्धान्त भारतीय प्रतीक विद्या के आधार हैं। भारतीय आस्तिक और नास्तिक दर्शन के भावनाओं, विचारों के आधार पर मूर्ति, चित्र, मन्दिर, स्तूप स्तम्भादि के रूप में प्रतीकों का निर्माण हुआ। अमूर्त तत्त्व को मूर्त रूप प्रदान करना प्रतीक है। प्रतीक विविध विधाओं साहित्यिक, वैज्ञानिक, ऐतिहासिक, धार्मिक, सामाजिक आदि विषयों में विद्यमान है। धर्म के क्षेत्र में प्रतीक भावना का प्रभाव वैदिक काल से प्राप्त होता है। वैदिक मन्त्रों में प्रयुक्त 'प्रतिमा' शब्द 'प्रतीक' अथवा 'मूर्ति' का समानार्थक है।[3] वैदिक संहिताओं में ईश्वरवादी भाव प्रतीक मूर्तियों की रचना एवं मूर्तिपूजा अथवा प्रतीकोपासना का वर्णन प्राप्त होता है।[4] भारतीय संस्कृति में मङ्गल कार्य का आरम्भ पञ्चदेव के रूप में परमात्मा की अराधना के पश्चात् होता है। ये पञ्चदेव - गणेश, विष्णु, शिव, सूर्य और दुर्गा है। और ये भारतीय परम्परा के आध्यात्मिक प्रतीक हैं। जिनका संक्षिप्त वर्णन किया जा रहा है -

गणेश - गणेश की उपासना दो रूपों में ब्रह्म और गुणाभिमानी तथा निमित्ताभिमानी देवता के रूप में की गई है। यह ॐकार स्वरूप में वर्णित है जो सत्त्व, रजस् और तमस् इन तीनों गुणों से युक्त होने के कारण बुद्धि, सिद्धि, ऋद्धि आदि के देवता हैं। इनकी चारों भुजाएं चार दिशाओं के प्रतीक हैं। जो सर्वव्यापित्व का लक्षण है। गणेश के वाहन मूषक, वृषभ, सिंह, मयूर गरुडादि हैं, जो धर्म के प्रतीक हैं।[5] गणेश के वाहन मूषक को विघ्न का प्रतीक माना है और उस विघ्न का नाश करने वाला विशाल शरीर वाला गणेश विशाल बुद्धि का प्रतीक है, जिनके समक्ष समस्त विघ्न मूषक के समान लघु हो जाते हैं।

विष्णु - जो विश्व में सर्वत्र परिव्याप्त है, वह विष्णु है।[6] विष्णु के चार अस्त्र शङ्ख,चक्र, गदा और पद्म भिन्न-भिन्न रूपों के प्रतीक हैं। 'शङ्ख' वाक् या शब्द ब्रह्म का प्रतीक है, 'चक्र' रक्षाशक्ति का चिह्न होने के कारण सत्त्व गुण का प्रतीक है, गदा तमोगुण संहार शक्ति है। अतः यह चारों अस्त्र त्रिगुणात्मक चार शक्तियों के प्रतीक हैं। शेषनाग विष्णु की शय्या है। शेष को काल का प्रतीक माना है, जो नाना रूपों में सम्पूर्ण सृष्टि में विकास का कार्य करता है। विष्णु का

---

[1] हिन्दी साहित्य कोश, पृ. 471-472

[2] भारतीय प्रतीक विद्या, पृ. ३.

[3] न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः। हिरण्यगर्भ इत्येष मा मा हिंसोदित्येषा यस्मान्न जात इत्येषः॥ यजुर्वेद, ३२:३

[4] ऋग्वेद, १:१.३, शतपथब्राह्मण, १४:२.२.१४, यजुर्वेद, ३७:३-१०, अथर्ववेद, ७:१८.१.

[5] भारतीय प्रतीक विद्या, पृ. ४२-४५.

[6] यस्माद्विष्टमिदं विश्वं तस्य शक्त्या महात्मनः। तस्मात्स प्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनात्॥ विष्णुपुराण, ३:१.४५

वाहन गरुड है। गरुड को वेद का प्रतीक माना गया है।

शिव - शिव सर्वव्यापी पूर्ण ब्रह्म है। इनके रूपों और गुणों की नाना प्रकार से कल्पना की गई है। वैदिक साहित्यों में रुद्र, भव, ईश आदि नामों से विस्तृत विवरण प्राप्त होता है। शिव के प्रसिद्ध चार आयुध हैं- त्रिशूल, डमरू, मृग, और परशु। त्रिशूल को शैव दर्शन के अनुसार त्रिशक्ति (ज्ञान, इच्छा, क्रिया) का प्रतीक माना है।[1]

सूर्य - सूर्य की उपासना परमात्मा के प्रत्यक्ष रूप में होती है। और यह विभुशक्ति का प्रतीक है। बृहदारण्यकोपनिषत् के अनुसार जो आदित्य अर्थात् सूर्य के भीतर उपस्थित है वही अन्तर्यामी और अविनाशी है।[2] सूर्य से सम्पूर्ण जीव की उत्पत्ति होती है। यह चर और अचर के अस्तित्व का कारण है।

दुर्गा - दुर्गा पराशक्ति और परब्रह्म है। दुर्गा की प्रतिमा ब्रह्म के अभिनव रूपकल्पना का प्रतीक है। मन्दिर, स्तूप आदि भारतीय वास्तुकला के प्रतीक हैं जो भारतीय संस्कृति के अध्यात्म स्वरूप को प्रदर्शित करते हैं।

मन्दिर - मन्दिर प्राचीन भारतीय वास्तुकला का धार्मिक प्रतीक है। यद्यपि यज्ञप्रधान वैदिक संस्कृति में मन्दिरों का उल्लेख प्राप्त नहीं होता है, तथापि पर्णशाला का वर्णन मिलता है जिसके भीतर स्थित यज्ञवेदी को पृथ्वी का प्रतीक माना गया है। शतपथ ब्राह्मण में भी अन्तर्वेदी को द्यौ तथा वेदी को पृथ्वी का प्रतिरूप माना है।[3] वृक्ष, पर्वत के शिखर के आकार-प्रकार आदि आध्यात्मिक और आदिभौतिक दृष्टि से मन्दिर के संरचना के प्रेरणा स्रोत रहे हैं। भारतीय इतिहास में विभिन्न शासन काल में भिन्न-भिन्न मन्दिरों का निर्माण हुआ। नाग वंश के शासन काल में शिव तथा नाग देवों के मन्दिरों का निर्माण तथा गुप्त काल में विष्णु मन्दिरों का निर्माण हुआ। गुप्तकाल तक मन्दिर वास्तुकला का सुव्यवस्थित प्रतीक रहा। शास्त्रीय सिद्धान्तों का सुन्दर समन्वय मन्दिर वास्तुकला की विशेषता है।[4]

स्तूप - भारतीय वास्तुकला में स्तूप रचना अत्यन्त प्राचीन है। वैदिक साहित्य में 'स्तूप' शब्द के अनेक प्रयोग मिलते हैं। ऋग्वेद में उठती हुई अग्निशिलाओं को स्तूप कहा गया है।[5] आकाश में सूर्य देदीप्यमान स्तूप के सदृश प्रतीत होने के कारण वैदिक शब्दावली में 'हिरण्यस्तूप' कहा गया है।[6] आश्वालायन गृह्यसूत्र में इसे महापुरुष की स्मृति का प्रतीक कहा गया है।[7] बौद्ध और जैन धर्मों में भी वीर योद्धाओं, धर्म प्रचारकों और शासकों की स्मृति में स्तूप के निर्माण का वर्णन है। हिमालयी क्षेत्र लाहुल-स्पीति बौद्ध बहुल क्षेत्र है, अतः यहां भी स्तूप का निर्माण होता है जिसे 'छोरतेन'

---

[1] त्रिकोणं भगमित्युक्तं वियत्स्थं गुप्तमण्डलम्। इच्छाज्ञानक्रियाकोणं तन्मध्ये चिञ्चिनीक्रमम्॥ तन्त्रालोक, १४.

[2] य आदित्ये तिष्ठन् आदित्यादन्तरो यं आदित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरे यमयत्येष त आत्मान्तर्याम्यमृतः। बृहदारण्यकोपनिषत, ३:७९.

[3] शतपथब्राह्मण, ७:३.१.२७.

[4] प्राचीन भारतीय कला में प्रतीक पृ. ५२.

[5] मा शूने अग्ने निषदाय नृणां माशेषसोऽवीरता परित्वा प्रजावतीषु दुर्यासु दुर्य। ऋग्वेद, ७:१.११.

[6] अबुध्ने राजा वरूणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः। नीचीनाः स्थुरूपरि बुध्न एषामस्मे अन्तर्हिताः केतवः स्युः॥ ऋग्वेद, १:२४.७.

[7] आश्वालायन गृह्यसूत्र, ४:५.९-१०

कहा जाता है। शंक्वाकार स्तूपों के शीर्ष पर काष्ठ स्तम्भ होता है, जिसे 'धर्म का प्रतीक माना गया है।[1] वस्तुतः स्तूप निर्माण शवसमाधि का ही प्रतीक नहीं है अपितु सर्वभूतों की प्राणशक्ति, विश्वात्मा तथा भौतिक जगत् का प्रतीक कहा गया। वैदिक आर्यों की स्तुति में अश्व, गौ, बैल आदि की याचना का वर्णन है। वैदिक साहित्य में अश्व प्रतीकात्मक शब्द है। अतः इसके विभिन्न अर्थ प्राप्त होते हैं। तैत्तिरीय ब्राह्मण में '**अप्सुयोनिर्वा अश्वः**', शतपथ ब्राह्मण में '**वज्रो वा अश्वः**', अथर्ववेद में '**अश्वावती शाला**', कहा गया है।[2] वैदिक काल में अश्व आदि पशु तत्कालीन संस्कृति में सुख और समृद्धि के प्रतीक थे। इसी क्रम में प्रकृति की अमूर्त शक्तियों को मूर्त रूप प्रदान किया गया। ऋग्वेद में अमूर्त अज्ञान, काम, क्रोध, लोभ मोह इत्यादि को उलूक, चिड़ा, भेड़िया व गृध्र से अभिन्न रूप में प्रस्तुत किया है। सामवेद में श्रद्धा को माता से अभिन्न रूप में प्रस्तुत किया है।[3]

सांस्कृतीक प्रतीक - भारतीय संस्कृति में प्रतीक आस्था और कल्याण की भावनाओं को समृद्ध करते हैं। प्रतीकों की तीन श्रेणियों का वर्णन प्राप्त होता है। प्रकृति से गृहीत प्रतीक - लता, वृक्ष, पशु-पक्षी और सूर्य चन्द्र आदि। एवं मानव द्वारा निर्मित वस्तुओं और उपकरणों के प्रतीक यथा - कलश, दर्पण, हथियार आदि और तीसरे प्रकार के प्रतीक अभिकल्पित रूपाकार और संख्याएं हैं।[4] भारतीय परम्परा में अश्वत्थ वृक्ष पवित्र एवं पूजनीय है। वेदों में इसे देवसदन की संज्ञा दी गई है।[5] बौद्ध धर्म में यह बुद्ध की विचारधारा और विश्वास के प्रतिनिधि एवं प्रारम्भिक प्रसार का प्रतीक है।[6] भारतीय संस्कृति में कमल सृष्टि का प्रतीक है। भारतीय गृह निर्माण और कला में कमल, कलश, कुम्भ आदि प्रतीकों का प्रयोग हुआ है। शतपथ ब्राह्मण में पद्मपत्र को पृथ्वी का प्रतीक कहा गया है।[7] आध्यात्मिक साधना के क्षेत्र में पद्म लब्धप्रतिष्ठ प्रतीक है। बौद्ध धर्म में सहस्रदल पद्म का 'मणि पद्मे हुँ' के रूप में जप होता है। भारतीय संस्कृति में पद्म विविध रूपों के प्रतीक हैं। विष्णु, लक्ष्मी, इन्द्र आदि देवों के भिन्न-भिन्न आयुध के प्रतीक हैं। यथा - विष्णु का पद्मायुध जल का प्रतीक, लक्ष्मी और इन्द्र का पद्म विभव का, पार्वती का पद्म वैराग्य का, चन्द्र का पद्मायुध आनन्द और लावण्य का प्रतीक कहा गया है।

भारतीय संस्कृति में 'आयुध' वीरता, सामर्थ्य और तत्परता के प्रतीक हैं। वैदिक साहित्यों एवं परवर्ती साहित्यों में आयुधों को माङ्गलिक प्रतीक माना गया है। भारतीय मूर्तिकला में भी आयुधों का चित्रण प्रदर्शित होता है। इन आयुधों को धार्मिक चिह्न के रूप में अङ्कित किया गया है। 'चक्र' भारतीय संस्कृति का धार्मिक प्रतीक है। 'भारतीय कला में धर्मचक्र का स्वरूप आयुध का प्रतीक है, जो धर्म की रक्षा की भावनाओं का प्रतिनिधि है। बौद्ध धर्म की

---

[1] लाहुल-स्पीति: जीवन और संस्कृति, पृ. ९९.

[2] तैतिरीयब्राह्मण, ३:४.४.३, शतपथब्राह्मण, ४:३.४.२७, अथर्ववेद, ३:१२.२.

[3] पितायत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः। सामवेद, १:९.१०.

[4] भारतीय कला एवं संस्कृति के प्रतीक, पृ. २.

[5] अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि। तत्रामृतस्य चक्षणं देवाः कुष्ठमवन्वत॥ अथर्ववेद, ६:९५.९

[6] बुद्धचरित, १३:११५.

[7] शतपथब्राह्मण, ६:७.१.७

मूर्तिकला में चक्र का स्थान शीर्ष है।[1] इसे कालचक्र और संवत्सरवक्र भी कहा जाता है। 'चक्र' आत्मा का प्रतीक है, जिससे सम्पूर्ण जीवन चक्र संचालित होता है। विष्णुधर्मोत्तर पुराण में इसे धर्मचक्र, कालचक्र और भचक्र कहा गया है।[2] कालिदास ने इसे सुख-दुःखरूपी जीवन का चक्र कहा है। संस्कृत साहित्य में यह सामान्य और अलङ्कृत दोनों रूपों का प्रतीक रहा है।[3] 'त्रिशूल' शैव धर्म का आयुध प्रतीक है। विष्णुधर्मोत्तरपुराण के अनुसार त्रिशूल सत्, रजस् और तमो गुण का प्रतीक है।[4] इस प्रकार ध्वज भी भारतीय कला में संगठन, संयम, अनुशासन और स्वाभिमान का प्रतीक है।

उपसंहार - भारतीय संस्कृति में 'प्रतीक' कला के विविध स्तरों को रेखाङ्कित करता है। प्रागैतिहासिक कला में प्रतीकों में कर्म भावना की प्रधानता है। प्रत्येक युग में तत्कालीन लोक जीवन एवं प्रचलित मान्यताओं आदि से प्रतीक सम्बन्धी पृष्ठभूमि की वास्तविकता ज्ञात होती है। पद्म, स्तूप, मूर्तिकला आदि आध्यात्मिक प्रतीक रहे हैं। वैदिक मान्यताओं एवं परिभाषाओं के आधार पर प्रतीक विधा का ज्ञान सम्भव है। अतः प्रतीक के माध्यम से भारतीय तत्त्वज्ञान, संस्कृति, लौकिक चिन्तन, शास्त्रीय विचारधारा का प्रतिबिम्बन हुआ है।

सहायकग्रन्थसूची

1. कालिदास (१९३९) मेघदूत, काशी संस्कृत सीरीज, वाराणसी।
2. तिवारी, मारुतिनन्दन एवं गिरि, कमल (१९९७) मध्यकालीन भारतीय प्रतिमालक्षण, वश्वविद्यालय प्रकाशन, वाराणसी।
3. तिवारी, मारुतिनन्दन एवं गिरि, कमल (२०२०) पूर्व मध्य एवं मध्यकालीन भारतीय मूर्तिकला, वश्वविद्यालय प्रकाशन, वाराणसी।
4. दामोदर, सातवलेकर (१९३८) अथर्ववेद का सुबोधभाष्य, स्वाध्याय मण्डल, पारडी।
5. द्विवेदी, शिवप्रसाद (२०२०) श्रीविष्णुमहापुराण, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
6. नारायन, कपिलदेव (२०१५) विष्णुधर्मोत्तरपुराण, चौखम्बा कृष्णदास अकादमी, वाराणसी।
7. पाण्डेय, प्रभाशङ्कर (२००१) सुप्रतिकाः प्राचीन भारतीय कला में प्रतीक, शारदा पब्लिशिंग हाउस, दिल्ली।
8. मिश्र, जनार्दन (१९८९) भारतीय प्रतीक वद्या, बिहार राष्ट्रभाषा परिषद, पटना।
9. वर्मा, सुरेन्द्र (२०११) भारतीय कला एवं संस्कृति के प्रतीक, मध्यप्रदश हिन्दी ग्रन्थ अकादमी, भोपाल।
10. शर्मा, गंगा सहाय (२०१६) ऋग्वेद, संस्कृत साहित्य प्रकाशन, दिल्ली।
11. सायण, (१९९०) शतपत ब्राह्मण, नाग प्रकाशन, दिल्ली।

Author's Details

Address: शोधछात्र, संस्कृतप्राच्यविद्याध्ययनसंस्थान,
जवाहरलालनेहरू विश्वविद्यालय, नई दिल्ली
Email: shashnirigzin@gmail.com

****

[1] भारतीय कला में प्रतीक, पृ. १३१.

[2] विष्णुधर्मोत्तर पुराण, ६०.

[3] नन्वात्मानां बहुविगणयन्नात्मनैवावलम्बे तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।
कस्यात्यन्तं सुखमुपनतं दुखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रेनेमिक्रमेण॥ मेघदूत, उत्तरमेघ, ४६।

[4] विष्णुधर्मोत्तर पुराण, ४८.